ननु सुखमहमस्वाप्समिति स्मरणस्य भारादिदुःखोपगतौसुखभ्रम[33] इव निद्राकाले संसारदुःखाभावे सुखभ्रमो यः तन्मूलत्वम्। तथा किञ्चिन्नाज्ञासिषमित्यस्य च आलोकाभावे तमोभ्रम इव तादात्विक सकलज्ञानाभावे यो भावाभावभ्यां तदुभयसमर्थने तदभावज्ञानात्पूर्वं तदभावानुभवसामग्र्या[34] तदात्माश्रयादिग्रहणादिकया भवितव्यं सा चाश्रयग्रहणं प्रतियोगिस्मरणं तद्देशकालादिवैशिष्ट्यप्रतीतिः प्रतियोगिग्राहकेन्द्रियसन्निकर्षणाद्यदृष्टं चेत्येवं रूपा सा चेन्निद्रायामस्ति[35] तर्हि दुःखाभावज्ञानाभावयोरनुभवेन तदाश्रयविशेषणतया तद्विषयस्याशेषस्य च स्मरणेन तद्देशकालवैशिष्ट्येन च प्रतीतेन[36] तद्ग्राहकेणान्तःकरणेन सन्निकृष्टेन भाव्यमेव; न च तत्सर्वमिन्द्रियैः-रन्तःकरणैर्वा सुप्तौ कस्यापि वादिनो मते अनुभूयते स्मर्यते वा इन्द्रियार्थैरनुभवे सुषुप्तित्वस्येव हानिप्रसङ्गात्। अनेनैव न्यायेन प्रातः काले स्वरूपेण चत्वरादि दृष्टवतो मध्यन्दिने गजसत्तां दृष्टवतः तदानीमेव प्रातःकालीनगजाभावानुभवो यथा भवति तथा सुषुप्तौ ज्ञानाद्यभावमपि विदितवतोपि पश्चात् ज्ञानाद्यभावानुभवः षष्टप्रमाणेन तद्विषयज्ञानाभावलक्षणेन स्यादित्येतदपि परास्तम्। चत्वरादेरिव तदभावाश्रयस्यात्मनः सुषुप्तावग्रहणात् एवं केवलाश्रय- ग्रहणमेवाभावव्यवहारे हेतुरिति वदतामपि पक्षोऽत्र निरवकाशः। सुषुप्तौ केवलस्य ज्ञानाद्यन्वितस्य चात्मनः प्रकाशनाभ्युपगमात् विषयप्रकाशेषु हि तस्य प्रकाशस्तैरभ्युपेयते। बुद्धीन्द्रियशरीरेभ्यो भिन्नआत्मा विभुर्ध्रुवः नानाभूतः प्रतिक्षेत्रमर्थवित्तिषु भासत इति शालिकानाथोक्तेः। अत इन्द्रियादिनिरपेक्षेण साक्षिणैव मया वेद्यत्वान्निद्रायास्तत्साक्षिणो मे सत्त्वं सुखत्वं स्वप्रकाशकत्वञ्च सिद्धम्।

एवं देहेन्द्रियादिव्यतिरिक्तत्र्यवस्थासु तद्द्रष्टृतया सत्त्वेन

37

समर्थितस्यात्मनः सर्वावस्थादिभूतमूलभूत्मायानृत्तसाक्षित्व-मनुसन्धानसौकर्यार्थं रुपयति-

स्वमहिम समरंगेस्यूतचैतन्यसूत्रै-
र्निजसमुचितचेष्टा नामरूपैश्च भावैः।
प्रभवति भवनाट्ये सन्निधौ यस्य माया
स विभुरहमिहैनां सर्वसाक्षी समीक्षे।। 14 ।।

स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति श्रुत्युक्तेः (छा.7.24.1) स्वस्वरूपभूतमाहात्म्यरूपे समे निर्विशेषरंगे नृत्ताधिष्ठाने-

विष्णुभक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा।
अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते।।
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता।
सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते।। (वि.पु.6.7.61.62)

इति वैष्णवोक्तेन जीवेनात्मना चिच्छक्तिमयेन सूत्रेणनुस्यूते तत्तज्जातिस्वभावोचितचेष्टितसंस्काराद्यैर्थापूर्वमवकल्पयदिति श्रुत्या

नामरूपञ्चभूतानां कृत्यानाञ्च प्रपञ्चनम्।
वेदशब्देभ्य एवादौ वेदानाञ्च चकार सः।।(वि.पु.1.5 .63) इति

वैष्णवोक्त्या च प्रतिकल्पमेकविधैः सुरनरतिर्यगाद्यैः पदार्थैः करणैर्मायांगनासूत्रधारी अयोवत्स्वयं जटरूपापि अयस्कान्तस्येव यस्य सन्निधौ संसारनाटकमभिनेतुं समर्था भवति। सोऽहं सर्वस्य मायातत्कार्यजातस्य तदभावस्य मायाद्युपहितस्य चात्मनः सजलस्वप्रतिबिम्बस्येव भास्वानिन्द्रियाद्यव्यवधानेन साक्षाद्रष्टा सन्निहैव स्वमहिम्नि प्रतिष्ठितः

तत्रैवाध्यस्तां स्वकार्यां मायां सम्यगविकार ऐन्द्रजालिक इव यथास्थितं पश्यामि। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति (श्वे.6 .11) श्रुतेः। स पश्यति शरीरं तच्छरीरं तन्न पश्यति। तौ पश्यति परः कश्चित्तावुभौ तं न पश्यतः।। (शि.पु.7.6.5.60) इति शैवोक्तेः। साक्षित्वमपि बोद्धृत्वमविकारितयात्मन इति वाक्यवृत्युक्तेश्च ।

अथात्मनः सर्वकालसत्त्वं त्रिश्लोक्याह -

इह वपुषि यथैको बह्ववस्था विभिन्ने
गतजनिबहुदेहेष्वेक[38] आत्मा तथाऽयम्।
जगति तरतमत्वात्प्रेतजातिस्मरादे-
रपि च नवशिशूनां स्तन्यसंस्कारदृष्टेः।। 15 ।।

इह वर्तमाने स्थूलदेहे तु अनुसन्धातुरेकत्वेन प्रत्यभिज्ञायमानेपि बाल्यकौमारादि बह्ववस्थाजन्यभिन्नैः परिणामैः घटशरा- वादञ्चानादिगतैरिव स्वाश्रयभेदकैः प्रत्यवस्थं भिद्यमानेपि अनुसन्धाता तु आत्मैक एव यथास्ति तथा भूतभविष्यन्नानाजन्मोपात्तानेकदेहेष्वेक एवात्मा भूत भाविप्राक्जन्मदेहेषु तु कालव्यवधानान्मलिनमतिभिरनुसन्धानं दुष्करम्। विशिष्टादृष्टनिर्मलमतयस्तु[39] केचित् प्राग्जन्मदेहादि- कमनुसन्दधत्येव। अतो वर्तमानदेहात् प्रागप्यात्मनः सत्ता ज्ञेया। कुतः[40]? जगति जात्यादि सामान्येपि प्रतिशरीरं सुखदुःखभोगज्ञानैश्वर्याणां तारतम्यं दृश्यते। तद्धि प्राग्जन्मकृतसुकृतादिकन्तत्समवायिनञ्च स्थायिनमात्मानं विना न संभवेत् एवं प्रेता ब्रह्मराक्षसाद्याः तथा जातिस्मराश्च प्राग्जन्माचक्षाणा अपि विसंवादिवाक्या दृश्यन्ते। किञ्च सद्यो जातवत्सादीनां स्तनपानपरिचयसंस्कारदृष्टेः प्राग्जन्माभ्यस्त- स्तन्यपानानुमानात् प्राग्जन्मन्यात्मनः सत्ता ज्ञेया। सापेक्षत्वात् अनादित्वाद्वैचित्र्यात् विश्ववृत्तितः

प्रत्यगात्मनियमात् वृत्तेरत्र हेतुरलौकिक इति न्यायात्। एवं भाविजन्मस्वात्मनस्सत्त्वमनुमेयम्। इदञ्च चार्वाकान् प्रति युक्तिमात्रं प्रदर्शितम्। आस्तिकान् प्रति तु श्रुतिगीतावैष्णवोक्तयो यथा अथैतमेवाध्वानं पुनरावर्तते स इतः प्रयन्नेव पुनर्जायत इति।

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।। (गी. 2.13)
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। (गी. 2. 27)

इति।

मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा।
आगमोयं तथा तच्च नोपादानं विनोद्भवः।।

(वि.पु.1.17.58) इति। तस्मादात्मनो भूतभाविजन्मस्वपि सत्त्वं सिद्धम्।

एवं वर्तमानदेहे तत्पूर्वापरदेहयोश्च आत्मनः सत्तां संसाध्य तस्य सर्वस्मात् कालतोऽनवच्छेदं प्रसंगात् देशतो वस्तुतश्चाह-

स च निरवयवत्वात् विश्वदृश्याश्रयत्वा-
द्दृगविषयतया स्वप्रागभावाद्यबोधात्।
अनुभवितृतयावच्छेत्तृकालादिकाना-
मविकृतिरखिलात्मा सर्वगस्सन्ततश्च।। 16 ।।

य एवमुक्तत्रिकालावस्थितिः सोऽयमात्मा निष्कलश्रुत्या निरवयवः तस्मादविकृतिरिति संबन्धः सर्वं खल्विदं ब्रह्म तज्जलानिति (छा.3 .14.1) श्रुत्या विश्वस्य वियदादेर्दृश्यस्य दृष्टिदृष्टस्याश्रय- स्तस्मात् व्यभिचारिषु दृश्येषु सन्ततः विज्ञानंब्रह्मेति श्रुत्या (बृ.3.9.27) दृग्रूपः विज्ञातारमरे केन वा विजानीयादिति श्रुत्या (बृ.2.4.14) दृग्ररूपतया स

प्रकाशान्तरानपेक्षत्वाच्च प्रमाणानामविषयः । अतः स्वप्रकाशः स्वप्रकाशचित्त्वाच्च स्वप्रागभावस्याश्रतया प्रतियोगितया ग्रहीतुमयोग्यत्वात् अविकृतिः जन्मादिविकाररहितः एतावन्तं कालं नाभूवं न भविष्यामीति धर्मयुक्तस्यात्मनः स्वेन मानान्तरैर्वाननुभवात्। घटादेस्तु दृश्यस्य दृगायत्तसिद्धितत्वादितः प्राङ्नाभूत् घट इति घटस्य प्रागभावः। इदानीं नष्टो घट इति प्रध्वंसाभावः। घटः पटो न भवति, घटे पटत्वं नास्तीति वा अन्योन्याभावः। इह भूतले घटो नास्तीति संसर्गाभावः। एवमाद्या दृश्यधर्माः संभवन्ति नैवात्मनः ते स्युः तस्मात् स कालाद्यनवच्छेद्यः। इतश्च स्वदृश्यस्वावच्छेदकानां कालदेशजात्यादीनां जडत्वात् तदनुभविता तु चेतनात्मा तैरवच्छिद्यते। अतः कालानवच्छेदात् षट्विकारदूरः देशानवच्छेदात् सवर्गः वस्त्वनवच्छेदात् अखिलात्मना न हि चिद्व्यतिरेकेण चेत्यजात्यादि वस्त्वस्ति। एवन्त्रिधापि सन्तत आत्मैव न त्वन्यदाकाशादि आत्मनः आकशस्संभूतः (तै.2.1) वाचारम्भणमिति (छा.6.1.4) श्रुतेः, यावद्विकारन्तु विभागो लोकवदिति न्यायाच्च। अत आकाशवत्सर्वगतश्च नित्यः इति श्रुतिस्तु आकाशस्येतरेभ्यो जटेभ्योऽधिकत्वादात्मनः तस्मान्महत्त्वदर्शनपरा नत्वाकाशस्य दिक्कालानन्त्यपरा अत आत्मनः कालतोऽप्यानन्त्यं सिद्धम्।

कालः सृजति भूतानि कालः संहरते प्रजाः।
सर्वे कालस्य वशगा न कालः कस्यचिद्वशः।। (कू.पु.1.11.32)

इत्यादि लैङ्गकूर्माद्युक्त्या कालस्य स्वातन्त्रयेणात्मत्वप्राप्तौ कालोप्यात्मनि दृग्रूपेयम्मायासंबन्धरूपः कल्पित इत्याह-

41 उदयदुदित रिक्तैः स्वान्यवार्तानभिज्ञैः
42 स्फुटमिव घटयन्त्री 43 सूत्रके 44 बद्धकुम्भैः।
युगपदपि च यत्रावृत्यतेऽजाण्डषण्डैः

खलु सकलकालो दृग्विलासस्सतो मे।। 17 ।।

पूर्यमाणैः पूर्णैः रिक्तैश्च कुम्भैरिवोत्पाद्यमानैः उत्पन्नैर्विपन्नैश्च स्वस्यान्यस्य वृत्तान्तानभिज्ञैः ब्रह्माण्डवृन्दैः घटयन्त्रघटित- घटाधाररज्जाविव यस्मिन् कालतन्त्रे युगपत् भ्राम्यते सकलः मानुषपित्र्यदैवब्राह्मादि भेदात् [45]बहुविधः कालः सकलस्य चास्य जगतः कालनात् क्षोभणात् सकलकलो योऽसौ स्वप्रकाश सन्मात्रस्य- स्यानिर्वाच्यमायोपाधिसंबन्धादीश्वरव्यपदेशस्य [46]पुंप्रधानावस्था चिज्जडयोः प्रेरणाधारणादिहेतुः कालकाष्ठाद्यवयवः सर्वोत्पत्तिमन्निमित्तभूतोंशविशेषः कालात्माख्य स ममैव प्रत्यक्चैतन्यस्य दृशः चिच्छक्तेः विवर्त इत्यर्थः।

स्वभावमेके कवयो वदन्ति।
कालं तथान्ये परिमुह्यमानाः।।
दैवस्यैष महिमा तु लोके।
येनेदं भ्राम्यते ब्रह्मचक्रम्।। इति श्वेताश्वतरश्रुतेः(6.1)।

अथानन्तसमावेशान्मायाकालमवासृजत्।। (शि.पु.7.1.6.5)
कालकाषनिमेषादिकालःकलित विग्रहम्।
कालात्मेति समाख्यातं तेजो माहेश्वरं परम्।। (शि.पु.7.1.6.6)
तस्यांशांशमयी [47]मुक्तिः कालात्मनि महात्मनि।
[48]ततो निष्क्रम्य संक्रान्ता विसृष्टाग्रेरिवायसी।। (शि.पु.7.1.6.8)

इति शैवोक्तेः,

प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि।
चेष्टायतस्स भगवान् काल इत्युपलक्षितः।।

(भा.पु.3. 26.17) इति भागवतोक्तेः। कालो मायात्मसंबन्ध इति पौराणिकोक्तिस्तु एकं चैतन्यं एकाविद्येति वेदान्तपक्षावलम्बेन मायाया इव

तत्संबन्धस्याप्यात्मनि कल्पितस्यानिर्वचनीयत्वोक्तिपरा। वस्तूनां सत्तया विशिष्टः कालो वर्तमानः कालः प्रागभावप्रध्वंसाभावविशिष्टौ भूतभविष्यत्कालौ अभावस्य प्रागभावप्रध्वंसाभावत्वं कालप्राक्त्वाद्यायत्तमित्यन्योन्याश्रयतया दुर्निरूपत्वात् निर्वाच्यत्वं कालस्य। अतोऽनिर्वचनीयमायाया आत्मनश्च संयोगसंयोजिका शक्तिः तच्छक्तिमदीश्वरांशो वा काल इति पक्षत्रयमप्यनर्थान्तरम्। अतः कालो मे दृग्विलास इति अतः कालानवच्छिन्न आत्मेति युक्तम्।

अथास्यात्मनः सर्वदेहेषु सत्त्वं तत्प्रसङ्गादेकत्वञ्च द्विश्लोक्याह-

49

अनुपधिरणुता चेत्कृत्स्नदेहोत्थसौख्या-
द्यनुभवविरहः स्यात् भिन्नदेश्येप्यभोगः।
भवति तु परिमाणे मध्यमेप्यध्रुवत्वं
तदपरिमित आत्मा सर्वदेहेषु चैकः।। 18 ।।

मनसो मानञ्च परमाणुपरिमाणं घटादेः मध्यमं व्योमादेः परममहदिति त्रिधा तर्केषु स्थितिः। तत्रात्मनो लिङ्गदेहाद्युपाधिं विना स्वाभाविकमणुत्वञ्चेत् पादे मे सुखं शिरसि मे दुःखमित्येवमादिर्युगपत् सर्वाङ्गसंभूतसुखाद्यनुभवो विरुध्यते। एवमात्मनो देहं विहाय[50] गमनासंभवात् देशान्तरोत्पन्नेपि फले भोगो न स्यात् अथैतद्दोषपरिजिहीर्षयात्मनः कायपरिमितत्वे देहगमनात् गमने चाभ्युपगमे देहवृद्धौ वृद्धिः तत्क्षये क्षयश्चात्मनोऽयुपगम्येत वृद्धिक्षययोश्च अवयवायत्तत्वात् सावयवत्वेनानित्यत्वापत्तिश्च। तत्कार्योपाधिना तत्तन्मितत्वे स्वाभाविके अर्थापरिमितत्वमेवोक्तं स्यात्। तस्मादात्मा स्वभावत अपरिमित एव जीवावस्थायां लिङ्गदेहाद्युपाधिना नीवारशूकांगुष्टप्रादेशादिमात्र उपासनार्थं वा श्रुत्या कल्पितः। ज्यायान् दिवो ज्यायानाकाशात् केनेदं पूर्त्तं पुरुषेण सर्वमिति (छा.3.14.3) श्रुतेरपरिमितत्वं, आराग्रमात्रोह्यपरोपि दृष्टः,

(श्वे.5.8) अङ्गुष्ठमात्रः पुरुषः प्रादेशमात्रमविविमानं वैश्वानरमात्मानं (छा.5.18.2) इत्यादि श्रुतिभ्यश्च कल्पितमानत्वं, अणोरणीयान् महतोर्महीयानित्यादि (क.2.20) श्रुतिश्च सर्वान्तरतया सर्वव्यापित्वेनापरिमितत्वमेवाह। एवमपरिमितत्वे सिद्धे सर्वदेहेष्वेक एवात्मेत्यात्माद्वैतमेव युक्तम्। एक एव हि भूतात्मेति श्रुतिसम्मतश्च। एषोऽनन्तरश्लोकार्थोपक्षेपः।

नन्वात्मैक्ये प्रतिदेहं भिन्नभोगव्यवस्थानुपपत्तेर्नानात्मनो व्यवस्थात इत्याशङ्क्य तत्परिहरति-

प्रतितनुविभुनानात्मान्वये सर्वसाम्यात्
स्वकृतसुकृतभोगादि व्यवस्थैव न स्यात्।
वियदिव तु घटादिष्वप्सुवार्कस्ततोन्तः -
करणमणिषु चात्मैकोपि नानैव भाति।। 19 ।।

सर्वगतनानात्मत्वपक्षे सर्वेषामात्मनां प्रत्येकं सर्वशरीरेषु संबन्धस्य साधारण्यादस्यैवात्मनः इदं शरीरं भोगायतनं नान्यस्येति व्यवस्था न संभवेत्। [51] एकस्य सुकृतेनैवोपार्जितत्वादस्यैवेदं नान्यस्य चेत् तत्सुकृतमपि सर्वेषां किं न स्यात्। एकस्य पूर्वदेहा[52]दिना कृतत्वात् सुकृतादि च तस्यैवेति चेत् तदभिमानाद्यपि किं न सर्वेषामित्यनवस्थाप्यनादिः सर्वा सा कार्यकरी दुर्वारैव सर्वेषामप्यात्मनामनादित्वात्। एवमेकात्मपक्षे शङ्कितव्यवस्थानुपपत्तिदोषभयात् दुर्घटानेकात्मत्वपक्षाश्रयणेऽपि भोगव्यवस्था दुर्लभेत्यर्थः। एवं पक्षद्वयेऽपि दोषाशङ्कासामान्येपि ऐकात्म्ये तु बिम्बप्रतिबिम्बन्यायेन उपाधीनामहङ्काराणां नानात्वात् भोगव्यवस्था सुलभैवेति अपरार्द्धेनाह वियदिवेति । तु शब्दः पूर्वपक्षसाम्यव्यावृत्त्या स्वपक्षवैशिष्ट्यार्थं यथैक एवाकाशो घटगृहादिषूपहितः यथा चैक एवार्कः सरस्तटाकादिषु

प्रतिबिम्बितः सन् नानेव भाति। न च तद्गतैः कालुष्यकम्पादिगुणकर्मभिः बिम्बभूतोऽर्को लिप्यते। यथाचैकप्रतिबिम्बस्य धर्माः प्रतिबिम्बान्तरं न स्पृशन्ति एवं परमात्मैक एवाहमनेकेष्वन्तःकरणस्फटिकमणिषूपहितो नानारूप इव भामि। न च मां तानि कर्माणि निबध्नन्ति धनञ्जयेति (गी.9.9)। न च अन्तःकरणस्यैकस्यानादिमदीय मायाकल्पितस्य प्रातिस्विकधर्मस्तादृशे अन्तःकरणान्तरे संभवति। अन्तःकरणानां च प्रातिस्विकस्य हिंस्रमृदुत्वमुख्यस्य नानाधर्मस्य सर्वस्य सर्वप्रत्यक्षतया सिद्धत्वादैकात्म्ये तु भोगव्यवस्था सुस्था। नैव नानात्मत्वेनात्मनाम् अहं प्रत्ययव्यतिरेकेण प्रातिस्विकं लक्षणमस्ति येन तद्भेदात् भोगव्यवस्था स्यात्। ततः शब्दादिलिङ्गविशेषादाकाशादेरिव आत्मनोपि सर्वदेहेषु लक्षणैक्यादैक्यमेव युक्तम्। तस्य बुद्ध्याद्युपाधिधर्मवैचित्र्यात् नानात्वं वायोरिव तारमन्द्रादिशब्दधर्मैः।

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः।
अभेद[53]व्यापिनो वा[54]योस्तथाऽस्य परमा[55]त्मनः।।
एकस्य रूपभेदश्च बाह्यकर्मावृतिव्रजः।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणे हि सः।।(वि.पु.2.14.32, 33)

इति वैष्णवोक्तेः, आत्मैवेदं सर्वं, (छा.7.25.2) आत्मा वा इदमेक एवाग्र आसीत्(ऐ.1.1.1) इन्द्रो मायाभिः पुरुरूप ईयते(ऋग्वेदः 6.47.18) इत्यादि श्रुतिभ्यश्च एवमैकात्म्यस्य श्रुत्याद्यानुकूल्यात् प्रत्युत मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (बृ.4.4.19) इति भेदधीनिन्दकश्रुतिदर्शनात् द्वैतविधायकश्रुत्यदर्शनाच्च एकेनैवात्मना भोगव्यवस्थोपपत्तौ श्रुतिविरुद्धदुर्घटतरनानात्मकल्पनात् गौरवदोषा- भावाच्च अनुभव विरोधाभावाच्च भोगव्यवस्था सुस्था। तथाहि

एकैकेन्द्रियावच्छिन्नचैतन्यस्यैकाग्रेण तत्तद्विषयग्रहणेनेन्द्रियान्तर-विषयग्रहणाभावेपि सर्वेन्द्रियानुसन्धातृचैतन्येन सर्वविषया अनुसन्धीयन्ते। एवमेकदेहाभिमान्यन्तःकरणोपहितेन स्वदेह इव देहान्तरस्थबुद्ध्याद्यनु-संधातृत्वविरहेपि सर्वदेहबुद्ध्यादिसाक्षि सर्वात्मकोऽहमिति अभिमानवद्भिः हिरण्यगर्भाद्यः तदुपासनासिद्धैर्योगिभिश्च सर्वज्ञतया सर्वात्मकतया च तत्सर्वमनुसन्धीयते एव। तद्धैतत्पश्यन्नृषिः वामदेवो प्रतिपेदे, अहं मनुरभवं सूर्यश्चेत्यादि (बृ.1.4.10) श्रुतिभ्यः तस्मादद्वितीयः सर्वेषु देशेषु सर्वेषु देहेषु च आत्माहं स्फुरामीति सिद्धम्।

अथात्मनः सर्ववस्तुष्वपि तदुपादानतया सत्त्वं द्विश्लोक्याह-

भवति विधिनिषेधेष्वस्तिनास्तीति स्त्वा -
नुगतिरसदभानात् भाति यत्तत्सदेव।
जगदिति तदभिन्नं[56] तन्मयत्वेन[57] भानाद्-
घट इव मृदनन्यः कारणं तत्सदस्ति।। 20 ।।

घटोऽस्ति पटोऽस्ति इति विधिप्रत्ययेषु तथा घटो नास्ति पटो नास्ति इति निषेधप्रत्ययेषु च अस्तित्वार्थस्य घटादिविशिष्टतया नालिङ्गितघटादिविशिष्टतया चानुगतिर्भवति नीलमुत्पलं श्वेतमुत्पलमिति व्यवहारेषु उत्पलस्येव घटं जानामि न जानामीत्यत्र तदुभयसाक्षिणो ज्ञानस्यैव च सत्ताया एवानुगतिदृश्यते। घटोऽस्तीत्यत्र घटस्य सत्त्वमिव घटो नास्तीत्यत्रापि घटाभावस्य स्वरूपसत्त्वं दृश्यते अतो न तत्र सत्त्वानुगते विरोधः। न ह्यभावप्रत्ययविषयत्वं शून्यत्वं घटाभावो नास्तीत्यत्र घटस्येव स्वकीयाभावस्यैवाभावरूपत्वात् अभावस्य तु यो भावो भाव एवावशिष्यते इति न्यायात् घटः पटो न भवतीत्यत्र चान्योन्याभावस्य प्रतीतौ घटस्यैव पटाभावत्वात्। तार्किकाद्यैर्हि द्रव्यगुणकर्मसु सत्तासामान्यसंबन्धात् सत्त्वं

सामान्यविशेषसमवायेष्वभावे च स्वरूपसत्त्वमेवेष्टम्। असतः शशविषाणादेः क्वचिदप्यदर्शनात् यद्यद्भाति तत्तत्सदेवेति हेतोः सन्मयत्वेन भानात् सर्वं जगत्सतो ब्रह्मणो नान्यत्सदेव। कारणात् कार्यस्यानन्यत्वात् मृज्जातो मृदनुगतो घटादिर्यथा मृदनन्यो मृदेव एवं सर्वानुगतं सर्वाकारञ्च यत् सद्ब्रह्म तदेवाहमस्मि। ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्येति गीतावैष्णवोक्तिभ्यां सदेवेत्यादि छान्दोग्यश्रुतेश्च। तत्र हि सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य (छा.6.2.1) सत एव तेजोबन्नसृष्टिश्चोक्ता। सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठिताः (छा.6.2.1) इति सर्वस्य सत्कारणता समर्थ्यते। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (छा.6.8.7) इति चान्ते[58] जडस्य[59] सति लये, चैतन्यस्य तु भेदापगमेनैक्यञ्च निर्णीय विद्या समापिता तत्सर्वकारणमनन्तं सद्रूपं ब्रह्मास्मि।

एवं परमकारणोपलक्षितस्य सद्रूपस्यात्मनश्च परमकार्यब्रह्माण्डान्तां व्याप्तिमनुसन्धातुमाह-

> महदहम[60]विशेषोद्भूत भूतावृतानि
> प्रकृतिविकृतिजातान्यण्डषण्डान्यखण्डे।
> दधति सदमृताब्धौ यत्र कल्लोललीलां
> [61]स परमपुरुषोहं वासुदेवोखिलात्मा।। 21 ।।

चिदात्मनस्सद्वस्तुनः शक्तिमायाप्रकृत्याख्यानाद्यविद्यात्मनो जडवस्तुनश्चानादौ अनिर्वाच्ये संबन्धे तत्संबन्धोपहिताश्चिदंशे जीवः पुमान् तदुपाधिर्माया च त्रिगुणा प्रकृतिः चित्स्वरूपतिरोधायिका भावरूपा। सा हि ज्ञानप्रवृत्तिमोहमयसाम्यावस्था।

सत्वं ज्ञानं तमोऽज्ञानं रजोमिश्रमुदाहृतम्।

गुणानां बुद्धिवैषम्याद्वैषम्यं कवयो विदुः (ईश्वरगीता.2.7.27) ।।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव (गी.14.22) ।।

इतीश्वर भगवद्गीताभ्यां पुंप्रधानयोरैक्याध्यासो लयादौ सृष्ट्यादौ तु किञ्चिद्भेदो यथोक्तमुपदेशसारे-

तसुप्तिलययोरैक्यमध्यासात्प्राप्यतिष्ठतः।

सर्गप्रबोधयोरीषत् भेदात्तादात्म्यमागते।।

अत आत्मज्ञानरूपाया मूलप्रकृतेर्विपरीतज्ञानाङ्कुररूपो निर्विकल्पकज्ञानोन्मेषो महान्नाम स्यात्। ततो अहमादि प्रपञ्चः अज्ञानादन्यथाज्ञानं तस्मान्मायामयं जगदिति ईश्वरोक्तेः। स चाहङ्कारो मिथ्याज्ञानविशेषः स त्वन्तःकरणमपि इन्द्रियाण्यहं महाभूतमय स्थूलदेहोऽहमिति च वैकारिक तैजसभूतादिसंज्ञः सात्त्विकराजस तामसात्मा त्रिधा स्यात्। तत्र सात्त्विकादन्तःकरणमनोबुद्ध्यहंकार चित्ताख्य चतुर्वृत्तिकं चन्द्रब्रह्मशिवक्षेत्रज्ञदैवत्यं दिग्वातार्कप्रचेतोक्षिपग्नी- न्द्रोपेन्द्रमित्रका इति भागवतोक्तं श्रोत्रादिवागादिषु बुद्धिकर्मेन्द्रियदेवता- दशकञ्च। राजसात्तु दशेन्द्रियाणि भूतादेस्तामसात्[62] भूतसूक्ष्मादि अविशेषाख्यानि शब्दस्पर्शरूपरसगन्धात्मकानि पञ्च तन्मात्राणि स्युः।

तेजसानीन्द्रियाण्याहुः देवा वैकारिका दश।

एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ।।(वि.पु.1.2.47)

तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च।

तामसोभूतसूक्ष्मादिर्यतः खं निङ्गमात्मनः ।।(भा.पु.3.5.32)

एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोमयः।।

इति बैष्णवभागवतोक्तिभ्यां तन्मात्रेभ्यो व्योमादिमहाभूतोद्भवः। भूतानि

पञ्चीकृतमेलनं लब्ध्वा ब्रह्माण्डं घटदेहादिकञ्च जनयन्ति। पञ्चीकरणन्तु भूमौ भूम्यात्मकं आद्यार्धमन्यार्धे चतुर्धा कृते जलादिचतुर्भूतानाञ्चत्वारोऽर्धपादा स्युः। एवमबादिष्वप्यूह्यं तच्चोपदेशसारोक्तं-

यथा एवञ्जातेषु भूतेषु प्रत्येकं स्युर्द्विधा ततः।

चतुर्धा भिन्नमेकैकमर्धमर्धं तथा स्थितम्।।

[63] व्योम्नोऽर्धभागाश्चत्वारोवायुतेजःपयोभुवाम्।

अर्धानि यानि वायोस्तु व्योमतेजः पयोभुवाम्।।

इत्यादि इति पञ्चीकृतैर्महाभूतैः दशगुणोत्तरैरावृतानि। यद्वा महदहङ्कारतन्मात्राख्यसप्तप्रकृतिभिरेव महाभूतद्वारोत्पादितानि भूतानि प्राणिनस्तैरावृतानि संवृतानि ब्रह्माण्डानि कीदृशानि अविकृत्या मूलप्रकृत्या तद् विकृतिभिर्महदाद्यैः सप्तभिः विकृतिप्रकृतिसंज्ञैः तथा श्रोत्राद्यैः दशेन्द्रियैरेकादशेनमनसा पञ्चमहाभूतैश्चेति षोडशविकृतिभिश्च जातानि ब्रह्माण्डान्तानि व्यावहारिकसद्वस्तूनि तज्जातानि शुक्तिरजताद्यनिर्वाच्य सद्वस्तूनि यस्मिन्नात्मरूपे पारमार्थिकसद्वस्तुन्यमृते स्वानन्द[64]रूपे अर्णववदनन्ते तरंगभंगीमङ्गीकुर्वन्ति तत्स्वरूपमनावृण्वन्ति भाति। नहि तरङ्गैर्जलस्यावृतिः स्यात् एवञ्चेति जगत् चिदात्मानं नावृणोति चिद्भास्यत्वात् य एवं सर्वदा सर्वात्मकः पुरा[65]ख्यसर्वदेहप्रवेशात् परमपुरुषः सर्वत्रासौ समस्तञ्चात्र वसतीति वासुदेवः। अत एव अखिलात्मैरपि वासुदेवो नयतोन्यदस्तीति वैष्णवोक्तेः। सोऽहमस्मीति वस्तुत आनन्त्यं सदात्मनः श्लोकद्वयोक्तं सिद्धम्।

उक्तं सद्विंशिकाप्रकरणार्थं अनुभवसौकर्यार्थं संगृह्याह-

गलितसकलवेलं व्याप्तसर्वान्तरालं

विधुतजडिमपङ्कं निष्कलं निष्कलङ्कम्।

सममहमसमानं स्वानुभूत्येकमानं

सततरहितमोहं ब्रह्म सत्सौख्यदेहम्।। 22 ।।

ग्रस्तसमस्तकालमर्यादं पूरितसर्वदेशावकाशं विधुतजाड्यजंबालतया[66] स्वप्रकाशचिद्रूपत्वाद्वीतवस्तुविच्छेदं अतोऽनन्ततया निरंशं अत एव प्राप्याभावात् रागादिकळङ्करहितं एकधैवानुद्रष्टव्यं[67] निर्दोषं हि समं ब्रह्मेति श्रुतिस्मृतिभ्यां समं सदैकरूपं न तत्समश्चाभ्यधिकश्च दृश्यत (श्वे.6.8) इति श्रुतेरद्वितीयत्वाच्चासमानम् अयमात्मा सर्वानुभूः, (बृ.2.5.19) आत्मैवास्य ज्योतिरिति (बृ.4. 3 . 6) श्रुतिभ्यां नाहमस्मीति जातु चिदप्यननुभवाच्च स्वानुभूतिरेकैव मानमस्य नित्यानुभवत्वादेव स्वस्मिन् विस्मरणादिमोहानवकाशात् नित्यनिरवद्यं यदेवंविधं तत्पदलक्ष्यं सर्वसौख्यदेहं सदानन्दात्मकं ब्रह्म तदेवाहमस्मि। यद्यप्यस्मिन् सद्विंशिकाप्रकरणे देहादिव्यतिरिक्ततया अवस्थात्रयानुगतं देशकालवस्त्ववच्छेदशून्यतया सततं सद्वस्त्वेवात्मतया प्रतिपादयति तथापि तस्य स्वप्रकाशत्वात् सुखरूपत्वाच्चानन्तरप्रकरणद्वयार्थत्वेन वक्ष्यमाणं चित्त्वमानन्दत्वं च स्वरूपमेवेति दर्शयितुं ब्रह्म स्वानुभूत्येकमानं सत्सौख्यदेहमिति स्वप्रकरणार्थः सर्वशास्त्रार्थश्चानुसन्धानसौकर्यार्थं संक्षिप्यात्र प्रदर्शितः। तथा श्रीविष्णुपुराणे - षटंशार्थः सर्वोप्यहं हरिः सर्वमिदं जनार्दन इति प्रथमांशस्यापि प्रान्ते दर्शितः। एवं इहापि ब्रह्मात्मैक्यमिति सिद्धम्।।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।
स्वात्मयोगप्रदीपे सद्विंशिकां प्रथमामिति।।

इति स्वात्मयोगप्रदीपप्रबोधिन्यां सद्विंशिकाप्रकरणं प्रथमं समाप्तम्।

1.In the Ur text there are two readings (i) वरं and (ii)प्राज्यम्. Here the word परं is found more suitable in comparison with the former word (v.1) परमं गुरुं and the latter one गुरुम् (v.3). The T T has accepted the word परम्।

2. T T गतः; M T. गतम्।

3. TT प्रदीपकृतम्।, M T प्रदीपवत् ।

4. T T- मङ्गल ।

7.M T - दृष्टिसृष्टयाश्रयणात्।

8.T T - स हि।

9. T T - तस्मादात्मवर्धनतया।

10. T T - इत्थ।

11. T T - इत्थबुद्धेरधिकारिणो।

12. M T - स्वप्रभावं।

13. T T - यत्।

15. T T - हर्ता, M T - हर्ता।

16. M T - सृष्टाः।

17. M T - प्रेरितया।

18. M T - संगृह्य।

19. T T - स्वयमविदुषि।

20. T T - पार्षतेव।

21. T T - तत्संख्यकेव।

22. T T - वेदितव्यं।

23. T T - समर्थनेन।

24. T T - दिवि।

25. M T - मृदिति।

26. T T - प्रेरिकः।

27. M T - चतुर्विधः

28. M T - तन्महाध्नात्मदीपे।

29. M T - यं चाहमस्वाप्सं।

30. M T - नग्नौ।

31. M T - तत्सुख।

32. M T - भाव्यत्वाश्रयात्मादि।

33. M T - भावादि।

34. M T - तदनुभवसामग्र्या।

35. T T - यन्निद्रायामस्ति।

36. T T - प्रतीतौ।

37. M T - वृत्त ।

38. M T - श्रुत्त ।

39. T T - प्रत्यगात्मनः। M T - प्रत्यगात्मनः ।

40. T T - ततः ।

41. T T - उदयदृतरिक्तैः।

42. M T - पुटमिव।

43. M T - तत्रते।

44. M T - बंधकुम्भैः।

45. T T - दैवब्रह्मप्राधानिकादि।

46. M T - प्रधानावस्था ।

47. T T - शक्तिः। M T - शक्तिः।

48. T T - तस्मात्। M T - तस्मात्।

49. M T - कृतदेहोर्थ।

50. T T - विधाय।

51. M T - एतस्य।

52. T T - अपूर्वादिना।

53. T T - अभेदस्यापि।

54. M T - व्यायो तथा तस्य।

55. T T - महात्मनः। M T - महात्मनः।

56. M T - सदभिन्नं।

57. M T - सन्मयत्वेन।

58. T T - प्रन्ते। M T - प्रान्ते।

59. T T - जल्पस्य।

60. M T - महदहमस्मि।

61. M T - स्व।

62. M T - स्थूलसूक्ष्मादि।

63. M T - भूम्नो।

64. T T - स्वानन्दध्रुवे।

65. T T - पुरात्म।

66. T T - निरङ्कुशं।

67. T T - एकदैव।

चिद्विंशिकाप्रकरणम्

नमश्चिज्ज्योतिषे चित्त[1]त्र्यवस्थाचित्रभित्तये।
अनन्दाय निदानाय जगतां परमात्मने।।

अथ चिद्विं[2]शिका व्याख्यायते-

प्राक् सद्विंशिकायां देहादिभ्योऽन्यः त्र्यवस्था साक्षी दिक्कालाद्यनवाच्छिन्नः सद्रूपस्वात्मेत्युक्तम्। इह तु तस्यैव चिद्रूपत्वमुच्यते। तत्रात्मनो ज्योतिषां ज्योतिष्ट्वमाह-

मनो वचो लोचनभास्कराद्या
स्वगोचरं गोच[3]रयन्ति विश्वम्।
यद्भासितानैव तु यत्स्वरूपं
सानन्दसच्चित्सुखदेवताऽस्मि।। 1 ।।

मन आद्यन्तःकरणानि वागादिशब्दप्रमाणानि चक्षुरादीन्द्रियाणि तथा सूर्ये[4]न्द्वग्निविद्युदाद्याः बाह्यप्रकाशाश्च ययात्मदेवतया प्रकाशिताः सन्तः स्व[5]स्वविषयं विषयीकुर्वन्ति भासयन्ति यदनुग्रहं विना न भासयन्त्येव यस्यास्तु देवतायाः स्वरूपं न कदाचिदपि न भासयन्ति सा प्रागुक्तानन्तसद्रूपा वक्ष्यमाणसुखरूपा अत्रोच्यमानचिद्रूपा देवतादेवनाद्योतनादि गुणाः परमात्मलक्षणा 'सेऽयं देवतैक्षत' (छा.6.3.2) 'आत्मैव देवतास्सर्वाः' इति श्रुति मन्त्रोक्तिभ्याम् इहात्मचिदेव देवतयोक्ता सैवाहमस्मि चेत्यप्रकाशा चित्प्रकाशेन विना न स्वं परं वा प्रकाशयितुमलमित्यर्थः।

यन्मनसा न मनुते येनाहुर्मनो मतं।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। (के.1.6)

तथा

यद्वाचानभ्युदितं येन वागभ्युद्यते।

तदेव ब्रह्म त्वं विद्धि(के.1.5)

यः तथा

यच्चक्षुषा न पश्यति येन चक्षूँषि पश्यति।

तदेव ब्रह्म त्वं विद्धि ।।(के.1.7)

येन सूर्यस्तपतिः तेजसेद्धः तदेव ज्योतिषां ज्योतिः (तै.ब्रा.3.12.9.7)

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति।। (क.5.15)

इति श्रुतिभ्यः

यदादित्यगतं तेजो जगद्भासयतेऽखिलं।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं ।।

(गी.15.12)

इत्यादि गीतोक्तेः। आप्रकरणान्तं वक्ष्यमाणानुभवेभ्यश्च।

प्रत्यक् चैतन्यस्यैव दृष्टिसृष्टिन्यायेन जगतः कारणत्वं जन्माद्यवस्थात्रयाश्रयत्वेपि अविकारित्वञ्चाह-

समस्तवस्त्वेकनिदानभूता
तदीयभेदानुगतावभासा।
तदत्यये या विमलात्मसौख्या[6]
त्रिसृष्ट्यवस्था[7] स्वचलास्मि सा चित्।। 2 ।।

छान्दोग्ये हि सदेवेत्युपक्रम्य तदैक्षत बहु स्यां प्रजायेय

तत्तेजोऽसृजतेत्यादिना (छा.6.2.3) तत्त्वमस्यन्तेन (छा.6.8.7) बहु ऋचोपि आत्मा वा इदमित्युपक्रम्य स ईक्षत लोकान्नुसृजा[8] (ऐ.1.1.1) इति स इमाँल्लोकानसृजत (ऐ.1.1.2) इत्यादिना अवस्थात्रयस्वप्ना इत्यन्तेन मूलाविद्याविलसितस्य स्थूलस्य जाग्रत्प्रपञ्चस्य न तत्र रथाः न रथयोगा पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते (बृ.4.3.10) इत्यादि श्रुत्या सूक्ष्मस्य स्वप्नप्रपञ्चस्य चैका निदानभूता एका सती मायावशात् प्रकृतिनिमित्तादि सर्वकारणत्वेन दृष्टिसृष्टिन्यायेन सृष्ट्यादिहेतुत्वेन श्रुता तथा सृष्टस्य महाप्रपञ्चस्य वा अन्तरदेशेष्वनुप्रवेशादनुगतेव तत्प्रकाशनेन स्वयं प्रकाशमाना तस्योभयप्रपञ्चस्यात्यये सुषुप्तौ लये च यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं, एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं (बृ.4.3.21) यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तत्सुखमिति (छा.7.23.1) च अविद्यामात्रसाक्षितया निर्मलानन्दत्वेन च श्रुत्यैव जगतो जन्मस्थित्यन्तावस्थासु तदाश्रयत्वेन स्फुरन्त्यप्यचला अप्रच्युतस्वरूपा प्रत्यक् चित् सैवाहमस्मि।

आत्मनः कल्पितजागरादित्र्यवस्थाभाक्त्वेपि तदनुगत्या तुरीयत्वेनोपचरित कल्पितचित्त्वमेवेति त्रिश्लोक्याह-[9]

सत्ता समस्तेन्द्रियजागरेन्तः
स्वप्ने च या चित्प्रचुरा स चित्ता।
सुप्तौ सुखात्मा स्फुरदात्ममोहा
या तत्र तुर्यानुगतास्मि सा चित्॥ 3 ॥

समस्तानां चक्षुरादीन्द्रियाणां स्वविषयप्रवृत्तिलक्षणे जागरे तद्विषयाणां बाह्यार्थानामस्तित्वप्राचुर्येणानुभवात् तद्भासने सत्तारूपेण स्फुरन्ती तथा

स्वप्नावस्थायां अन्तःलिङ्गशरीरेऽभिमत्या स्थिता बाह्येन्द्रियाभावेपि तदनुभवसंस्कारे सचिव चित्तमात्रपरिकरा सती चित्प्रचुरा स्वप्नप्रपञ्चस्य जाग्रत् प्रपञ्चवत् व्यावहारिकसत्त्वाभावात् शुक्तिरजतवदनिर्वाच्यसत्तया ज्ञानमात्रशरीरत्वात् तदधिष्ठान रूपा संवित् चित्प्रचुरेति व्यपदिश्यते। सुषुप्तौ तु स्थूलसूक्ष्मविक्षेपद्वय- विरहादतिरस्कृतनिजानन्दा तदा मूलाज्ञानमात्रोपाधिका तत्साक्षिणी स्फुरन्त्येवं परस्परव्यभिचारि विश्वतैजसप्राज्ञाख्य तद्भोक्तृत्रिरूप वैलक्षण्येन तदवस्थात्रयानुगत तत्साक्षिभूतचिन्मात्ररूपतया निर्धारितत्वादुपचारात् तुर्यत्वेन तत्त्वविद्भिर्व्यावहार्या या चित् सैवाहमस्मि। तथा च तत्त्वविदग्रेसर श्रीगौडपादाचार्योक्तिः-

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः।
आकाशे च हृदि प्राज्ञः त्रिधा देहे व्यवस्थितः।।

(गौ.का.1.2)

तथा-

विश्वो हि स्थूलभूङ्नित्यं तैजसः प्रविविक्तभुक्।
आनन्दभुक् तथा प्राज्ञस्त्रिधा भोगं निबोधत।। (गौ.का.1.3)
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्त्तितः।
वेदैतदुभयं यस्तु स भूञ्जानो न लिप्यते।। (गौ.का.1.5)

श्रीमद्भगवत्पादाचार्यैश्च पञ्चीकरणाख्ये ग्रन्थे, पञ्चीकृतपञ्च-महाभूतानि तत्कार्यञ्च सर्वं विराडित्युच्यते। एतत्स्थूलशरीरमात्मनः। इन्द्रियैरर्थोपलब्धिर्जागरितम्। तदुभयाभिमान्यात्मा विश्वः। एतत् त्रयमकारः। अपञ्चीकृतपञ्चमहाभूतानि पञ्चतन्मात्राणि, तत्कार्यञ्च पञ्चप्राणाः, दशेन्द्रियाणि मनोबुद्धिश्चेति सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते।

एतत् सूक्ष्मशरीरमात्मनः। करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्न इत्युच्यते। तदुभयाभि- मान्यात्मा तैजसः। एतत् त्रयमुकारः। शरीरद्वयकारणमात्मज्ञानं साभासमव्याकृतमित्युच्यते। एतत् कारणशरीरमात्मनः। तच्च न सन्नासन्नापि सदसन्न भिन्नं नाभिन्नं नापि भिन्नाभिन्नं कुतश्चित्, न निरवयवं, न सावयवं नोभयं, किन्तु केवलब्रह्मात्मैकत्वज्ञानापनोद्यम्। सर्वप्रकारज्ञानोपसंहारे बुद्धेः कारणात्मना[10]वस्थानं सुषुप्तिः। तदुभयाभिमान्यात्मा प्राज्ञः। एतत् त्रयं मकारः। अकार उकारे, उकारो मकारे, मकार ओंकारे, ओंकारोऽहम्येव। अहमात्मा साक्षी केवलश्चिन्मात्रस्वरूपः, नाज्ञानं नापि तत्कार्यं किन्तु नित्यशुद्ध-बुद्धमुक्तसत्यस्वभावं परमानन्दमद्वयं प्रत्यग्भूतचैतन्यं ब्रह्मैवाहमस्मीत्यभेदेनावस्थानं समाधिः। तत्त्वमसि (छा.6.8.7) ब्रह्माहमस्मि (बृ.1.4.10) प्रज्ञानमानन्दं ब्रह्म (ऐ.3.3) अयमात्मा ब्रह्मेत्येवमादि (बृ.2.5.19) श्रुतिभ्यः।

तुरीयस्य वस्तुनः त्र्यवस्थासु करणादिव्यवधानात् निरपेक्षं साक्षित्वमित्याह-

अज्ञानतत्कार्य तदीयभेदा-
नध्यक्षयन्ती निजसत्तया या।
स्मर्तुं च विस्मर्तुमहो न शक्या
सुप्त्यादिषु स्वप्रभयास्मि सा चित्।। 4 ।।

सुप्तौ मूलाज्ञानं स्वप्ने तत्कार्यप्रथमाध्यासभूतं ज्ञानक्रियोभय-शक्त्यात्मकं ससूक्ष्मप्रपञ्चमन्तःकरणाख्यं अहङ्कारं जागरे तु अन्तःकरणकल्पिता तत्कार्यभूतभौतिकादिभावभेदान् करणादिनिरपेक्षं स्वसन्निधिसत्तामात्रेण साक्षात्कुर्वती इत्थं सुप्त्यादित्र्यवस्थासु अनुगता च।

अत एव स्वप्रकाशात्मनो द्रष्टुरव्यवहितात्मस्वरूपत्वात् विस्मर्तुं न शक्या।

द्रष्टुरन्यद्धि वस्तु अनुभवितुं स्मर्तुं विस्मर्तुं च शक्यान्न तद्द्रष्टैव स्वयं स्वेन विज्ञातारमरे केन वा विजानीयादिति (बृ.2.4.14) श्रुतेः। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते (बृ.4.3.23) इति श्रुतेः विस्मरणानवकाशादेव स्मर्तुञ्च न शक्या। अत एव स्मरणविस्मरण- योरगोचर आत्मैव न त्वन्यत् वस्तु लोकेऽस्ति। एतादृशमित्याश्चर्य- द्योतनोऽहो शब्दः। एवं विधा चित् सैवाहमस्मि।

या तत्र तुर्यानुगतास्मि सा चिदिति सूचितं चितः स्थायित्व-मवस्थानाञ्चान्योन्यव्यभिचारित्वं उदाहरति-

न जागरे स्वप्नसुषुप्तिभावौ
स्वप्नेपि नान्यौ न परौ[11] सुषुप्तौ[12]।
या द्योतयन्त्यस्पृशती त्रयन्तत्
सा चित् तुरीयेति सदा चकास्मि।। 5 ।।

यद्यपि जाग्रत्स्वप्नयोरज्ञानमन्यथाज्ञानञ्च समानं तथापि स्थूलप्रविविक्तभोगाख्यविपर्यासभेदात्तयोर्भेदं ततोस्ति व्यभिचारः। सुषुप्तौ तु तदुभयविपर्यासाभावादज्ञानाख्या निद्रैवेति ताभ्यां व्यभिचारः। तुरीये तु नाज्ञानं न च द्विधो विपर्यासः चिद्वेद्यत्वेन तद्वैलक्षण्यात् तेषां अतस्ताज्जाग्रदादित्रयमस्पृशन्ती चित् प्रकाशयति। तत्रितयोत्तीर्ण-रूपत्वोपाधिना तुरीयेऽप्युपचरित आवरणात्मकत्र्यवस्थाभासकतया स्वयमनावृता च या चित् सैवाहं अतः सदा प्रमाणान्तरमन्तरेण स्वयं स्फुरामि। अत्राहुर्गौडपादाः-

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः।। (गौ.का.1.14)

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः।

विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते।। (गौ.का.1.15)

नन्ववस्थात्रयसाधिका चिदेकैवेत्युक्तं तदयुक्तम्। घटज्ञानं पटज्ञानमित्यादि ज्ञानभेददर्शनादित्याशङ्क्याह-

या स्तम्भकुम्भानुभवादिभेदैः

तदन्यथासिद्धतया न लिप्ता।

अनन्यतः सिद्धदृगेकरूपा

वापीष्विवेन्दुर्विभिदास्मि सा चित्।। 6 ।।

स्ताम्भानुभवः कुम्भानुभवः आदि शब्दात् स्तम्भस्मृतिः कुम्भस्मृतिरित्यादिज्ञाने व्यवह्रियमाणैः भेदैः चिन्न लिप्यते वस्तुतो न लिप्यते[13] कुतस्तदन्यथासिद्धतया तेषां व्यपह्रियमाणानां ज्ञानभेदानामन्यथा सिद्धत्वात् ज्ञाननिरूपणहेतुत्वेन तद्विशेषणीभूतविषयगताकार- भेदनिबन्धनतया अन्यथासिद्धे ज्ञाने प्रतीयमाने हि भेदव्यवहारो विविधज्ञेयभेदहेतुको निर्वाच्यो न वास्तवः। कुत एतदित्याह - अनन्यतः सिद्धदृगेकरूपेति। स्वतस्सिद्धा हि दृक् सा च दृक्त्वेनैवैकरूपा स्वप्रकाशतया अत एव असंगायां दृशि वास्तवभेदग्राहक- प्रमाणाभावस्योक्तत्वात् अभेदतया सिद्धे वस्तुनि प्रतीयमानो भेदः परोपाधिकृत इत्यत्र दृष्टान्तो- वापीष्विवेन्दुरिति। एवं स्वतः सिद्धा निर्भेदा च चित् सैवाहमस्मि। एक एव महानात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत् इत्याथर्वणश्रुतेः (अ.3.12)। आकाशमेकं यद् हि यथा घटादिषु पृथक्भवेत् तथात्मैको ह्यनेकश्च जलधारेष्विवांशुमानिति याज्ञवलक्यस्मृतेः। विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं (वि.पु.2.12.43) इत्यादि वैष्णवोक्तेश्च। आत्मनो ज्ञानत्वं ज्ञानस्य च कल्पितभेदत्त्वं वास्तवेनाद्वैतत्वञ्च सिद्धम्।

यथा दृशो दृक् न भिद्यते तथा दृश्यमपीत्याह-

दृश्यं च भिद्येत न दृक्स्वरूपात्
अनन्यभानं[14] हि यथा दृगेव।
इत्थं च दृश्यस्य यथैकरस्यं
सैवास्मि संवित् सतता द्वितीया।। 7 ।।

दृश्यं च दृक्स्वरूपात् न भिद्यते। कुतः तद्दृश्यं दृगनन्यभानं हि यस्मात् दृगितरत्र भानं विनैव भासमानत्वात्। यद्वस्तु दृश इतरेण भासते न विना भाति तद्दृशो न भिद्यते। यथा दृश एव स्वरूपं दृश्यञ्चैवं भाति अतो दृगभिन्नम्। इन्थमनुमानानुगृहीताया आत्मनः प्रज्ञानघनत्वं प्रतिपाद्य ऐतदात्म्यमिदं सर्वं तत्सत्यमिति (छा.6.8.7) बोधयन्त्या श्रुतेः, ततो हि शैलाब्धिधरादिभेदात् ज्ञानी हि विज्ञानविजृंभितानि (वि.पु.2.12.39) इति बैष्णवोक्तेश्च। दृश्यस्य यथा संविदैकत्वं सा प्रपञ्चव्यवहारकालेपि अद्वितीया संविदेवाहमस्मि।

अतो अर्थात् युक्त्यन्तरेभ्यश्च दृश्यानामपि मिथो भेदो मिथ्यैवेत्याह-

भेदेऽधिके स्वाश्रयतानवस्थे
स चेत्स्वरूपं प्रतियोगिना किम्।
स्वभेदिता चेति न यत्र भेदो
भूतेषु[15] दृश्येष्वपि साऽस्मि संवित्।। 8 ।।

घटपटौ भिन्नावित्यत्र योऽयं भेदः स किं भेद्यधर्मिभ्यां[16] भिन्नः ताभ्यामधिकोऽतिरिक्तो धर्मोऽभ्युपेयते उत अनतिरिक्तः तयोः स्वरूपमेवेति विकल्प्य आद्ये पक्षे दूषणान्याह भेदेऽधिके स्वाश्रयतानवस्थेति। अधिके भेदे भेद्यधर्मिभ्यामतिरिक्ते धर्मेऽभ्युपेते सति धर्मिणो भेद्यात् घटात् भिन्नो धर्मो भेदक इत्यभ्युपेतः स्यात्। तस्य च धर्मस्य धर्मिणो भिन्नत्वं स्वेन वा भेदान्तरेण

वा, स्वेन चेत् स्वस्यैव भेद्यत्वं भेदकत्वञ्चे-ऽत्यात्माश्रयता दोषः। भेदान्तरेण चेत् तस्यापि भिन्नत्वमस्मिन्नायत्तं अस्य च तस्मिन्निति अन्योन्याश्रयदोषः। तृतीयं भेदान्तरं चेत् चक्रकाख्यो दोषः। चतुर्थाभ्युपगमे अनवस्था चेति इत्यात्माश्रयानवस्थाभ्यां तदुभयान्तराळगावन्योन्याश्रयचक्रकाख्यौ च दोषौ संगृहीतौ ज्ञेयौ। द्वितीयं पक्षं दूषयति - स चेत्स्वरूपं प्रतियोगिना किमिति। स भेदो भेद्यस्य घटस्य स्वरूपमेवेति चेत् प्रतियोग्यपेक्षया विनैव प्रतीयेत अयं घट इति स्वरूपप्रतीताविव न च तथा प्रतीयते। अयं घटः पटात् भिन्न इति प्रतियोग्यपेक्षः अतो न तत्स्वरूपं भेदः। किञ्च स्वरूपभेदपक्षे स्वभेदितेति दूषणान्तरञ्च स्यात्। स्वरूपस्यैव हि भेदहेतुत्वे घटस्य पटादिव स्वस्मादपि स्वस्य भेदः स्यादिति स्वभेदिता न भेदो वस्तुनो रूपं तदभावप्रसंग इति मण्डनाचार्याः। तस्मान्न स्वरूपं नापि धर्मो भेदः इत्थन्निरूपणायोग्यतया यस्यां संविदि तत्प्रतीतेषु दृश्येष्वपि भेदो मिथ्यैव सा संविदस्मि। अनेन अन्योन्याभावो भेद इति पक्षोऽपि अन्योन्याश्रयदोषान्निरस्तो ज्ञेयः। एवं द्वित्वादिसंख्योत्पत्तिर्न्निरास्य घटपटावित्यत्र हि घटोऽप्येकः पटोऽप्येकः अतः पृथक् द्वित्वं जनयितुमलम्। किन्तु तद्गते द्वे एकत्वे अपेक्ष्यैकापेक्षाबुद्धिरात्मनि जायते। तया समवायिकारणभूतया द्वित्वोत्पत्तिरिति तार्किका आहुः। तत्र द्वे एकत्वे इत्यत्र द्वित्वस्याद्याप्यसिद्धौ कल्पनाद्वित्वञ्चेदाश्रित्य द्वित्वं स्यात्। तदा द्वित्वादि सर्वं कल्पितमेवेत्युक्तं स्यात्। अतो ब्रह्मणि द्वित्वापेक्षमेकत्वं च नास्ति। एकत्वमपि नास्त्येव द्वित्वं तत्र कुतस्त्वहो इति लैङ्गाद्युक्तेश्च सर्वं सुस्थम्। ज्ञानं यथा सत्यमसत्यमन्यत् अद्वैतं परमार्थो हि द्वैतिनो तथ्यदर्शिनः इत्यादि वैष्णवोक्तेश्चायमर्थः सिद्धः।

प्राक् त्रिश्लोक्या दृशो दृग् दृश्ययोः दृश्यानाञ्च मिथो भेदानुपपत्तेः

दृगद्वितीयेत्युक्तं सम्प्रति तु दृगधिष्ठानत्वाच्च दृश्यानां तदव्यतिरेक इत्याह-[17]

प्रज्ञानतो लब्धभवप्रतिष्ठः

प्रज्ञाननेत्रः सकलो हि लोकः।

ज्ञानं परं ब्रह्म यदेकरूपं

विवर्त्तते विश्वतया तदस्मि।। 9 ।।

सर्वो लोको हि यस्मात् प्रज्ञानरूपादात्मनः सकाशात् लब्धजन्मलयः प्रज्ञाननेत्रन्नेतृगमकं स्थापकं चास्येति प्रज्ञाननेत्रश्च लोकः यच्चास्य कारणं ब्रह्म तच्च ज्ञानतयैकरूपमेव स्यात् जगद्रूपेण विवर्त्तते विजृंभते। विवर्त्तो हि नाम स्वरूपमत्यजत एवाधिष्ठानस्य स्वविरोध्याकारेणावभासः। यथा रज्जोः सर्पत्वावभास इति वेदान्तिनः।[18] परिणामस्तूपादानस्य स्वाकारपरित्यागेन[19] विरोध्याकारान्तरापत्तिः। यथा मृदो घटत्वापत्तिरिति सांख्याद्याः। आरम्भस्वल्पपरिमाणैरनेकैः।[20] समवायिकारणैः महापरिमाणस्यैकस्य कार्यस्य प्रागसत एव सतो संबन्धेनोत्पादनं यथा परमाणुभिः द्व्यणुकादि प्रक्रमेण घटादिकार्यारम्भ इति तार्किकाद्याः। अत्र तु विवर्त्ता एव पक्षः बहुत्रश्चोपनिषदि कोऽयमात्मेत्युपक्रम्य यत्किञ्चेदं प्राणि जंगमं च पतत्रिः च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम्। प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेत्युक्तम् (ऐ.3.3)। जगत् हेतुत्वं स्वप्रकाशे ज्ञाने स्फुरतो विश्वस्य दृश्यस्य तद् विवर्त्तत्वं विना न घटते। अतो यदित्थं जगद्विवर्त्तं ज्ञानात्मकं ब्रह्म तदेवाहमस्मि। उक्तश्चितश्चेत्यहेतुत्वं रूपयन् अधिष्ठानत्वं द्रष्ट्रत्वं च आत्मन एवेत्याह-

चिदात्मभित्तौ निजचेत्यचित्र

लीलारसैरञ्जितचित्तकूल्या।[21]

या निर्मलोन्मीलयति स्वतन्त्रा[22]

23
निमीलयत्यप्यदृश्यास्म्यहं सा।। 10 ।।

या चित् स्वरूपभित्तौ सोऽकामयत बहु स्यां प्रजायेय (तै.2.6) इत्यादि श्रुतिसिद्धैः लीलारूपैर्रसैरिच्छाद्रवैरञ्चितोपरक्तया लिप्तया वा प्रथमविवर्त्तभूताहंकारात्मकचित्तवर्त्तितया स्वदृश्यं व्योमादिजगच्चित्र-मुन्मीलयति। चित्रास्य नेत्रोन्मीलनान्तानिष्पत्तिकत्वात् लक्षणया समाधिपदप्रयोगोयं अवभासयति सृजतीत्यर्थः। स्वप्नदृश्यस्येव हि दृष्टिरेव सृष्टिः तथा अदृशा निमीलयति च तच्चित्रं अदर्शनेन तिरोभावयति दृश्यस्य ह्यदर्शनमेव च संहारः सुषुप्तिवदित्यर्थः। यदा स देवो जागर्ति तथैवञ्चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वन्निमीलति इति मानवस्मृतेः। एवं यदीयशक्त्युन्मेषनिमेषाख्ये जागरनिद्रे जगतः सृष्टिलयौ सैवाहमद्वितीया संविदस्मि।

परदृष्ट्या दृष्टस्य विश्वस्य प्रत्यक् दृष्ट्या लय इत्याह-

हृद्व्योमनि स्वात्मनि भूम[24]भान
सुधार्णवैकार्णवितप्रपञ्चे।
सत्ताधने यत्र न दृश्यमन्यत्
अनन्तरूपं तदहम्महोऽस्मि ।। 11 ।।

अस्य लोकस्य का गतिरित्याकश इति होवच (छा.1.9.1) आकाशो वै नामरूपयोर्निर्वहिता यावान् अयमाकाशः तावानेषो अन्तर्हृदय आकाश (छा.8.14.1) इत्यादि श्रुतिसिद्धैः सूक्ष्मतया सर्वान्तरतया हृदये अभिव्यज्यमानतया च हृदयाकाशाख्ये सान्द्रे पूर्णसन्मात्रे यत्र प्रत्यगात्मनि यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति (छा.7.23.1) भूमविद्यासिद्धेन स्वमहत्वाविर्भावरूपेणामृतार्णवेन दृश्यप्रपञ्चे एकार्णवीकृते अत्यन्तं प्रलयं प्रापिते सति दृश्यमन्यत् न दृश्यते। दृश्यते चेदात्मनोऽनन्यभूतं स दृश्यते

तदन्तः तेजोहमस्मि। यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येदित्यादि (बृ.4.5.15) श्रुतेः।

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति।

एकीभूतः परेणासौ तदा भवति केवलः ।। (ईश्व.2.2.32)

इति ईश्वरगीतोक्तेश। जाग्रत्प्रत्ययेन स्वप्नप्रपञ्चस्येव आत्माज्ञानज- प्रपञ्चस्य आत्मदृष्ट्या लय इत्यर्थः।

द्विश्लोक्योक्तमर्थं सांख्यतन्त्ररीत्या च प्रपञ्चयति-

सिसृक्षयोन्मीलितधीविशेष-

संभावनोज्जृम्भित सर्वतत्त्वा।

या साम्यधीनिह्नुततत्प्रपञ्चा

सा चिद्विचित्राद्भुतशक्तिरस्मि ।। 12 ।।

त्रिगुणसाम्यावस्थात्मकमायाशक्तेः सत्वांशजो रजोधिक-चिदनुगृहीतः प्रथमो विकार ईक्षणाख्यसिसृक्षा तयोन्मीलित-गुणवैषम्यविषयः

प्रधानपुरुषौ चापि प्रविश्यात्मेच्छया हरिः।

क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ ।। (वि.पु.1.2.29)

इति वैष्णवोक्तेः। प्रधानपुरुषक्षोभणलक्षणो यो धीविशेषः तस्य संभावना[25] व्योमादिकार्यधीरुपेण विस्तृतिस्तथैव उज्जंभितान्युद्भूतानि भूम्यन्ततत्त्वानि यया तया तमोधिकसंजिहीर्षोत्पन्नया गुणसाम्यात्मक मूलावस्थाविषयया धिया निह्नुतः संक्षिप्तः। प्रलये मोक्षे तु शुद्धसत्त्वमय्या समरसीभावानुभावात्मक ब्रह्मविद्यानुरूपया साम्यधिया आत्यन्तिकं विलापितः प्रपञ्चो यया 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति (श्वे.6.8) श्रुतिसिद्धविविधाश्चर्याकारपरशक्तिका सा परा संविदस्मि।

ईदृशं संविदं समुद्रत्वेन रूपयति-

या स्वात्मलीलालहरीजतत्त्व-

तरंगसंघट्टजबुद्बुदाभैः।

ब्रह्माण्डषण्डैरधिकाम्बुधि श्रीः

सा संविदस्मि श्रुतिसोमसूतिः।। 13 ।।

यस्यास्संविदः स्वात्मभूता लीला या स्वप्रयोजनाननुसन्धानपूर्विका प्रभुचेष्टा लीलेव लीला तस्या आत्मभूतत्वं माययैव नान्यथेति मायां लक्षयति आत्मन्यध्यस्तया मायया वायुनेव जाता लीलात्मिका लहरी सानिलवेगा महोर्मिपङ्क्तिस्तया महदादितत्त्वरूपा स्वल्पतरंगा स्युः। तेषां मिथो मेलनविशेषः संघट्टः तेन जातानि बुद्बुदानीव ब्रह्माण्डषण्डानि तैरधिका समुद्रशोभा यस्याः सा तत्र श्रुतिरेव सर्वार्थप्रकाशकत्वात् जगदुपजीव्यत्वाच्च सोमवत् सोमस्तस्य माया सात्त्विकांशजन्योत्पत्तिस्थानमधिष्ठानञ्च सैव संवित् वेदास्तदनुबन्धि च ज्ञापकं शास्त्रं सात्त्विकं वेदाविरुद्धमुपासनातन्त्रादि राजसं वेदविरुद्धं व्यामोहकं बाह्यागमादितामसीत्यर्थाद्युक्तं स्यात्। एवं विधा जगज्जन्मादिकारणं शास्त्रयोनिश्च संवित् सैवाहमस्मि। तत्र श्रुतिः तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतत् ऋग्वेदो यजुर्वेद (बृ.2.4.10) इत्यादि श्रुतिः पूर्वकल्पसमुत्पन्नशब्दसंस्कृतमायया सत्त्वांशेन समस्तार्थद्योतकेनतटित् समा। श्रुतिरासीद् यथा अन्याभ्यां तत्र शास्त्रविवर्त्तनमिति ब्रह्मवैवर्तवचनञ्च।

एषैव चिदब्धिरूपास्ति तारतम्ये तत्तदैश्वर्याणि मुक्तिं च यच्छतीत्याह-

अतर्किताश्चर्यनिधौ[26] चिदब्धौ

उपेत्य योगैर्विबुधास्तटस्थाः[27]।

षडंगषाड्गुण्यमणीलँल्लभन्ते

यस्मिन्निमज्यामृतमेव सोऽस्मि ।। 14 ।।

तर्को गोचरणां सर्वाश्चर्यभूतमायादिशक्तिना निधानभूते यस्मिन् प्रागुक्ते चिदब्धौ विबुधा देवा विद्वांसश्च कर्मभक्तिज्ञानयोगैरुपायैः अब्धितटासन्नं गाधप्रदेशमुपेत्य

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च[28] विभोर्विदित्वा
षडाहुरङ्गानि महेश्वरस्य ।। (कू.पु.2.8.13)

इतीश्वरगीताद्युक्त षटेगात्मकाः तथा ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसीति (वि.पु.6.5.79) वैष्णवोक्तषट्गुणात्मकाश्च मणीन् लभन्ते। यस्मिन्नेवान्तर्निमज्ज्य स्वाविद्यातत्कार्योपाधिकभेदप्रहाणेन एकीभूयामृतं परमनिर्वाणमेव लभन्ते। सा चिदब्धिरेव अहमस्मि। योगिनः सकामाश्चेत् शिवविष्ण्वादिलक्षणस्य सगुणस्य ब्रह्मण उपासया योगविशेषैः सालोक्य सामीप्य सायूज्यादिकमैश्वर्यं फलं लभन्ते। निष्कामाश्चेत् शुद्धब्रह्मणि लीलामुक्तिलक्षणं

यत्तत् सर्वगतं दिव्यमैश्वर्यमतुलम्महत्।
ज्ञानयोगाभियुक्तस्तु देहान्ते च तदाप्नुयात् ।। (ईश्व.2.2.44)

इतीश्वरगीतं फलं परमामृताख्यं परमनिर्वाणं विदेहकैवल्यं अत्र ब्रह्म समश्नुते तमेवं विद्वानमृत इह भवति (बृ.4.4.9) इति श्रुत्युक्त- जीवन्मुक्तिपूर्वकमेव लभन्ते। अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीत्यादि(छा.3. 4.1)श्रुतेः।

सगुणे निर्गुणे वा ब्रह्मणि चित्तप्रवेशात् तद्भावापत्तिरित्याह -

लोकाब्जमूले क्षणकांक्षया वा
देहाद्यरत्याप्युत[29] दैवगत्या।

विगाह्य यत्रैति ययैकरस्यं

रुमासु पुष्पादि यथास्मि सा चित् ।। 15 ।।

लोक एवाब्जं तस्य मूलं कारणं तस्येक्षणकांक्षया तज्जिज्ञासया यथा श्वेताश्वतरतलवकाराणां उपनिषदारम्भयोः किं कारणं ब्रह्म कुतः स्म जाता इति केनेषितं पतति प्रेषितं मनः इति बैष्णवादेरारम्भावसाने च यथा जगत् बभूव। आत्मनो ब्रह्मणो भेदमनन्तं तं करिष्यतीत्येव जगत्कारणजिज्ञासिते तज्जगत्कारणं ब्रह्मैवात्मत्वेन ज्ञातं मोक्षाय च स्यात्। भाग्यवतां तथा देहादिदुःखहेतुवैराग्येण दुःखनिवर्तक- हेतुजिज्ञासायां तरति शोकमात्मवित् (छा.7.1.3) भेजषं भगवत्प्राप्तिरिति श्रुतिस्मृतिभ्यां ब्रह्मण्येव रतिः स्थितिश्च भाग्यवतां स्यात्। तथा दैवगत्या इह जन्मनि जिज्ञासावैराग्यादि दृष्टकारणाभावेपि प्राचीनकर्मजन्मकृतज्ञानप्रदसुकृतपरिपाकवशादेव कस्यचिदनर्थोच्चारित ब्रह्मात्मैक्यप्रतिपादकवाक्यश्रवणादिवशात् ब्रह्मानुभवादयो जायन्ते। यथाहुः विश्वरूपाचार्याः - वाक्यश्रवणमात्रेण पिशाचकवदाप्नुयात्। श्रुतिवाक्यश्रुतेश्चान्यं स्मर्यते च वचो परः।। एवं निष्कले सकलेपि ब्रह्मणि सायूज्यं भाग्यवता दृष्टम्।

गोप्यः कामाद्भयात्कंसो द्वेषाच्चेद्यादयो नृपाः।

संबन्धात् वृष्टयः स्नेहाद्यूयं भक्त्या वयं प्रभो ।। (भा.पु.7.1.80)

इति भागवते युधिष्ठिरं प्रति नारदोक्तेः। यथा कस्मिञ्चिदगाधे महाह्रदे तदुत्पन्नारविन्दकन्ददिदृक्षुः वा कुष्ठादिदुष्टदेहजिहासया मुमुक्षुर्वा कार्यान्तरार्थं वेगेन गच्छन् अनिच्छया पिच्छिलितात् शिलादेः स्खलितचरणः तत् ह्रदे विगाह्य पुनर्नोत्तिष्ठति नरः। एवं येनकेनापि निमित्तेन ब्रह्मणि चित्तद्वारात्मनः प्रवेशे ध्याता ब्रह्मैव स्यात्। वस्तुस्वाभाव्यात् आत्मभावन्नयत्येनं तत् ब्रह्मध्यायिनं मुने इति वैष्णवोक्तेः तदैकरस्ये दृष्टान्तो रुमालवणाकरः। तत्र निष्पतितं

पुष्पाद्यापि लवणमेव स्यात्। उक्तञ्च अनुभवसाहस्र्यां भगवत्पादैः -

पुष्पतृणादि तथेव रुमायां संपतितं लवणत्वमुपैति।
चेतनतामुपायाति समस्तव्यस्तमिदं परमात्मनि तद्वत् ॥

एवं विधा चित् सैवाहमस्मि।

पूर्वश्लोकैरुपासकस्यात्मनो मायावृत्तिमभ्युपेत्य ब्रह्मोपासनादिना तद्भावापत्तिरित्युक्तम्। सम्प्रति तु वास्तवमायावरणं तस्य नास्तीत्याह-

यस्याः स्वमायास्थगनाय नालं
राकाशशाङ्कस्य यथा कलङ्कः।
प्रकाशयेत्प्रत्युत या स्वमाया
स्वतेजसानावृतिरस्मि सा चित् ॥ 16 ॥

स्वमाया स्वविषया स्वाश्रया चाविद्या तेन मामहन्नजानामि इत्याद्यज्ञानं यस्याः स्वात्मभूतसंविदः छादनाय न समर्थं तच्छादितस्वाश्रयत्वे हि आत्मनो मामहमिति विषयाश्रयत्वेन द्विधोद्देशो न स्यात्। स्वाज्ञानेपि यदज्ञानं तज्ज्ञानं संप्रचक्षत इति न्यायात् अविद्या न केवलं स्वात्मानं प्रकाशीकरोति। किन्तु आत्मनस्तेजसा प्रकाशीकृता सती प्रकाशव्यवहारं लभते। मां न जनामीत्यज्ञानस्यापि सविषयस्य प्रकाशमानत्वानुभवात् तत्र च तामाश्रित्य भानेपि तदनाछादने प्रत्युत तत्प्रकाश्यत्वेन च दृष्टान्तः पूर्णचन्द्रस्य कलङ्कः। स हि चन्द्रे असन्नस्पृशन्नपि प्रतिबिम्बात्मा तत्र प्रकाशते परम्। एतद्वा इदममुष्यां देवयजनमदधात् यदेतच्चन्द्रमसि कृष्णमिवेति श्रुतेः। लोकच्छायामयं लक्ष्मेति हरिवंशभीष्मपर्वोक्तेश्च। एवं विधानावृता चित् सैवाहमस्मि।

एवमविद्येव तत्कार्यं दृश्यञ्च विश्वन्नाच्छादकं प्रत्युत चितः सन्निधे ज्ञानात्मकञ्चेत्याह-

प्रकाशते चेज्जडतास्य का स्यात्

जडस्य न स्यात् स्फुरणं यतोऽतः।

ज्ञानात्मकं विश्वमिदं यदात्मा

स्फुरद्यथा ज्ञानमहं तदस्मि ।। 17 ।।

-विश्वं जगत्प्रकाशते न वेति विकल्प्य द्वितीये पक्षे जडमिदमिति व्यवहार एव न स्यात्। अभिज्ञाधीनत्वत् तदितरव्यवहाराणां अभिवदनहानोपादानाख्यानामित्यर्थं द्वितीयं दूषयित्वां आद्यं दुष्यते विश्वमिदं प्रकाशते चेदस्य विश्वस्य अत्यन्तसुषुप्ततालक्षणं जाडयं किं स्यात्। ज्ञानस्यैवास्य प्रकाशमानत्वादेव जाड्यन्नास्ति। यथा अग्निना काष्ठस्य ज्वलनत्वं जलेन च भूमेरार्द्रत्वं तथा संवित्संबन्धात् जडस्य प्रकाशीभाव इत्यर्थः। विपक्षे बाधकमाह - जडस्य न स्यात् स्फुरणं यतोत इति। अतो यस्मादुक्तहेतोः स्फुरदिदं विश्वं ज्ञानस्वभावमेव। तत्र दृष्टान्तो यथेति। यथा ज्ञानं ज्ञानात्मकमेव स्फुरति एवं विश्वं च ज्ञानात्मकं स्फुरदित्यर्थः। तच्च ज्ञानं सर्वेषां आत्मा।

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते।

ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम्।। (वि.पु.2.6.50)

विद्याऽविद्या च मैत्रेय ज्ञानमेवोपधारय। (वि.पु.2.6.51) इति वैष्णवोक्तेः यदीदृशं ज्ञानं तदेवाहमस्मि।

अत एकैव संवित् सत्त्वादित्रिगुणोपाधिवशात् ज्ञातृज्ञान-ज्ञेयात्मकत्रिपुटीत्वेन भाति इत्याह-

स्वसिद्धिसिद्धत्रिपुटीमयेस्मि -

न्नक्षार्थयोगोन्मथनेन तत्स्थम्।

आविर्भवज्योतिरनावृतं या

सा संविदस्मि त्रिगुणोपधाना ।। 18 ।।

स्वस्य आत्मभूतायाः संविदः सिद्‌ध्या सन्निधिसत्तामात्रेणैव सिद्धा स्फुरन्ति स्वज्ञातात्मा सिद्धिबुद्धिवृत्तिरूपं क्रियाज्ञान[30]मसिद्धो ज्ञातो विषयः इत्येवं रूपाया ज्ञातृज्ञानज्ञेयात्मिका त्रिपुटीपुटं पूर्णपुटादिवत् सन्निवेशविशेषास्तादृशी संविदुपलब्धिस्थानवस्तुत्रयी तत्राक्षाणीन्द्रियाणि अर्थाः विषयाः तेषां अग्निगर्भारणिकाष्ठानामिव योगो यो मिथः संबधः तेन तदुन्मथनं तत्तद्विषयाकारपरिणतमायावच्छिन्नचैतन्यावरणतमोंशापनयनं तेन तत्स्थं तत्तद्वद्विषयावच्छेदेन तदश्रितमिवाविर्भवत् व्यवहारयोग्यतया स्फुरज्ज्योतिः तस्मात्तज्ज्योतिषो भेदेन तत् त्रितयमपि नास्ति। तद्‌भास्यत्वात् या तादृक् ज्योतिस्वभावानावृता च नित्या[31]नावृताया अपि विषयावच्छेदनिर्वाहे हेतूक्तिः- त्रिगुणोपाधानेति। सत्त्वं ह्यन्तःकरणं ज्ञातृत्वे रजोन्तःकरणपरिणामो ज्ञानत्वे तमस्तु वेद्यैकस्वभावं विषयत्वे संविदो निर्वाहकमिति प्रतिकर्मव्यवस्था चात्र सूचिता ज्ञेया। संविदो ह्यन्तःकरणावच्छेदेन ज्ञातृत्वं विषयगोचरान्तःकरणावच्छेदेन ज्ञानत्वं तदपनोद्याविद्यावच्छेदेन विषयत्वं तद्विषयावच्छिन्नं तत्प्रकाशाकारेण ज्ञानफलानुभवरूपत्वं तत् त्रितयसाधकं अहमिदं जानामीति त्रितयाकारपरिणतया अन्तःकरणवृत्तित्रयस्य फलसंविदेकभास्यत्वात्। अतः सा वृत्तित्रयी स्वाकारसंस्कारमहङ्कारात्मनि समर्प्य नश्यति तेनानुभवो व्यञ्जकाभावान्नष्ट इव स्यात्। अतो नित्यत्वात् साक्षिसंविदो अर्थयोगाभावेपि मुद्रामुद्रप्रतिमुद्रा न्यायेन आत्मनि संस्कारोद्‌बोधस्मृतिश्चोपपन्ना वृत्यान्तरैर्विरोधे विस्मृतिश्चेति मत्त स्मृतिर्ज्ञानमपोहनञ्च वेत्तासि वेद्यञ्च परञ्चधामेति गीतोक्तिभ्यां ज्ञातृज्ञानज्ञेयविहीनोपि सदा अज्ञ इति शङ्कराचार्योक्तेश्च। एवं विधा संविद् साहमस्मि।

एकैव संविद् त्रिपुटीत्वेन भातीत्यत्र दृष्टान्तमाह-

33

व्योमेव रंभात्वचि चित्रभंग्या-

नेकव्यवस्था व्यवहारहेतुः।

मानीकृतादर्शनवादिभिर्या

सा सर्वसद्भाव पदञ्चिदस्मि ।। 19 ।।

यथैकमपि गगनं कदलीकाण्डत्त्वविचित्रपत्रभंगीरचनया विचित्रकैः तत्तद्वाहनायुधधारक देवताप्रतिमाप्रासादप्रकाराद्याकारैः छिद्रीकृतायं तत्तदाकारोपाधिकदलीत्वभङ्गवशात् बहुधा वाहनवह्यद्यादिभेदभागिव भवति। तथा एकैव संविद् सत्त्वादित्रिगुणोपाधिवशात् प्रमातृप्रमाणप्रमेयादि भावेन भाति। तथा तदभिव्यञ्जकबुद्ध्युत्पादकचक्षुरादिवशात् प्रत्यक्षादि प्रमाणभेदकात्मापन्ना श्रुत्यादिकल्पितविकल्पवशेन च अश्वा गावः पुरुषा हस्तिन इत्यादि जातिभेदानां तथा वर्णाश्रमादीनां अभिज्ञादि व्यवहाराणां च हेतुः स्यात्। अतोऽन्तःकरणस्थाविद्याकामकर्मादिवृत्तिभेदात् मतभेद इत्याह - मानीकृतादर्शनवादिभिर्येति। स्वस्वानुभवानुरूपं हि तत्र तत्रार्थे दृष्टे तथा तथा दृष्टत्वादेव ससोर्थोऽस्तीति दृष्टमेव प्रमाणयन्ति। तत्तद्दर्शनाख्यमीमांसादिशास्त्रनिर्वाहकाभिमानिनो वादिनः तदुक्तं इदं प्राश्निकमुद्दिश्य तर्कज्वरभृशातुराः त्वक्छिरस्कवचो जालैः मोहयन्तीतरेतरं विमलचित्तैस्त्वेकैव संविदात्मैवेत्यनुभूयत इत्यर्थः।

सितनीलादिभेदेन यथैकं दृश्यते नभः।

भ्रान्तदृष्टिभिरात्माऽपि तथैकस्सान् पृथक् पृथक्।। (वि.पु.2.16.22)

अक्षिणेषु समस्तेषु विशेषज्ञानकर्मसु।

विश्वमेतत्परञ्चान्यत् भेदभिन्नदृशा नृणाम् ।। (वि.पु.6.7.52)

यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्त दोषम्।

तथाहि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः। (वि.पु.2.12.40) इत्यादि वैष्णवोक्तेः। एवं विधा संविदेव हि भगवतीविषयसत्वोपगमे शरणं सैवाहमस्मीत्याह। सा सर्वसद्भाव-पदञ्चिदस्मीति। अतः सर्वस्याधिष्ठानम्मानञ्च संविद् सैवाहमस्मीति सिद्धम्।

अनुसन्धानसौकर्यार्थं विंशिकार्थं संगृह्याह-

अनावृतानन्यमहाविभूति-
रतीत दिक्काल कलाकलापा।
असीम भूमामृतचन्द्रिका या
सानन्तसच्चित्सुखदेवताऽस्मि ।। 20 ।।

या प्रकृतिमहदादिभिरनावृता अत एव तत्कार्याणां दिक्कालादीनामवच्छेदकभागानां वर्गमतीता अत एव स्वात्मभूतया महाविभूत्याख्यया जगत्कारणत्वावस्थया च एकीभूता अनावृतघनज्योत्स्नानिमग्नैश्वर्य- ताण्डवेति लक्ष्मीधराचार्यैरनुभवपञ्चाशिकायां उक्तम्। अतो निरालम्बचित् गगनभूता निस्सीमभूमाख्या परमसुखात्मकतया शान्तरूपप्रकाशतया च चन्द्रिकोपमिता प्राग्विंशिकोक्त सद्रूपा अनन्तरानन्दविंशिका वक्ष्यमाण सुखरूपा च परा देवता सेयं देवतैक्षतेति (छा.6.3.2) श्रुतिप्रतिपादिता सकलावरणातीत निरालम्बनभावनमहाविभूतिसंस्थाननमस्ते पुरुषोत्तमेति विष्णुपुराणोक्तम्।

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्र मूर्तये।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे।।

इति षट्धातुसमीक्षोक्ता सा चैवाहमस्मीति सिद्धम्। इति।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।
स्वात्मयोगप्रदीपे चिद्विंशिकां स्वां द्वितीयकाम्।।

इति स्वात्मयोगप्रदीपप्रबोधिन्यां अमरानन्दयोगीश्वरकृतौ चिद्विंशिकाप्रकरणं

द्वितीयम्।।

1. M T - व्यवस्था।

2. M T - चिद्विंशतिका।

3. T T - गोचरन्ति।

4. T T - सूर्येन्दुवह्नि।

5. T T - स्वविषयं।

6. T T - विमलातिसौख्या।

7. M T - तिसृष्टावस्था।

8. M T - त्रयावस्था स्वप्ना।

9. M T - जागरेन्द्रः।

10. M T - कारणावस्थानं।

11. M T - परेन।

12. M T - सुषुप्तेन।

13. M T - न भिद्यते।

13. M T - न भिद्यते।

15. T T - भातेषु।

16.. T T - भेदधर्मिभ्यां।

17. M T - भुवप्रतिष्टः।

18. M T - परिणामरूपत्वात्।

19. M T - अनन्यस्वाकारपरित्यागेन।

20. M T - एतस्य।

21. T T - शूला, M T - रूल्याय।

22. M T - निर्मूलोन्मीलयति।

23. M T - निमीलयत्वव्यदृश्यस्म्यहं।

24. M T - भूतभान।

25. M T - विस्मृति।

26. T T - अततीताश्चर्यनिधौ।

27. M T - तटस्थात्।

28. T T - विधिज्ञाः।

29. M T - देहात्यनुत्याण्युत।

30. T T - क्रियाज्ञानसिद्धो।

31. M T - या अनियावृताया।

32. M T - श्रुति।

33. T T - व्योमे परं भात्वचि।

आनन्दविंशिकाप्रकरणम्

समे समाधौ सद्भोगे सुप्त्यादौ चोन्मिषन्महः।
प्रेमधामानतिशयानन्तानन्दात्मकं भजे।।

तत्रात्मनः स्वरूपमेव सुखं गुरुकारुण्यादाविर्भवतीति निरूपयति -

पूर्वोद्यदत्रिगुणसद्गुरुदृष्टिजन्म
कारुण्यपूर्णशशिना[1] परितः स्फुरन्तम्।
उद्वेलम[2]द्वयमनन्तमनन्तरीप -
मानन्दसिन्धुमवगाह्य तदात्मकोऽस्मि ।। 1 ।।

आनन्दाविर्भावात् पूर्वक्षण एवोद्यंश्चासौ त्रिगुणातीतस्य सद्गुरुदृष्ट्या लब्धजन्मा च तत्कारुण्यरूपः पूर्णचन्द्रोदयः तेन निमित्तेन सर्वतः प्रादुर्भवन्तं सीमातीतमद्वितीयमनन्तरीपं द्वीपस्थानीयेन अनन्ताव्याप्तभागेन हीनमनन्तं सन्तं ममानन्दसिन्धुमवगाह्य स्थूलसूक्ष्मकारणाख्यतनुत्रयोपाध्यपसरणद्वारेण अनुप्रविश्य विभेदजनकाज्ञाननाशादानन्दसिन्धुरेवास्मि ब्रह्मविद् ब्रह्मैव भवति (मु.3.2.9) इति श्रुतेः। यथात्रेः प्रजापतेर्गुणैः सत्या गुणरम्यया गुर्व्या दृष्ट्या जातेन चन्द्रेण पूर्वस्यां दिशि उदयता समुद्र उल्लास्यते। एवं गुरुकारुण्योक्तज्ञानानन्दात्मकोऽस्मीत्यर्थः।

संसारावस्थायां च निजानन्द एव विषयेन्द्रियसंयोगोत्थ-सात्त्विकधीवृत्तिविशेषावच्छिन्नतया जीवैः विषयसुखत्वेनानुभूयते इत्याह-

तत्तद्[3] गृहीतविषयाख्यतरंगसंघ

संघट्टजं निजमनोमरुतोपनीतम्।
यत्सौख्यबिन्दुमुपजीवति जीवलोकः
सोऽनन्तसत्यसुखबोधसुधाब्धिरस्मि ॥ 2 ॥

तत्तच्छब्देनात्र सुखहेतुरिन्द्रियार्थसंयोगविशेषो गृह्यते। तेन इन्द्रियाख्या विषयाख्याश्च ये तरंगसंघास्तेषां यः संयोगविशेषः तेन जातं तन्निमित्तसात्त्विकधीवृत्तिविशेषेण प्रादुर्भूतं सन्तं निजमनसा मन्दानिलेनेव तादृशानन्तविषयधीवृत्यन्तःकरणोऽहं कर्तेति समर्पितं यस्य परमानन्दस्य बिन्दुमभिव्यञ्जक स्वल्पतयाकल्पित[4] लेशात्मभावं अयं जीवलोकोऽहं कर्तृवर्ग उपजीवति तेन कृतार्थीभवति। एष ह्येवानन्दयाति (तै.2.7) एतस्यैवानन्दस्यान्यानि भूतानि मांत्रामुपजीवन्ति (बृ.4.3.32) इति च श्रुतेः। उपजीवति लोकोऽयं[5] यस्यानन्दस्य विप्रुषमिति सुरेश्वराचार्योक्तेश्च। एतेन विषयसुखान्यपि परमानन्दत्वेनानुभवितुर्न दोषायेत्युक्तं भवति।

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ (गौ.का.1.5)

इति गौडपादाचार्योक्तेश्च। अमृताब्धौ हि कमलनालेन तद्रसांशपानमिव इन्द्रियसुखभोगः अञ्जलिना तत्पानमिव समाधिसुखानुभवः अवगाह्य तत्र निमज्जनमिव तादात्म्यापरोक्ष्यात् परमसुखस्य जीवन्मुक्तावस्थायां आत्मत्वेन अनुभव इत्यर्थः।

पूर्वं दुःखत्वेनानुमतमपि दृश्यं उपासनावस्थायां सर्वमात्मेति जानतः सुखायैवेति सदृष्टान्तमाह -

श्रान्त्यै शिरः करधृतं पथिकैर्यदन्नं
तुष्ट्यै तदेव जठरे निहितं यथैवम्।
दृश्यं मदाश्रयमिदञ्च[6] पृथक्तया चेत्

श्रान्त्यै मुदे तु मदनन्यतयानुभूतम्।। 3 ।।

यदन्नं स्वदेहात्पृथक्त्वेनाभिमतं भोज्यं ग्रामान्तरं गच्छद्भिः शिरसा करेण वा वह्यमानं श्रमादिजन्यदुःखाय जायते भोजनात् जठरे क्षिप्तं आत्मदेहत्वेनाभिमतं सत्त्वस्यैव तुष्ट्यादिजन्मसुखाय यथा भवति एवं दृग्रूपं मामेव द्रष्टारमधिष्ठाय स्वप्नदृश्यमिव मय्येव दृश्यमानं विश्वं दृग्रूपात्मनः पृथक्तया दृष्टञ्चेत् रागद्वेषादिजदुःखायैव स्यात्। आनन्दात्मनस्तु मत्तः अनन्यतया मत्स्वरूपत्वेन अनुभूतं चेत् मुदे शान्त्यादिजसुखायैव स्यात्।

यस्मिन्[7] सर्वाणि भूतानि आत्मैवाभूद्विजानतः।

तत्र को मोहः क शोक एकत्वमनुपश्यः।। (ई . ७)

इतीशावास्य श्रुतेः।

भेदानुभूतिर्दुःखाय सुखायाद्वैतभावना।

भारायान्नं पृथक्भूतं तद्भूक्तञ्च सुखावहम्।। इति वचनाच्च।

न केवलं दृश्यमात्मत्वेनाभिमतं सुखाय किन्त्वात्मीयत्वेनापीति निदर्शयति-

अन्यैस्तदन्यमतिभिः[8] परिगर्हितोऽपि

देहः स्वदेत यदहं ममतारसेन[9]।

यत्संगतो रिपुरपि स्वदतो तदैव[10]

स प्रेमधाम निजसौख्यसुधाब्धिरस्मि ।। 4 ।।

अन्यैः तदीतरदेहाभिमानिभिः तदन्यमतिभिः तद्देहं नाहं न च ममेति मन्वानैः परितो गार्हितः। कुष्ठान्ध्यकैमित्यादिदुष्टो यो देहः स एव विज्ञातुरात्मनः स्वरूपेऽहमिति वा ममायमिति वारोपितेन अहं ममताभिमानमयेन रसेन रञ्जितः सद्गुडरसच्छादितनिम्बमिव स्वदेत तस्मै विज्ञात्रे रोचते। तथा बाह्यत्वेनाभिमतो जिघांसुत्वेनाभिमतो रिपुरपि येन संगतः तवाहमस्मीति

ब्रुवन् ममायमित्यभिमानविषयत्वेन मित्रीभूतस्सन् तदेव संगतिसमकालमेव तस्मै रोचते किं पुनः स्वोदेहः स्वस्मै रोचत इति 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति' (बृ.2.4.5)इत्यादि श्रुतिसिद्धनिरुपाधिकप्रीतिविषयभूतं यन्निजसौख्यं स ऐव सुधाब्धिः सोऽहमस्मि।

न केवलं साक्षादात्मीयत्वेनैव किन्तु प्राणाद्यप्यात्मीयत्वेनाभिमतः प्रीत्या इत्याह-

यत्संगिसंगतपरम्परयापि लोकः[11]
प्रेमास्पदीभवति सातिशयोपयोगात्।
निर्हेतुकानतिशयानवधि स्वधाम
किं वर्ण्यते मम निजं तदखण्डसौख्यम् ।। 5 ।।

यस्यात्मनो मम स्वात्मत्वेनाभिमतस्य देहस्य संगी पुत्रादिः तत्संगता तदीयत्वेनाभिमता दारागारराष्ट्राद्याः एवं परम्परया तत्तदुपकारितया तत्संबन्धाभिमतः सर्वोऽपि लोकः सातिशयोपयोगात् स्वस्वसाध्योपकारतारतम्यवशात् प्रेमतारतम्यविषयत्वं याति।

पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः।
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय।। (वा.24) इति

वाक्यवृत्युक्तस्य मम निर्हेतुकं निरुपाधिकमनतिशयमप्रतियोगिकमवध्यानं तत् स्वधाम स्वप्रतिष्ठितं स्वप्रकाशं वा यन्निजमागन्तुकमखण्टं पूर्णसुखं तत्किं वर्ण्यते सर्वोत्कृष्टत्वात् वर्णयितुरात्मत्वेन मनोवचनागोचरत्वाच्च 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वा'- नित्यादि (तै.2.9) श्रुतेः।

निरतिशयमप्यात्मसुखं व्यञ्जकतारतम्यात् सातिशयमिव भातीत्याह-

मत्सौख्यमेव सुखभासकयोः सुकर्म
विज्ञानयोस्तरतमत्वतरंगितांगम्।
आब्रह्मणः शतगुणोत्तरमिन्दुकान्त
सोपानबिम्बित शशिद्युतिवद्विभाति ।। 6 ।।

निरतिशयं मम निजसुखमेव सुखव्यञ्जकयोः सत्कर्मविज्ञानयोः यज्ञतपोदानादेः देवतोपासनारूपज्ञानस्य चेत्युभयोः तारतम्येन तरंगितांगं न्यूनाधिक्यभावं भासमानं मानुषादिब्रह्मावधिपदेषु यथोत्तरं शतगुणत्वेन तैत्तिरीयश्रुत्या 'युवा स्यात् साधुयुवाध्यायकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य' इत्युपक्रम्य 'ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य (तै.2.8) इत्येतदन्तेन प्रतिपादितम्। प्रथते परब्रह्मणस्तारतम्यं च

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा।
अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ।। (वि.पु.6.7.61)

तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता[12]।
सर्वभूतेषु[13] भूपाल तारतम्येन लक्ष्यते[14] ।।(वि.पु.6.7.62)

इत्यादि वैष्णवोक्तावरणवशादित्यर्थः। एकस्योपाधितारतम्येन भाने चन्द्रकान्तसोपानपङ्क्तिप्रतिबिम्बिता चन्द्रिका दृष्टान्तः।

यमाद्यष्टाङ्गयोगेनापि स्वसुखमेव व्यज्यत इत्याह -

प्राणेन्द्रियासनजितो नियतो यताश्च
सद्धारणास्मरणलब्धसमाधि सिद्धाः।

आलिङ्ग्यमन्निजसुखं मुनयः समन्ता-

दन्तर्बहिः किमपि नैव विदुः कृतार्थाः ।। 7 ।।

[15] यताः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाख्य यमयुता नियता स्वाध्यायशौचसन्तोषतपःपरमेश्वरपूजाख्यनियमयुताः पद्मस्वस्तिक-भद्राद्यासनजयिनः रेचकपूरककुम्भकाद्युपायैः प्राणवायुजयिनः विषयेभ्यः प्रत्याहारादिन्द्रियाणां तज्जयिनः सति शुभाश्रये चित्तस्थापनालक्षणायां धारणायां सिद्धाः विषयान्तरनिःस्पृहः तदेकाग्रतालक्षणे ध्याने च सिद्धाः ध्यानान्तयोगांगसाध्ये विकल्पशून्य एव वस्तुस्वरूपमात्रावभासे समाधौ च सिद्धाः। एवं अष्टांगयोगेन सिद्धेन ब्रह्मात्मभेदापगमलक्षणेन योगेनाभिव्यक्तं मम निजसुखमालिङ्ग्य आत्मत्वेनानुभूय कृतार्थाः पूर्णकामाः सन्तः मुनयो योगिनो नान्तर्बहिर्न्न सर्वतः किमपि वस्त्वन्तरं विदुः।

सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम्। (गी.6.21)

तथा -

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनियत्सुखम् ।

स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ।। (5.21) इति गीतोक्तं यत्सुखं तद् ममैवात्मभूतमित्यर्थः ।

अवहितस्य साधकस्य वियुक्तावस्थायामपि स्वात्म-सुखाभिव्यक्तिरेवेत्याह -

नाशाद्विरोधिगुणयोरितरेतरेण

व्यक्तं सुखं क्वचिदपीप्सित सम्प्रयोगात्।

दुःखाच्च लब्धपरभागमपि क्वचिन्मे[16]

प्रेष्ठेप्य[17]निष्टमितरत्र मतं हि दुःखम् ।। 8 ।।

आत्मधी विक्षेपकारणानां शीतोष्णादि मिथो विरोधि[18] द्वन्द्वसुखानां

परस्परेण नाशात् तिरोधायकाभावात् निजमेव सुखं सुषुप्ताविवाविर्भवति। कदाचित् पुत्रदारादीष्टवस्तुसंयोगात् जाते प्रीतिलक्षणे सात्त्विक धीवृत्तिविशेषे स्वच्छे दर्पणे स्वमुखमिव स्वसुखमेवाभिव्यज्यते। एतदुभयं सुखं अज्ञाः वैषयिकं मन्यन्ते आत्मज्ञाः स्वात्मसुखमेव विदुः।

विरोधिदुःखद्वयसन्निपाता
दुदेति याऽनन्दविशेषसंवित्।
यां मन्वते वैषयिकामविज्ञाः
ब्रह्मोद्भवां ब्रह्मविदो विदुस्ताम् ।।

इति तत्त्वानुभवोक्तेः। तथा कदाचिदनिष्टयोगादुत्पन्नदुखानुभवकालेऽपि इदं मे मा भूदित्यप्रियं दुःखं असहमानस्य तत्प्रतियोगिसुखरूपत्व-मेवात्मनो व्यज्यते। शुक्लसन्निधौ कृष्णरक्तादिरूपे दृष्टेऽपि तद्विरोधि-शुक्लवर्णमेव लब्धवर्णोत्कर्षमत्युत्पलं व्यज्यते तद्वदित्याह - लब्धपरभागमिति। एतदेव समर्थयति प्रेष्ठ इति। प्रियतमे हि दृष्टं दुःखं अत्यसह्यं भवति। अप्रिये हि दृष्टं सम्मतमेव स्यात्। एतेन स्वस्मिन् दृष्टस्य दुःखस्य सर्वथाऽत्मनिष्ठत्वादात्मनः प्रेष्ठत्वमेव तदा संजातमित्युक्तं भवति। उक्तं चाभियुक्तैः -

अहं सदा प्रेष्ठतमश्चकास्मि
दुःखेऽपि न प्रेष्ठतमत्वहानिः।
दुःखे यदि प्रेष्ठतमत्वहानिः
न स्यात् ध्रुवं तत्प्रतिकारयत्नः।।

तथा अनुपमबोधाचार्योक्तेः मुक्तिश्री ग्रन्थे च -

परिहर्तुं यतो दुःखमसहिष्णुसदोद्यतम्।
अतस्तत्प्रतिपक्षेण त्वया भाव्यं सुखात्मना।

सुखात्मबोधाचार्यैश्चोक्तं -

कण्टकाग्रमिदं दुःखं नेष्यते देहिना किल ।
अतः सुखात्मबोधोऽयमेको भाति निरन्तरम्।।

यदित्थमभिव्यज्यते सुखं तन्ममैवात्मभूतामित्यर्थः।

वेदान्तमहावाक्योत्थे जीवपरमात्मभेदाभावप्रत्यये साक्षात् ब्रह्मात्मसुखमेवावशिष्यत इत्याह -

प्रत्यक्[19] प्रबोध पुरुषोत्तमयोगसुप्ता-
वाद्यावृतिप्रलयलंघित भेदवेलः।
एकीकरोति सकलानि जगन्त्यगाध-
बोधोदधिः सुखसुधामधुरो मदात्मा ।। 9 ।।

त्वं पदलक्ष्यस्य प्रत्यक् बोधस्य तत्पदलक्ष्यस्य च परमानन्दस्वरूपस्य पुरुषोत्तमस्य भेदाभावात्मैकत्त्वलक्षणो योगः परेण ब्रह्मणा सार्धमेकत्वं यदात्मनः स एव योगो विज्ञेयः किमन्यत् योगलक्षणमिति श्रीविष्णुधर्मोक्तेः। स एव सर्वव्यवहाराभावात् सुषुप्तिरित्युपचर्यते।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।(गी.2.69)

इति गीताध्यायात् तस्यां सर्वसंसारशालामूलस्तम्भस्य अहङ्कारलक्षणस्य प्रथमावरणस्वप्रलयेन हेतुना अतिक्रान्तभेदमर्यादा स मत्स्वरूपो बोधसुखसुधांबुधिः दृश्यानि जगन्ति स्वात्मनैकीकरोति यथा सर्वजीवानां प्रत्यक् बोधस्य अहमात्मा गुडाकेशः सर्वभूताशयः स्थितः इति गीतस्य भगवतः पुरुषोत्तमस्य योगनिद्रायां आद्यावृतेः ब्रह्माण्डस्य प्रलये उद्वेलोऽब्धिर्जगन्ति ऐकार्णवयति ऐवमित्यर्थः।

ब्रह्मात्मैक्यानुभवात् जगद्भेदनाश उक्तः । तत्समर्थनार्थं

जगतः स्वमायाकल्पितत्वं तत्कार्योपाधिकभेदत्त्वं च आत्मन आह-

सच्चिन्महः सुखरसः स्वरसोत्थ[20]माया-
मूषानिषेकमिषतो मितताङ्गतोहम्।
स्वर्णं विचित्ररचना प्रतिमाकृतीव
देवादिभेदकलनोल्लिखितः स्फुरामि ।। 10 ।।

सच्चित्तेजोमयसुखरसात्मकोऽहं 'अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि (छा.6.3.2) इत्यादि श्रुत्युक्त लीलोत्पन्नकार्यरूपायां मदाद्याकारविशेषवत्यां मूषायामिव मायायामनुप्रवेशात्मक निषेकव्याजेन मिततां ब्रह्माण्डा-द्यनेकगात्रसन्निवेशाच्छिन्नतां गतः सन् सुरनरतिर्यक्स्थावरा-द्याकारवच्छेदैः उल्लिखितः चित्रवत् समुल्लसामि। यथा एक एव तप्तसुवर्णरसो विचित्राकारान्तःसुषिरगर्तायां मृदादि प्रतिकृतौ निषिक्तोऽनन्तरं तदाकारवत्च्छेदं गतः सन् विचित्रपरिजन-वाहनायुधादिसहितदेवताप्रतिमा स्फुरतीति। एवमात्मापि स्वमाया-कार्योपाधिकल्पिताकारः सुरादिरूपैरेक एव भाति। मूषानिषिक्त-द्रुतताम्रवदिति आचार्योक्तन्यायात्। तस्मादात्ममायाकार्यस्य जगतः तदुपाधिकस्यात्मभेदस्य आत्मीययाथात्म्य[21]ज्ञानात् निवृत्तिरुक्ता युक्ता।

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितः।।

तथा -

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः।
अभेदव्यापिनो वायोस्तथाऽस्य महात्मनः ।। (वि.पु.2.14.32)
एकस्य रूपभेदश्च बाह्यकर्मावृतिव्रजः।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणे हि सः ।। (वि.पु.2.14.33)

इति वैष्णवोक्तेः।

एवं ब्रह्मण एव मायोपाधिकानेकाकारत्वेऽपि न सच्चिदानन्दैक-रसस्य हानिरिति सदृष्टान्तमाह -

भेदोस्ति नैक्षवरसे गुडखण्डरूपे
जंब्वाकृतौ लिकुचनिम्बफलाकृतौ वा।
ब्रह्मात्मके सुखरसे मयि नास्तिभेदः
तद्वद्विरिञ्चवपुषि द्रुमविग्रहे वा ।। 11 ।।

इक्षुरसविकारे घनफाणितशर्करिकागुडखण्डेषु यथेक्षुरस एव तद्वदवस्थाभेदाः सर्वे परमात्मनः शंभोरिति निदर्शितभेदे जम्बुनिम्बादिभिन्ने रसफलाकारेण परिणतेपि काषायतिक्तितादि रसभेदो यथा नास्ति तत्तदाकारभेद[22] एव परम्। तथा सुखात्मैकरसमये मयि ब्रह्मणि हिरण्यगर्भाकृतौ बृक्षाकृतौ वा आकारभेद एव न तु वस्तुभेदः। सच्चित्सुखैकरस्यमेव सर्वस्यापीत्यर्थः।

ब्रह्मात्मैक्य सुखानुभवे सति विषयनिमित्तभयहर्षादिकस्य बाधः स्यादित्याह-

[23] सन्मात्रसत्यसुखसिद्धरसह्रदेस्मिन्
मङ्त्वा विधूयगुणकर्ममलाभितापान् ।
सिद्धोऽत्र सन्नगणयन्नभयं न चान्यत्
भामीश्वर स्वमहिमस्थितिराप्तकामः ।। 12 ।।

सन्मात्रः प्रत्यक् बोधैकस्वभावः सत्यसुखात्मकश्च यः सिद्धरसमयो ह्रदः रसकूपाख्यः तस्मिन् समस्तभेदापनयनद्वारा मङ्क्त्वा एकीभूय सत्त्वादि गुणान् तत्कार्यपुण्यापुण्यमिश्रकर्माणि अज्ञानमिथ्याज्ञान-कर्तृत्वाध्यासलक्षणान् गुणान् मदीयकारणाख्यान् त्रिमलान् आध्यात्मिक-आधिभौतिकअधिदैविकाख्य तापान् च त्रीन् निरस्य तत्रैव देहे सिद्धो लब्धात्मभावः अत एव आत्मकामः, अत एव सर्वेश्वरः स्वमहिमप्रतिष्ठितः

सन् अथात्र सन्न विभ्यत् आत्मनो वस्त्वन्तराभावात् तच्चागणयन् न शोचन् न हृष्यन् अनुभवातिशये तु तन्नावयवं अवगच्छन् स्वयमेव भास्यभासकनिरपेक्षः स्फुरामि। आत्मैवेदमग्र आसीदित्युपक्रम्य तस्मादेकाकी विभेति, द्वितीयाद्वै भयं भवतीति वाजसनेयोक्तेः। तरति शोकमात्मवित् (छा.7.1.3) आत्मकाम आप्तकामः, (बृ.4.4.5) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मृत्योऽमृतो भवत्यत्र ब्रह्म समश्नुत (बृ.4.4.7) इत्यदि श्रुत्यन्तरेभ्यश्च।

एवमात्मानुभवसिद्धस्य व्यवहारावस्थायां विश्वमात्मत्वेनैव भातीति दृष्टान्तेन समर्थयति-

दृष्टावुपहिततमो [24] भ्रमिरोगदोषैः
दृश्यं तथा स्फुरति तद्विरहे यथावत्।
एवं मतौ स्वसुखभाजि सुनिर्मलायां
स्फारस्फुरत्सुखमखण्टितमेव विश्वम् ।। 13 ।।

दृष्टिः चक्षुः, चक्षुषि तिमिरदोषोपाधियुक्ते सति दृश्यं व्योमादिकं तथा तद्दोषानुरूपं केशाण्डुकावृतमिव कृष्णरूपं दृश्यते। तस्मिन् तु भ्रमिरोगक्षुधादिवशात् भ्रमति सति भूधराद्यपि भ्रमरूपं भाति। तत्र पित्तपीतिमोपरक्ते शंखादावपि पीतरूपं स्फुरति। तद्विरहे तेषां दोषाणां विगमे तु यथा वदनारोपितरूपान्तरेण स्वेनैव स्फुरति। एवं बुद्धावप्यविद्याकर्मादित्रिमलदूषितायां निजमेव ब्रह्मसुखं अयथात्मवत् विश्वात्मक दुःखात्मकविश्वाकारेण स्फुरति। प्रत्यगुद्धृतचित्तस्य यथा बाह्यार्थ पीतता। चैतन्यं प्रत्यगात्मीयं बहिर्वदवभासत इति न्यायात् तस्यां तु निर्मलायां स्वात्मरूपसुखाद्वैतविषयायां सत्यां विश्वमनारोपित- रूपान्तरेण आत्माद्वयसुखरूपेणैव भातीत्वर्थः।

25
यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः

तत्र को मोहः क शोकः एकत्वमनुपश्यतः ।। (ई. 7)

इतिन्यायात्।

एवं योगिनः समाधौ व्युत्थानेपि स्वात्मसुखानुभवस्थितिमुक्त्वा साम्प्रतं अयोगिनोऽप्यज्ञानावस्थायां परिमितकारणोपाधिवशात् त्र्यवस्थासुविभज्य भुज्यमानन्तस्यैव विद्वदवस्थायान्तु सम्पूर्णत्वेना-नुभूयमानं च स्वात्मसुखमेवत्याह -

विश्वादिरिन्द्रियमनोऽनवबोधलब्धं

मुक्तो हि यत्परिमितं स तु चेन्मुमुक्षुः।

विद्योदये निजमनावृतमेति यत्तत्

नित्यप्रबुद्धसुखमस्मि हि नित्यमुक्तः।। 14 ।।

मायया मुग्धो हि सर्वो जीवः तत्र विश्वो मायोत्थैः सर्वैः कारणैः सान्तःकरणैः जागरे, तैजसः सर्वेन्द्रियसंस्कारसचिवेन चेतसा स्वप्ने, प्राज्ञः सर्वेन्द्रियान्तःकरणादिकारणेन मूलाज्ञानेन कारणभूतेन आत्मधर्मवद्गृह्यमाणं सुषुप्तौ यत्सुखं भुङ्क्तेऽयं एवं त्रिविधः त्र्यवस्थासु तत्तत्कारणैः सुखमनुभवति। स एव सुकृतवशोत्पन्नं विवेकविरक्ति-शान्त्यादिकः। संसारात् मुमुक्षुर्ज्जातश्चेत् सद्गुरुमुपसाद्य तद्वक्त्रोपदेशानुगृहीतया ब्रह्मात्मैकत्वविषयया विद्यया निजनित्यप्रबुद्धः स्वप्रकाशमनावृतं अप्रतिबन्धं यत्सुखं आत्मत्वेनानुभवति तत्सुखमेवाहमस्मि नित्यप्रबुद्धसुखत्वे नित्यमुक्तोऽस्मीति हेतुः। जीवावस्थायामपि भोग्यस्य आत्मसुखत्वादात्मनश्च प्रकाशसुखत्वात् स्वसुखस्य नित्यप्रबुद्धत्वमस्त्येव किन्तु तत्तदवस्थोत्थकारणतया तदविच्छिन्नमिव च विद्यया जीवन्मुक्तौ तु निरवधिब्रह्माकारपरिणतान्तः-करणोन्मिषितत्वात्

पूर्णमिव सर्वतोमुखं व्यज्यत इत्यर्थः। अतः -

आनन्दं ब्रह्मणो रूपं तदेव मोक्षेऽभिव्यज्यते।
विमुक्तस्तु विमुच्यते ब्रह्मैव सर्वब्रह्माप्येति।।

इत्यादिमुक्तनित्यत्वश्रुत्योरपि विरोधतात्पर्यमनुसृतं ज्ञेयम्।

अविहितस्य भावस्य लौकिको नाटकाद्यभिनयानुभवजन्मापि रससुखस्वरूप एवेत्याह -

या स्थायिभावरतिरेव निमित्तभेदा-
च्छृङ्गारमुख्यनवनाट्यरसी भवन्ति।
सामाजिकान् सहृदयान् नटनायकादीन्
आनन्दयेत्सहजपूर्णरसोऽस्मि सोऽहम्।। 15 ।।

शृंगारादिनवरसबीजभूता ये -

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयशमा स्थायिभावा नवस्मृताः ।। (ना.6.17)

इत्युक्ताः स्थायिभावाः। एवं रामादि नायक हृदयेषु स्थायित्वेन स्थिताः तद्विषयभूतैः सीतादिभिः आलम्बनैर्विभावनैः रसाभिव्यक्तेः कारणैरङ्कुरिता [26] चन्द्रमन्दानिलाद्यैरुद्दीपनैः विभावनैरुद्दीपिताः तथा परशरीरगतैः तत्तद्रसकार्यभूतैः

स्तंभस्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः।
वैवर्ण्यमश्रुःप्रलय इत्यष्टौ सात्त्विका मता।। (ना.6.22)

इत्याद्यैः रसानन्तरभाविभिः अनुभावैः तथा -

निर्वेदग्लानिशङ्काऽऽख्यास्तथाऽसूया मदश्रमाः।
आलस्यञ्चैव दैन्यञ्च चिन्तामोहस्मृतिर्मतिः।। (ना.6.18)
व्रीडा चपलता हर्ष आवेगो जडता तथा।

गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च । (ना.6.19)

सुप्तिर्विबोधोऽमर्षश्च ह्यवहेलमथोग्रता।

मतिर्व्याधिस्तथोन्मादः तथा मरणमेव च। (ना.6.20)

त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।। (ना.6.21)

इति उक्त व्यभिचारिसंज्ञितैश्च दृष्टैः श्रुतैर्वा संवर्द्धिताः सन्तः

शृङ्गारहास्यकरुणा रौद्र वीरभयानकाः।

बीभत्साद्भुतशान्ताश्च नव नाट्यरसा स्मृताः।

इत्युक्त नवरसाख्यामवस्थां लभन्ते। तत्सूत्रितं भरतेन महर्षिणा - विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। एष नवरसपक्षे व्यवहारक्रमः परमार्थतस्तु रत्याख्य एको भावः तत्तदुपाधिविषयभेदेन तत्तत्स्थायिभावं तद्भावादिभेदात् रसात्मतां च गच्छतीति स्थितिः। रतिरेव हि गुरुनृपदेवतादौ भक्तिः। कान्तादौ शृङ्गारः, पुत्रादौ वात्सल्यं, मित्रादौ स्नेहः, एवं हसितव्यशोच्यद्वेष्यप्रतिभटभीषणीयजुगुप्सा- निन्दाश्चर्यसाम्यास्पदालम्बनेषु हास्यादि रससंज्ञा स्यात्। एवं स्थिते एषा स्थायिभावरूपा रतिरेव रसिकहृदयगता तत्तदालम्बना-नुभावसञ्चार्यादिभावैः नाट्याभिनये चित्रादौ वा दृष्टैः श्रुतैः काव्यैर्वा तत्तद्रसतां गच्छन्ति। यथायोग्यं सहृदयान् स्वच्छाशयात् तदभिनयाद्यनुभवितॄन् सामाजिकान् सभासदः तदभिनेतॄन् च नटादीन् नायकान् तत्तत्सभानायकान् तत्तत्काले तु तत्तत्कथानायकान् रामादीन् च आनन्दयेत् सुखयेत् तथा रतिः अखण्डितानन्दः सहजोऽहमेवेत्यर्थः। रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवति, को ह्येवान्यात्कः प्राण्यात्, यदेष आकाशो न स्यात्, एष ह्येवानन्दयातीति (तै.2.7) श्रुतेः।

किं बहुना सावधानस्य सर्वं जगत् सुखमेवेति समर्थयति -

जिज्ञासितेप्सितजिहासितबुद्धिगम्यं

रूपेण केन चिदिदं जगदिष्टमेव।
इच्छा हि सौख्यसरणिस्सुखमेव हीष्टं
सर्वं सुखात्मकमतो मदनन्यसौख्यम्।। 16 ।।

जगति प्रायेण अज्ञातांशो जिज्ञासितः स्यात् अनाप्तप्रियम् ईप्सितः सम्प्राप्तोऽप्रियानभिमतो जिहासितः स्वसन्निधेरपनेतुमिष्टम्। एवं त्रिविध धीविषयः प्रपञ्चः सर्वोऽप्ययं तेन चिद्रूपेणेष्ट एव। इच्छा हि सुखमार्गानुसारिणी कुतः सुखस्येवेष्टत्वात्। अतः सर्वजगत्सुखात्मकं तस्य च सुखत्वं मत्स्वरूपादनन्यत्वादहमेव हि सर्वतः प्रेष्ठत इत्युपपादितं च। यदर्थं सर्वं यच्च नान्यार्थं तत्सुखमिति सुखलक्षणस्य मय्येव पर्याप्तत्वादिति भावः। एतेन सद्विंशिकायां भवति विधिनिषेधेष्वस्ति नास्तीति सत्वानुगतिरित्युक्तम्। सद्रूपञ्च चिद्विंशिकायां प्रकाशते चेत् जडतास्य क्व स्यादित्युक्तम्। चिद्रूपं अत्र तूक्तानन्दरूपं जगच्च सच्चिदानन्दब्रह्मात्मन्यध्यस्ततया तदनन्यत्वात् सच्चित्सुखमेव रूपमेवेत्युक्तं ज्ञेयम्। 'यत्र नान्यत्पश्यति' (छा.7.24.1) इत्यादि भ्रमश्रुतेश्च।

सर्वत्र सुखाभिव्यक्तौ व्यञ्जकोदाहरणानि आह -

योऽसौ रसः स्फुरति भौतिकभूरुहादौ
सौख्यं तथेन्द्रियगणे त्रिगुणे च सत्त्वम्।
प्रीतिश्च पुंसि पुरुषाधिपतौ च लीला
ब्रह्मण्यखण्डसुखमेव रसोऽस्मि सोऽहम्।। 17 ।।

ओषधिवनस्पतिषु हि रसो दृश्यते चित्तं प्राणभृत् सुप्राणभृत् सुविस्तरामात्मा तेषु हि रसोपि दृश्यते न चित्तमितरेत्यादि श्रुत्युक्तम्। पृथिव्यादि भूतोद्भवे वृक्षादौ यो रसः आत्मभूतो दृश्यते य एवेन्द्रियेषु ऐन्द्रियकं सौख्यं तथा त्रिगुणात्मकं प्रकृत्यंशेषु सत्त्वं सुखे सञ्जयतीति गीतोक्तो यः

सत्त्वगुणः पुरुषेषु यन्निरुपाधिकप्रीतिपात्रत्वं स्वस्मिन् ईश्वरे तु तथा परत्वेन बाह्या च या लीलाख्या इच्छाशक्तिः यद्ब्रह्मणि परमानन्दात्मकं स्वरूपं तत्सर्वं एकरसरूपो रसोऽहमेव।

तस्मात् सर्वेषां प्रत्यगात्मतया आन्तरं विश्वहेतुतया परत्वेन बाह्यं च यदेव सुखं तदेव अहमस्मीत्याह -

अन्नादिभेदपरिकल्पित पञ्चकोशा-
दप्यान्तरं सविकृतेः प्रकृतेश्च बाह्यम्।
27
वाग्बुद्धिदूरमभिपूरित सर्वलोकं
यत्स्वप्रकाशसुखचिद्गगनं तदस्मि।। 18 ।।

तैत्तिरीये स वा एष पुरुषोऽन्नरसमयः (तै .2.1) इत्युपक्रम्य ब्रह्मपुच्छं प्रतिष्ठा (तै.2.5) इत्यन्तेन प्रतिपादिते अन्नमयादौ कोशपञ्चके स्थूलदेहो अन्नरसमयः कोशो बाह्यः, तस्मादप्यान्तरः पञ्चवृत्ति-प्राणेन्द्रियात्मकः प्राणमयः, तदान्तरो अन्तःकरणवृत्तिरूपो मनोमयः, तदान्तरो बुद्धिरूपो विज्ञानमयः, तदान्तरो बुद्ध्यादिसर्वविक्षेपविकारलये सुप्त्यादौ लक्ष्यं स्वल्पावरणात्मतया प्रस्फुरत् स्वावृतात्मानन्दप्रचुरो मूलाज्ञानात्मक आनन्दमय कोश एव मुक्तात् कोशपञ्चकादान्तरतमम्। ब्रह्म पुच्छं प्रतिष्ठेति श्रुत्युक्तब्रह्मात्मकं तथा तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः इत्युपक्रम्य स वा एष पुरुषो अन्नरसमयः (तै.2.1) इत्यन्तेन तथा आनन्दो ब्रह्मेति व्यजानात्, आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त (तै.3.6) इत्यादिना सर्वकारणत्वेन प्रतिपादितत्वात् सप्तावरणानेकब्रह्माण्डमयविकारवत्याः सर्वजनन्यावेदात्मक देवात्मशक्तिः स्वगुणैर्निगूढां (श्वे.1.1) मायां तु प्रकृतिं विद्यात् (श्वे.4.10) इत्यादिनोक्तायां प्रकृतेश्च बाह्यं अन्तःश्रुतिमस्तकमाणिक्यं क्व ते सर्वान्तरं महः क्व चात्यन्तापरागे तु

मुग्धामुग्धतृणम्मन इति मनोहरस्तोत्रोक्त्या च सर्वान्तरत्वात् बुद्धेः दूरं सर्वबाह्यतया जात्यादिराहित्येन च वाचामगोचरः तथा तेनेदं पूर्णं पुरुषेण सर्वं(श्वे.3.9) स यश्चायं पुरुष (तै.2.8) इति च श्रुतिप्रसिद्धम्। स्वयं प्रकाशं सुखचिद्रूपं कं ब्रह्म खं ब्रह्म (छा.4.10) इति श्रुत्याद्युक्तं ब्रह्माहमस्मि। अत्रोक्तार्थमनुसन्धातुं संगृह्याह -

देहेन्द्रियासुमनसां प्रसरप्रशान्त्योः
यत्तुल्य[28]मुत्थिति समधि विडम्बशून्यम्।
अन्तर्बहिःस्फुरदनावृतमात्मभानं
तत्सौख्यमेकरसमेकमहं[29] महोऽस्मि।। 19 ।।

देहेन्द्रियान्तःकरणानां प्रसरे जागरादौ प्रशान्तौ सुषुप्तौ समाधौ च यत्तुल्यं समानं स्फुरद्भावं एवं विदोऽनावृततया अन्तर्बहिःस्फुरणात् अतः समाधिव्युत्थानमिति येयं विडंबना नडनं तेन शून्यं रहितं न हि तरंगेषु सत्सु शान्तेषु वा सलिलस्य कापि हानिः यथा तरंगादयो वायुवशेन वाप्यादि जलाशयात् बहिर्गच्छन्तोपि जलान्न बहिर्गच्छति एवमिन्द्रियादयोपि देहादेः बहिर्गच्छन्तोपि नात्मचैतन्यात् बहिर्यान्ति। तेषां प्रसरप्रशान्तौ च चैतन्याश्रयादित्यर्थः। एकमद्वितीयमेकरसं इत्यादि श्रुतिवैष्णवोक्तिभ्यां यदेकं सुखात्मकं तेजः तदहमस्मि।

उक्तप्रकरणार्थाधिगमे ईश्वरगुरुभक्तिः सुकरोपाय इत्याह -

आम्नायदुग्धजलधिं मतिमन्दरेण
निर्मथ्य विघ्नदनुजान् विनिवार्य दत्ताम्।
आचार्यमूर्तिहरिणा करुणाकरेण
संसेव्य मत्सुखसुधाममृतो न कः स्यात् ।। 20 ।।

आचार्यरूपेण विष्णुना वेदात्मकं क्षीरोदधिं मतिमन्दरेण मन्थाचलेन

मथित्वा योगान्तरायरूपानसुरान् निरस्य स्वकारुण्यरूपेण करेण देवेभ्य इव शिष्येभ्यो दत्तां मदीयप्रत्यगात्मतत्त्वभूतां आनन्दमयीं सुधां आत्मत्वेनानुभूय अजरामरपरब्रह्मभूतः को वा न भवेत् सर्वोह्यधिकारी। गुरुमुखश्रुतब्रह्मवेदनात् ब्रह्मैव भवतीत्यर्थः।

अत्र च पूर्वभागे विंशिकात्रयेण सच्चिदानन्दरूपमुपेयं ब्रह्मोक्तम्। तदधिगतोपायभूतं श्रवणादित्रयमुपरिभागे विंशिकात्रयेण वक्ष्यते। तद्यथा नावेदविन्मनुते तं बृहन्तं (तै.ब्रा.3.12.9.7) आचार्यवान् पुरुषो वेद (छा.6.14.2) इति श्रुतिभ्यां श्रोतव्य (बृ.2.4.5) इति श्रुत्या च आर्यजन्यवाक्यार्थज्ञानहेतुश्रवणं वाक्यार्थविंशिकायां, श्रुतार्थ मननं देवताविंशिकायां, श्रुतार्थनिदिध्यासनं योगविंशिकायां वक्ष्यत इति ग्रन्थस्य भागद्वयसंगतिश्चात्र सूचिता। तेनोक्तब्रह्मप्राप्तौ वक्ष्यमाणं ज्ञानं साधनं देवतागुरुभक्तस्येत्युक्तं भवति। उपदेशलभ्यो हि रहस्यार्थः शिष्यस्य गुरौ भक्त्या, शिष्ये तत्प्रसादाच्च द्रोणभक्त्येव एकलव्यस्य व्यासप्रसादादिव सञ्जयस्य स्वयमेव प्रकाशते।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।। (श्वे.6.23)

इति श्वेताश्वतरश्रुतेः। व्यासप्रसादात् श्रुतवानेतत् गुह्यमहं परमं योगं योगेश्वरात् कृष्णात् साक्षात् कथयत स्वयमिति गीतोक्तेश्च। अतो दृष्टाधिकारसम्पदभावेपि प्राचीनभाग्यवशात् विशिष्टाचार्यानुग्रहविशेषेण केषाञ्चित् ज्ञानमोक्षौ यथा काश्यां विश्वेश्वरानुग्रहेण सर्वप्राणिनाम्। अतः श्रुत्या आचार्यप्रसादजन्य श्रवणादिसिद्धब्रह्मात्मैक्यापरोक्षज्ञानेन सच्चिदानन्दात्मकं ज्ञानं वस्तु अहमेवेति सिद्धम्।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।

स्वात्मयोगप्रदीपे स्वे तृतीयां सुखविंशिकाम्।।

इति स्वात्मयोगप्रदीपप्रबोधिन्यां अमरानन्दयोगीश्वरकृतौ आनन्दविंशिकाप्रकरणं तृतीयम् ।

1. M T - शशिनो।

2. M T - उद्वेक।

3. M T - तत्तद्धृषीक।

4. M T - स्वप्नतया।

5. M T - जीवोयं।

6. M T - मयाश्रय।

7. T T - यत्र। M T - यत्र।

8. M T - स्तदितरदेहाभिमानिभिः।

9. M T - तदन्यभितद्देहमकारसौ।

10. The portion beginning from स्वदतो तदैव......... to कुष्ठान्ध्यकैमित्यादि is missing in MT .

11. This verse is missing in M T.

12. T T - क्षेत्रज्ञसंज्ञिका।

13. T T - सर्वभूपेषु।

14. M T - वक्ष्यते।

15. M T - यतः

16.. M T - The first three lines are missing in M T.

17. M T - प्रेष्ठेत्यनिष्ट।

18.. M T - संबन्धविरोधि।

19. M T - प्रत्यत्।

20. M T - स्वरसोर्थ।

21. T T - याथार्थ्य।

22. M T - तत्तदाकार एव।

23. T T - तन्मात्र।

24. M T - कृमिरोगदोषैः।

25. T T - यत्र।

26. The portion beginning from चन्द्रमन्दानिल to अनुभावैः is missing in M T.

27. M T - मपिपूरित।

28. This word is missing in M T.

29. M T - तत्सौख्यरसमेकमहं।

वाक्यार्थविंशिकाप्रकरणम्

नमः समस्ते वेदैकवेद्याय परमात्मने।
अखण्डसच्चिदानन्दरूपायाखिलसाक्षिणे।।

अथ वाक्यार्थविंशिका व्याख्यायते -

तत्र सच्चिदानन्दब्रह्मभावस्य श्रुत्या आचार्याद्युपायकत्वात् साधकस्य श्रुत्यादिष्वपि ब्रह्मबुद्धिः कार्येत्याशयेन तत्प्रकरणार्थं संगृह्य रूपयति -

ब्रह्म चैकमपि भेदभूमिका-
माययाभिनयति स्वनाटिकाम्[1]।
मानमेयगुरुशिष्यदेवता-
जीवबन्धनविमुक्तिलक्षणाम्।। 1 ।।

ब्रह्म स्वात्मभूतमपि माययान्यदिवोपेयं सत् स्वप्राप्तौ श्रुत्यादिरूपेणोपायश्च भवतीति च शव्दार्थः; वेत्तासि वेद्यं चेति हि गीतं वस्तुत एकमपि हि ब्रह्म स्वीयमायया शिष्याचार्यौ[2] प्रमाणप्रमेये जीवेश्वरौ बन्धमोक्षौ[3] चेति द्वन्द्वचतुष्करूपचतुरंकां तत्तद्भेद-मयवर्णिकापरिग्रहात् स्वात्मभूतामेव नाटिकां नाट्ये प्रबन्धविशेषात् नाटयतीव। नाटिका हि चतुरंका एकैकदिनाभिनेयरसभाव संविधानाश्रयः प्रबन्धांशोह्यङ्कः सर्गाध्यायस्थानीयः चत्वारः पुरुषा इत्यादि श्रुतौ जीवश्रुत्या आचार्येश्वर चातुर्विध्येन[4] चतुःप्रकारम्। तदपि स्वरूपं परमात्मन इत्यादि वैष्णवोक्तौ च साधनसाध्यतदुभयैकात्म्य तत् त्रितय-यैः पुनर्विदितं तत्त्वं ते मुक्ता मोचयत्यपि।।

विशेषोपकरणलक्षितात्मस्वरूपाख्यचातुर्विध्येन साधनादौ ब्रह्मदृष्टिविधानदर्शनात् उपपन्नः चतुष्करूपणम्।

श्लोकाभ्यामेतद्युग्मचतुष्कं विवृणोति -

अध्रुवध्रुवविवेकवानिहा-
मुत्रभोगविरतश्शमादिमान्।
मोक्षकांक्ष्युपनतः शिवात्मकं
सद्गुरुं श्रुतिषु शिष्य इष्यते।। 2 ।।

अध्रुवं देहगेहादिः ध्रुवं आत्मा अथास्याऽयमितर आत्मा कृतकृत्यो वयोगतः प्रैति। स इतः प्रयन्नेव पुनर्जायत इति (ऐ.2.4) श्रुतेः। परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति (मु.1.2.12) लोकेषणाया वित्तेषणाया पुत्रेषणायाश्च व्युत्थायेत्यादि श्रुतिभ्यां ऐहिकामुष्मिकफलभोगविरक्तः शमादिमान् शान्तो दान्त उपरतस्तितिक्षु श्रद्धालुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येदिति (बृ.4.4.23) सौम्येत्यादि श्रुतिभ्यां उक्ता ये शमदमोपरतितितिक्षासमाधिश्रद्धाख्याः षड्गुणास्तद्वान्मोक्षकांक्षी किमहं तेन कुर्यां येनाहं अमृतः स्यामिति श्रुत्युक्तो मुमुक्षुः। एवं विवेकवैराग्यशमादि मुमुक्षुत्वाख्य साधनचतुष्टय-सम्पन्नः सन् शिवात्मकं सद्गुरुं ज्ञानदर्शनतद्भावापत्तिभिः लब्धेश्वरात्मैक्यं तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं (मु.1.2.12) इतिश्रुत्योक्तं -

यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्त्तते।
यस्यावलोकनाद्यैश्च परानन्दोऽभिजायते।

(शि.पु.7.2.15.43)

येषां तन्नाममात्रेण मुक्तिर्वैनाममात्रिकी।

(शि.पु.7.2.15.42)

तस्माद्यस्यैव संपर्कात् प्रबोधानन्दसंभवः।।

गुरुं तमेव वृणुयान्नापरं मतिमान्नरः।। (शि.पु.7.2.15.44)

इति शैवोक्तं सद्गुरुं उपनतः शुश्रूषाद्यैरुपसन्नः

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।

उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।। (गी.4.34)

इति गीतोक्तेः। य एवं विधः स एव शिष्यो गुरुणा शासनीय इति श्रुतिषु तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः (छा.7.26.2) इत्यादिषु दर्शनात् इष्यते तत्त्वज्ञैः। एतेन शिष्याचार्यलक्षणे चोक्ते ज्ञेये। जीवेश्वररूपे तु तत्त्वंपदवाक्यार्थोक्तौ व्यक्तीभविष्यतः।

अथावशिष्टे युग्मे विवृणोति -

विद्यया मननचिन्तनांगया[9]

वेदान्तवाक्श्रवणजातस्य यत्।

मुक्तिरात्मपरमैकतार्थया

मोहबन्धविलये[10] निजस्थितिः।। 3 ।।

आत्मा जीवत्वेनाभिमतः परमः परमात्मा तयोरेकताभेदाभावः अर्थो विषयो यस्या विद्यायाः तथा किंकरणया मनननिदिध्यासनाभ्यां अपरोक्षानुभवात्मनि फले उपकारकाभ्यां अङ्गाभ्यां सहितेन वेदान्तवाक्यानां श्रवणेन अङ्गिना करणेनोत्पन्नया विद्यया ब्रह्मात्मैकत्वाकारधारिधीवृत्तिलक्षणयास्याधिकारिणः अनाद्यविद्यातत्कार्यमल[11]बन्धनाशे नित्यसिद्धे ब्रह्मात्मभावे स्थितिरिति यत्सैव मुक्तिरित्यन्वयः। अत्र हि श्रवणं नाम -

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।

अर्थवादोपपत्ती[12] च लिङ्गं तात्पर्यनिर्णये।।

इत्युक्तषड्विधतात्पर्यलिङ्गेन वेदान्तवाक्यानां जीवब्रह्मणोः प्रतीयमानस्य भेदस्यापनयेन तादात्म्यबोधने तात्पर्यमित्यवधारणम्। एवमवधारिते तात्पर्ये असंभावनाविपरीतभावनाभ्यां अनुभवस्य प्रतिबद्धत्वात् तत्त्वस्यानिश्चये तयोरनुकूलकर्मप्रतिकूलतर्कालोचनात्मकेन मननेन असंभावनापनयेपि चित्तस्य विषयैः विक्षेपात् फलस्यानुदये तेभ्यः चित्तस्य वृत्तिरोधलक्षणं समाधानम्। निदिध्यासनमपि विपरीतभावनानिवृत्तये अपेक्षितम्। एवं हि मनननिदिध्यासनाभ्यामङ्गाभ्यां उपकृतं श्रवणमेव आत्मन्यपरोक्षमिति जनयति। तेन अलौकिकार्थबोधकश्रुत्युक्तस्यैव ज्ञानस्य प्राधान्यम्। ब्रह्मात्मैक्ये प्रामाण्यं मनननिदिध्यासनयोः तदर्थयोः। एवञ्च तच्चौपनिषदं पुरुषं पृच्छामीत्यादि श्रुत्यर्थोऽनुसृतो भवति। यथा हि दिङ्मूढः स्यादित्यादयोपि लिङ्गोऽर्थज्ञानभावनासहितमेव चक्षुरपरोक्षां प्रमितिं जनयति। एवं स मनननिदिध्यासनमेव श्रवणं प्रोक्ताधिकारिणः स्वात्मयाथात्म्यज्ञानजनये नान्यदित्यर्थः।

एवमुद्दिष्टे जीवब्रह्मैक्ये मेये महावाक्यार्थज्ञानमेव मानमित्युक्तम्। तदर्थं मानसामान्यरूपस्य परिकरस्य चिन्ता अष्टश्लोक्या क्रियते। तत्रानुभूतिः प्रमाणमिति वक्ष्यमाणप्रमाणसामान्यलक्षणस्यानुभवस्य स्वपरव्यवहारहेतुत्वे अन्यानपेक्षत्वं वक्तुं ज्ञानमात्रस्य स्वतः सिद्धतां तावदाह -

मोहविभ्रमविमत्यदर्शनात्
वेदने प्रमितमेव[13] तत्स्वतः।
तत्प्रमा हि न चिदन्तराच्चितां
यौगपद्यजडतानवस्थितैः।। 4 ।।

वेदनेज्ञाने सति तद्विषये तद्विषयीकृत्य जायमानानां अभावविपर्ययसंशयानां अदर्शनात् तज्ज्ञानं स्वत एव प्रमितं सिद्धमित्यर्थः। यथा हि घटप्रमेये प्रकाशमाने घटविषयाज्ञानभ्रमसंशया न दृश्यन्ते। एवं तत्प्रकाशात्मके घटज्ञानेपि प्रकाशमाने तदस्फुरणात्मको मोहः स्फुरणेतरत्वप्रतिभासलक्षणो भ्रमः इदं स्फुरणं वा नवेति संशयश्च न दृश्यते। तेन ज्ञानस्य स्वत एव सिद्धिः तत्प्रकाश्यस्य घटस्य तदधीना सिद्धिरित्यर्थापत्या गम्यते। उक्तं स्वात्मसिद्धौ[14] तत्त्वबोधाचार्यैः -जिज्ञासितस्याप्रमितिर्व्याप्ता तत्संशयादिना तदभावादहं वेति सत्तायां प्रमिति ध्रुवाननुज्ञानस्य सिद्धिरस्तु। स्वात्मसिद्धत्वं कथमित्याह- तत्प्रमा हि न चिदन्तरादिति। तस्य ज्ञानस्य प्रमा प्रथा ज्ञानान्तरान्न संभवति। अथ च तत्प्रथते ज्ञानं यस्मात्तेन स्वतःसिद्धमित्युपचर्यत इत्यर्थः। तस्य ज्ञानान्तरवेद्यत्वे दोषत्रयमाह - चितां यौगपद्यजडतानवस्थितैरिति। वेद्यस्यज्ञानस्य वेदकस्य च मानसप्रत्यक्षतः पक्षे एककालस्थितिर्यौगपद्यं तद्दोषापत्तेः युगपत् ज्ञानानुपपत्तिरिति मनसो लिङ्गं किञ्च जाड्यापत्तेः अनुभूतेः अनुभाव्यत्वे घटादिवदनुभूतित्वप्रसंगादित्यर्थः। तस्यापि ज्ञानान्तरवेद्यत्वे अनवस्थापाताच्च ज्ञेयज्ञानवादिनां सर्वेषां दोषाविमौ समौ। अतो ज्ञानमानान्तरनिरपेक्षं प्रमाणादिव्यवहारात् प्रागेव सिद्धं तदेव च ज्ञानं विज्ञानात्मनः प्रमातुः वास्तवं रूपम्। तस्यापि स्वव्यतिरिक्तज्ञानवेद्यत्वे घटवज्जडत्वप्रसंगादिति भावः। अत्रायं पुरुषः स्वयं ज्योतिर्भवति (बृ.4.3.9) विज्ञातारमरे केन वा विजानीयादित्यादि (बृ.2.4.14) श्रुतिभ्यः बोधेद्धा वा बुद्धिः बुद्धीद्धो वा बोधः स्वाविद्यातत्कार्ये यथोचितं हन्ति यथा सूर्येद्धो वाऽदर्शो दर्पणेद्धो वा सूर्यः तमो हन्तीत्यर्थः।

स्वात्मभूतमेतदेव ज्ञानं तत्तदभिव्यञ्जककरणभेदात् प्रत्यक्षादि-व्यवहारविशेषतत्सामान्यादिव्यवहारभाक् भवतीत्याह -

अक्षलिङ्गवचनादिजानुभूः[15]
बुद्धिरस्मृतिरसौ स्वतः प्रमा।[16]
बाधनेऽत्र परतोऽप्रमाणता[17]
वाक्यमिष्टकृदिति प्रवर्तकम्।। 5 ।।

अनुभूः प्रमा, अनुभूतिः प्रमाणमिति प्रमाणसामान्यमित्यर्थः। अस्मृतिः स्मृतिविलक्षणाबुद्धिरनुभूतिरित्यनुभूति लक्षणम्। असावनुभूतिः स्वतः प्रमाणं स्वहेतुमात्रव्यतिरेकेण तद्गतगुणादिः स्वविषये मानान्तरञ्चानपेक्ष्य प्रमाणमित्यर्थः। अतः तत्कारणे चक्षुरादौ विद्यमाना अपि गुणाः तत्प्रामाण्यापवादकदोषनिरास एव चरितार्थाः सन्तो नैवानुभूतेः प्रामाण्ये व्याप्रियन्ते। अत्रास्यानुभूतावप्रमाणता परतः विसंवादकात् कारणदोषादिविशेषाद्वा प्रमाणान्तरात् बाधने विषयापहारादौ सत्येवाप्रामाण्यं भवेत् न त्वन्यथा। अनुभूतेः स्वतः प्रामाण्यं परतोऽप्रामाण्यञ्चेत्यर्थः। तस्य विशेषतो लक्षणमाह- अक्षेति। अक्षादिजाता या अनुभूतिः सा प्रत्यक्षादिमानविशेषसंज्ञा स्यादिति शेषः। अनुभूतिर्हि चक्षुरादीन्द्रियैः जाता प्रत्यक्षं यथा रूपादिज्ञानं व्याप्यधूमादि लिङ्गदर्शनात् तद्व्यापकाग्न्यादिलिङ्गविषयानुभूः अनुमानम्। नद्यास्तीरे फलानि सन्ति इत्यादि वाक्यश्रवणात्[18] तत्प्रतिपाद्यर्थानुभूरागमः।[19] आदिशब्देन अर्थापत्यादि मानानां हेतुग्रहणम्। अर्थापत्तिर्हि दृष्टेन श्रुतेन वार्थेन अर्थान्तरस्य तदुपपादकस्य कल्पना। यथा जीवतो देवदत्तस्य गृहे अभावदर्शनेन बहिः सद्भावकल्पनं दृष्टार्थापत्तिः। यथा पीनत्वेन दृष्टस्य देवदत्तस्य 'अयं दिवा न भुङ्क्ते' इति वाक्यं श्रुतवता पुंसा 'रात्रौ भुङ्क्त' इति वाक्यस्य तदर्थस्य वा कल्पनं

श्रुतार्थापत्तिः। उपमानन्तु सदृशवस्तुदर्शनेन सदृशान्तरे तत्प्रतियोगिसादृश्यविशिष्टप्रत्ययः। यथा ग्रामीणस्य वने गवयं प्रथमं पश्यतः स्वरूपमात्रेण स्मर्यमाणायां गवि मदीया गौः अनेन सदृशीति पूर्वानधिगततत्सादृश्यविशिष्टप्रत्ययः। संभवस्य तु सहस्रे शतप्रत्ययस्य व्याप्तिवशोद्भूतत्वात् अनुमानेऽन्तर्भावः। ऐतिह्यस्य इह वटे यक्षोस्तीत्यादि प्रसिद्धिमात्रस्य सत्यार्थत्वे आगमे अन्तर्भावः। यथाहुराचार्याः -

इह भवति शतादौ संभवाद्यसहस्रा
मतिरपि युगपत्त्वात् स्वानुमानादभिन्ना।
जगति बहु न तथ्य ऐक्यमैतिह्ययुक्तं
भवति तदपि सत्यं नागमाद्भिद्यते तत्।।

एवं सदुपलम्भकानि मानानि पञ्च। एषां योग्यस्याप्यनुपलभ्य-मानस्यार्थस्य अनुपलब्धिहेतुताभावानुभूतिरभावाख्यं षष्टं प्रमाणमिति केचित्। एषां वस्तुसद्भावबोधकत्वे समेप्यागमे विधिनिषेधवाक्ययोः विशेषमाह वाक्यमिष्टकृदिति प्रवर्तकमिति। स्वर्गकामो यजेतेति वाक्यं तु स्वर्गादिकामस्य तत्साधनभूतो यागादिरिति यागादिक्रियया इष्टसाधनत्वबोधनद्वारेण पुंसः प्रवर्तकं तथा आहुः उपलक्षणमेतत्। न कलञ्जं भक्षयेदिति निषेधवाक्यं कलञ्जभक्षणस्य अनिष्टसाधनत्व-बोधनद्वारेण पुंसः निवर्तकम्। तथाहुः -

हितं संप्रेप्सतां पुंसामहितञ्च जिहासताम्।
उपायान् प्राप्तिहानार्थान् शास्त्रं भासयतेऽर्कवत्।।

अन्यानि विधिप्रतिषेधवाक्यानि तत्त्वमस्यादीनि वस्तुमात्रबोधनपराण्येवेति शब्दे त्रिधा स्थितिः। इतराणि प्रमाणानि वस्तुमात्रमेव बोधयति। प्रमातुः पुंसः स तु प्रमिते इष्टसाधनमिति पूर्वाभ्यासवशात् ज्ञात्वा प्रवर्तते। अनिष्टसाधनमिति ज्ञात्वा निवर्तत इति वेदान्तमर्यादायां मानोक्तिदिक्।

अथैषां मानानां शब्द एव विशिष्टो दृष्टादृष्टोभयविषयत्वादित्याह-

चिन्मयस्य महसो महाप्रभः[20]
शब्दराशिरखिलार्थ भासतः[21]।
वस्तुनि व्यवहृतिर्न्न तं विना
लौकिकेपि नितरामतीन्द्रिये[22]।। 6 ।।

चिद्रूपस्य तेजसो ब्रह्मणः सूर्यस्येव प्रभावः सर्वमानानि तेषु प्रभास्थानीयो वेदादिशब्दराशिः अतीतानागतव्यवहितविप्रकृष्ट-पुण्यपापस्वर्गनरकब्रह्मात्मैक्याद्यशेषार्थद्योतकत्वात्। मानान्तराणि तु अल्पविषयत्वाद्विरलप्रभास्थानीयानीति भावः। किञ्च प्रत्यक्षादी-न्यप्येतदायत्तव्यवहाराणीत्याह- वस्तुनीति।.लौकिके प्रत्यक्षादिविषयेपि तं शब्दं विना व्यवहारस्यासंभवः। अयं घट इत्यादि जात्याद्यलिङ्गित-व्यवहारस्य संज्ञासंज्ञिसंबन्धोल्लेखपूर्वकत्वात् सुतरां शब्दं विनाऽसंभवः। अतो मानान्तरहेतुभ्यः शब्दो विशिष्टः।

ननु शब्दमानं मानान्तरेभ्योऽधिकमित्युक्तमयुक्तं वक्तुराप्तत्वा-वधारणसापेक्षत्वेन तत्प्रामाण्यस्य पराधीनतया लौकिकेषु वाक्येषु परत एव प्रामाण्यात्। वेदे तु वक्तुरेव अनङ्गीकारेणाप्रामाण्यादेवेत्याशङ्क्य अलौकिकेष्वपि वक्तुः आप्तत्वावधारणं अप्रामाण्यशङ्कानिरासार्थं न तु प्रामाण्यार्थम्। वेदे तु वक्तुरभावादनाप्तशङ्कापि नास्ति। तस्मात् नित्यसिद्धं प्रामाण्यमित्याह -

सर्वमेव वदत स्वगोचर-
ज्ञानमूलमिह लौकिकं वचः।
वक्तृदोषविगमात्प्रमाणता
नित्यमेव निगमे त्ववक्तृके[23]।। 7 ।।

लौकिकं वचः सन् नद्यास्तीरे फलानि सन्तीत्यादिकं लौकिकस्य वक्तुर्वाक्यम्। स्वस्य वाक्यस्य गोचरे विषये नदीतीरे फलसंभवादौ यद्वक्तुः प्रत्यक्षादिज्ञानं पूर्वोत्पन्नं तन्मूलम्। आप्तो हि नाम यथानुभूतार्थवादी तस्मादाप्तस्य वाक्ये वक्तृदोषाणां शब्दे संक्रान्तानां अज्ञानसंशय-रागद्वेषलोभादीनामसंभवे सति औत्सर्गिकमेव प्रामाण्यमवतिष्ठते इति लौकिकवाक्ये प्रामाण्यस्थितिः। वेदे तु नामप्रपञ्चान्तर्गतत्वेन ब्रह्मकार्येपि तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेद(बृ.2.4.10) इत्यादि श्रुत्यैवाप्रयत्नपूर्वकत्वोक्तौ वक्तव्या-र्थोपलब्धिपूर्वकरचनाकर्तुरभावात् अवक्तृके अपौरुषेये वक्तुरेवाभावात् प्रामाण्यापवादकानां वक्तृदोषाणां सुतरामसंभवात् नित्यमेव निरपवाद-मौत्सर्गिकमेव प्रामाण्यं सिद्धमित्यर्थः। उक्तञ्च भट्टाचार्यैः-

शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम्।
तदभावः क्वचित्तावत् गुणवद्वक्तृतत्त्वतः।।
तद्गुणैरुपकृष्टानां शब्दे संक्रान्त्यसंभवात्।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः[24]।। इति।

एवन्तावत् मानान्तरेभ्यः शाब्दमानमधिकम् इत्युक्तम्। सम्प्रति शब्दान्तरेभ्यो वेदस्याधिक्यमित्याह -

सूत्रभारतपुराणसंहिता -
धर्मशास्त्रमुखमार्षभाषितम्।
मानतां स्मृतितया प्रयाति यन् -
[25]मूलकं स निगमस्तु किं पुनः ।। 8 ।।

सूत्राणि यज्ञादिप्रयोगसूचनानि अश्वलायनीयापस्तम्भीयादीनि व्याकरणन्यायमीमांसादिशास्त्राणि च

भारतरामायणादीनि इतिहास-ब्राह्मपद्मादयोऽष्टादशपुराणसंहिताः सोपपुराणाः मन्वत्रिविष्णुहारीत-याज्ञवल्क्याद्युक्तानि।[26] मुखशब्देन सांख्य योग पाञ्चरात्र पाशुपताद्यागमाः प्रत्यक्षवेदाविरुद्धा ऋषिप्रणीता ग्राह्याः। एवमादि ऋषिवाक्यजातं यन्मूलकं यो वेदो मूलमस्येति वेदार्थं स्मृत्वा मन्वाद्यैः कृतत्वात् स्मृतिरिति स्मृतित्वेन प्रामाण्यं याति। स वेदः प्रमाणमिति किं पुनर्वक्तव्यम्। सिद्धमेव तस्य स्वतः प्रामाण्यमित्यर्थः।

यः कश्चित् कस्यचिद्ध र्मो मनुना परिकीर्त्तितः।
सः सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।
वेदबाह्याश्चस्मृतयो याः काश्चन कुदृष्टयः।
सर्वास्ताः निष्फलाः प्रेत्य तमो निष्ठा हि ता स्मृताः ।।

इति मनूक्तेः। तेन पाञ्चरात्रपाशुपतादि तन्त्रमार्गेषु ज्ञानकाण्डे न विप्रतिपत्तिः। कर्मभागे तु वेदविरुद्धांशस्तु गौतमशारद्वदादि बोधनाधिकारविषयः। तेषां कालेन शोधकः तथाहि कौर्मे तानधिकृत्य भगवतोक्तम् -

तस्माद्वै वेदवाक्यानां रक्षणाय च पापिनाम्।
विमोहनाय शास्त्राणि[27] करिष्यामो वृषध्वज।। (कू.पु.1.15.111)
एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः।।
(कू.पु.1.15.112)
कापालं लाङ्गुलं वामं भैरवं पूर्वपश्चिमम्।
पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः।। (कू. पु.1.15.113)
सृष्ट्वा तानाह[28] निर्वेदाः कुर्वाणाः शास्त्रचोदितम्[29]।
पतन्तो नरके[30] घोरे बहून् कल्पान् पुनः पुनः।।(कू.पु.1.15.114)
जायन्तो मानुषे लोके क्षीणपापचयास्ततः।

ईश्वराराधनबलाद् गच्छध्वं सुकृतां गतिम्(कू.पु.1.15.115) इति।

सांख्ययोगः पाञ्चरात्रं वेदाः पाशुपतं तथा।

एतान्यपि प्रमाणानि त्वहन्तव्यानि हेतुभिः।। इति भारतोक्तेः। सा तु तत्तदधिकारिणां ज्ञाने सञ्जाते सति तत्प्रापकमार्गभेदेपि कालेन प्राप्यं वस्त्वेकमेवेति दर्शयितुं न तु सर्वेषां सर्वतन्त्रांशे वेदाविरुद्धत्वं समर्थयितुं भारत एव 'किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुनेः' इति प्रश्नस्य-

सर्वेष्वपि मुनिश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते।

यथागमं यथान्यायं निष्ठा नारायणः परः।।

इति उत्तरोक्तेः। अतो वैदिकेन च कर्मणा वेदाविरुद्धतान्त्रिकं परमेश्वराराधनं समुच्चीयत इति निश्चयः।

ननु वाक्यमिष्टकृदिति प्रवर्तकमित्यत्र प्रवर्तकं निवर्तकं सिद्धार्थबोधकं चेति वाक्ये त्रिधा स्थितिः इत्युक्तम्। सिद्धार्थे तु प्रामाण्यं नोपलभ्यते प्रवृत्तिनिवृत्तिदर्शनमूलत्वात् बालव्युत्पत्तेः। बालो हि प्रयोजकस्योत्तमवृद्धस्य गामानयेति वाक्यं श्रुत्वा प्रयोज्यस्य मध्यमवृद्धस्य गवानयनविषयां प्रवृत्तिं दृष्टवा गवानयनप्रवर्तनमनेन वाक्येन मध्यमवृद्धेन ज्ञातमिति समुदायार्थं वेत्ति न पुनः क्रियाकारकयोः वाचकांगविशेषं तथा स एव गां बधानेति बाक्यश्रवणानन्तरं तस्य गोबन्धनविषयां प्रवृत्तिं दृष्ट्वा गोबन्धनप्रवर्तकत्वमस्य वाक्यस्यानेन ज्ञातमिति विदित्वा पुनश्चैनं निश्चिनोति गोशब्दानुवृत्तौ गवार्थप्रतीतेः अनुवृत्तिः दृश्यते। आनयनशब्दव्यावृत्तौ च आनयनार्थो व्यावर्त्यते। तथा अश्वं बधानेति वाक्यश्रवणेन बधान पदानुवृत्तौ च अश्वबन्धने प्रवृत्तिरनुवर्तते। गोपदव्यावृत्या गवार्थप्रवृत्तिश्च निवर्तते। तेनैवमन्वयव्यतिरेकाभ्यां गोशब्दस्य सास्नादिमान् पशुरित्यर्थः। अश्वशब्दस्य तु केसरादिमान् एवमानयनपदस्यापि स्वसमीपप्रापणमित्यर्थः। बधान पदस्यापि

संयमनमित्यर्थः, एवं गमने प्रवृत्तस्य मा गम इति न गच्छेति वाक्यश्रवणात् तस्य गमननिवृत्तिं दृष्ट्वा स एव मा शयिष्ठा इत्यादि वाक्यश्रवणात् शयनादिप्रवृत्तस्य तस्य निवृत्तिं च दृष्ट्वा माङादि शब्दानुवृत्तौ तत्तत्क्रियानिवृत्तिदर्शनात् माङादेः निषेधत्वं तन्निषेधात् क्रियावाचिपदानान्तु स्वाभाविकप्रवृत्तिविषयक्रियानुवादकत्वञ्च निश्चिनोति। तेन सिद्धार्थेषु वाक्येषु प्रवृत्तिनिवृत्योरसंभवात् व्युत्पत्तेरेवासंभवात् सिद्धानां च अर्थानां कादाचित्कतया नित्यवेदविषयत्वसंभवाच्च सिद्धार्थवेदवाक्यानाम् अप्रामाण्यम्। 'सोऽरोदीत्' इत्येवमादीनां तु विधिनिषेधशेषतया तत्कार्यस्तुतिनिन्दापरत्वेन प्रामाण्यम्। 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति जैमिनीयोक्तेश्च न सिद्धार्थे प्रामाण्यमित्याशङ्क्य त्रिविधस्यापि वेदस्य प्रामाण्यमेकधैवेत्याह -

लिङ् पदादिवदशेषमेव यो-
ग्येतरान्वितनिजार्थदं पदम्।
दृश्यते हि स निधिर्वसुन्धरे -
त्यादि पुत्र उदितस्तवेति च ।। 9 ।।

विधिनिमन्त्रणादिषु लिङ् लोट् तव्यप्रत्ययान्तानि पदानि यथा कुर्वीतेति लिङन्तं कुरुतां लोडन्तं करेत् लेडन्तं छान्दसं कर्तव्यं कार्यमित्यादि कृत्यप्रत्ययान्तानि पदानि। एतानि साध्यक्रियावाचकानि लिङन्तादीनि पदानि वाक्यगताकांक्षासन्निधियोग्यतावशात् पदान्तरोक्तैः पदार्थान्तरैरन्वितमेव स्वार्थं बोधयन्ति इत्यभ्युपेयम्। न तु साध्यार्थैरेवेति निर्बन्धनीयम्। न च लिङादीनां साध्यार्थवाचित्वात् अन्यान्वितार्थबोधकत्वं अन्येषां तु लिङाद्युक्तकार्यान्वितस्वार्थबोधकत्वमिति कल्पनीयम्। कल्पनागौरवाददर्द्धवैशसादि दोषापत्तेः सिद्धेपि प्रामाण्यसंभवाच्चेत्यर्थः। तथा तत्संभवं दर्शयति - दृश्यते हि इति। यथा गामानय इत्यादि वाक्यैः

साध्यार्थप्राधान्येन इतरेषामन्वयो बोध्यः। एवं निधिमानेष भूभागः, पुत्रस्ते जात इत्यादीन्यपि वाक्यानि सिद्धरूपमबाधितमेव स्वार्थं बोधयन्त्येव, दृश्यन्ते व्युत्पत्तिकाले साध्यान्वितवाक्येषु व्युत्पन्नस्यापि वाक्यान्तरेणापि साध्यत्वलक्षणस्य पदार्थविशेषणस्य विवक्षितत्वे प्रमाणाभावात् स्वार्थबोधनं न विरुद्ध्यते न च साध्यार्थेष्वेव वाक्येषु व्युत्पत्तिरित्यस्ति नियमः। देवदत्तस्य गृहे पुत्रजन्म जानतो बालस्य पुत्रस्ते जात इति बन्धुवाक्यश्रवणानन्तरं तत्पितुः मुखविकासादि हर्षलिङ्गमनन्यसिद्धं पश्यतः सामान्येन पुत्रजन्मबोधकत्वं वाक्यस्य बुद्ध्यतः क्षणान्तरे तस्यैव स्नपनं पश्यतः पुत्रस्ते स्नापित इति बन्ध्वन्तरवाक्यान्तरेण पुत्रजन्मस्नपनशब्दार्थे व्युत्पत्तिर्दृश्यत इति भावः। अतो जैमिनिवाक्यं विधिप्रकरणस्थानां सिद्धार्थानां पदानां वाक्यानां च तच्छेषत्वोक्तिपरं न तु स्वतन्त्राणां तत्त्वमसीत्यादि वाक्यानामिति विवेक्तव्यम्। विधिना त्वेकवाक्यत्वादिति तेनैव विशेषितत्वादित्यर्थः। उक्तं च -

अधिचोदनं[32] यत्राम्नायस्तत्रैव स्यात् क्रियार्थता।
तत्त्वमस्यादि वाक्यानां ब्रूत[33] कर्मार्थता कथम्।।

अतः सर्वेषामपि पदानामन्यान्वितस्वार्थबोधकत्वमेवेति न्यायः ।

ननु सिद्धार्थानां लौकिकवाक्यानां हानोपादानयोग्यवस्तुबोधकतया साफल्यं वेदान्तवाक्यानां च अहेयानुपादेयब्रह्मस्वरूपमात्र[34]-निष्ठत्वेन नैष्फल्यात् मुक्तिसाधनभूतं तद्विषयज्ञानं विधीयते तद्ब्रह्म तद्विजिज्ञासस्वेत्यादौ तद्विधिदर्शनात् अतः तद्विधिविधुरेष्वपि तत्त्वमसीत्यादि वाक्येषु तद्विद्धि तत् बुद्ध्यस्व जिज्ञासस्वेत्यादिकं ज्ञानविधायकं पदं अध्याहृत्य विधिपरतैवांगीकार्येत्याशंक्य परिहरति-

35
नात्रबोधविधिकल्पनोचिता

संविदो न कृतिसाध्यता यतः

दृश्यतादि निगमस्तु वक्ति मु-

ग्धात्मन श्रुतिजदर्शनार्हता।। 10 ।।

अत्र वेदान्तवाक्येषु मानसव्यापाररूपोपासनालक्षणस्य प्रमाणरूपस्य वा बोधस्य विधिरध्याहाराद्यैः कल्पयितुं न युक्तः। कुतः? नेदं यदिदमुपासते (के.1.5) इत्युपास्यत्वस्य ब्रह्मणि श्रुत्यैव निरस्तत्वादित्याशयेन तत्पक्षमुपेक्ष्य प्रमाणविधिपक्षं दूषयति - संविद इति। संविदः प्रमाणात्मिकाया स्वसाधनभूतादिन्द्रियार्थ सन्निकर्षाच्छब्द-लिङ्गादिज्ञानाच्च स्वयमाविर्भवन्त्याः प्रमातुरिच्छायाः प्रयत्नविशेषाधीन स्वरूपलाभत्वनियमाभावान्न कृतिसाध्यता। तद्धि कर्मज्ञानचिकीर्षा-प्रयत्नाधारेण कर्त्रा कर्तुमकर्तुमन्यथा कर्तुं शक्यं इच्छाज्ञानादिव्यतिरिक्तं कार्यं घटादिकं तदेव चोदितेन कर्त्रा स्वतन्त्रेण वा साध्यं न तु ज्ञानम्। तथाहि शीतोष्णदुर्गन्धादिविषयं प्रत्यक्षज्ञानं तथा वाक्यजन्यमपि पुत्रजन्मेष्टवियोगादिविषयं लिंगादिदर्शनमनुमानादि ज्ञानं च न स्वोत्पत्त्यर्थं तद्विधिं तज्ज्ञानं तज्जिज्ञासां तत्प्रयत्नं वाऽपेक्ष्य जायते। किन्तु सामग्रीबलादेव अतोऽत्र बोधे विधिकल्पनानवकाशं येषु तु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्य (बृ.2.4.5) इत्यादिषु विधिवन्निगमा दृश्यन्ते तेष्वपि दर्शनस्याविधेयत्वात् तत्साधनभूतश्रवणादिकर्माण्येव विधीयन्त इत्याह - दृश्यतादीति। द्रष्टव्यतादि विधिसरूपं वाक्यजातन्तु मुग्धात्मनः अनधिगतात्मयाथात्म्यस्य 'तरति शोकमात्मविदित्यादि (छा.7.1.3) वाक्यश्रवणात् ज्ञातात्मजिज्ञासस्याधिकारिणा मनन निदिध्यासनांगकश्रवणार्थस्य दर्शनस्यानात्मनि वर्तनद्वारेणोपासकस्य योग्यः परमात्मेति बोधयति। अनात्मदर्शनेनैव परमात्मनि रतिः प्रशस्तेति श्रुतिः

दर्शयतीत्यर्थः। उक्तं च अनात्मदर्शनेनैव परमात्मानमुपास्मह इति। अतो वेदान्तवाक्येषु सिद्धार्थेषु न विधिः कल्प्यः।

यस्मादेवन्तस्मात् -

मानमात्मनि विधिच्युतोपिसि-
द्धार्थ औपनिषदस्समन्वयः।
कर्मतात्मनि च नो चतुर्विधा
वेद्यतापि न भवेत्स्वयंप्रभे।। 11 ।।

उक्तहेतोरौपनिषदः समन्वयो विधिच्युतोपि सिद्धार्थे स्वात्मनि मानं भवतीत्यन्वयः। नानाशाखासु विप्रकीर्णा विधिवाचकलिङ्गादिशून्या अपि उपनिषदः सिद्धार्थे एकस्मिन्नेवात्मनि ब्रह्मणि संहिताः तात्पर्येण ऐककण्ठ्येन समनुगताः[36] सत्यः प्रमाणं भवति। एतेन समन्वयपदोपादानेन ब्रह्मात्मैक्यप्रतिपादकवेदान्तवाक्यविचारः कार्यः। ब्रह्म जगत्कारणत्वादि लक्ष्यं शुद्धं तदुपनिषच्छास्त्रैकसमधिगम्यम्। उपनिषदां च ब्रह्मण्येव समन्वय इत्यर्थात्। अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तुसमन्वयात् इति चतुःसूत्री च सूचितार्था ज्ञेया। प्रसिद्धक्रियावैलक्षण्याच्च आत्मविधिर्न्नाभ्युपेय इत्याह - कर्मतात्मनि च नो चतुर्विधेति। उत्पाद्यं प्राप्यं विकार्यं संस्कार्यं च क्रियाफलं चतुर्विधं नैवात्मा। स हि नित्यसिद्धत्वात् घटादिवदनुत्पाद्यः, सर्वगततया नित्यप्राप्तत्वात् ग्रमादिवदप्राप्यम्। सदैकरूपचिन्मात्रत्वात् क्षीरादिवदविकार्यः, निरञ्जनतया गुणदोषसंगानर्हत्वात् रक्तदर्पणादि-वदसंस्कार्यः[37]। संस्कारो हि सिद्धस्य गुणाधानेन दोषापनयनेन वा जन्योतिशयः[38]। ननु मा भूदात्मनि क्रियाजन्योतिशयः ज्ञानजन्यं तत्रावश्याभ्युपेयं एवं अन्यथाज्ञानस्य आत्मनोज्ञानार्थं श्रवणादि-विधिवैय्यर्थ्यमिति अत आह - वेद्यतापीति। वेद्यता संविदः कर्मता कर्मभावेन

विषयत्वं न भवेत्। स्वप्रकाशत्वेन संवित्स्वभावत्वादात्मन इत्यर्थः।

यद्यपि स्वप्रकाशादात्मनः प्रमाणजन्यप्रकाशात्मकत्वातिशयापेक्षा नास्ति तथापि तस्मिन् प्रकाशमान एव प्रकाशत इति व्यवहारयोग्यता अनात्मनोहंकारादेरात्मन्यध्यासस्य तदधीनस्य च संसारस्य च निर्वाहिता मायां तु प्रकृतिं विद्यान् मायिनन्तु महेश्वरं (श्वे.4.10) इत्यादि श्रुतिसिद्धा मामहन्न जानामि इत्यनुभूता च सकलानर्थस्य हेतुरविद्या तन्निवृत्ति-लक्षणफलाभावे वेद्यत्वव्यवहारः यस्यामतं तस्य मतं मतं यस्य न वेद स (के.2.3) इत्यादि श्रुतेरात्मनः कर्मत्वाभावेपि विषयत्वस्य दर्शनादित्यभिप्रेत्याह-

39

किन्त्वनात्मविनिवर्तनामुखात्

सिद्धमेवन्निजवस्तु लक्षयत्।

तत्क्षमं श्रुतिवचोपि तत्त्वमि -

त्यादि जीवपरमैक्य बोधने।। 12 ।।

सत्यं स्वप्रकाशे ब्रह्मणि वाक्यार्थज्ञानजन्यप्रकाशात्मकातिशयो नास्माभिरभ्युपगम्यत एव किन्तु स्वात्मनि वस्तुतासंगचिद्रूपे स्वयं प्रकाशेपि यदनात्मजातमहमादि देहान्तं आत्मतया प्रतीयते तत्सर्वं अनादेः आत्मानवबोधमात्रादात्मन्यध्यस्तमवास्तवमिति बोधयच्छ्रुतिवाक्यं 'य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत् सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेंष्ठव्यः स विजिज्ञासितव्यः(बृ.8.7.1) तथानन्वागतं पुण्येनन्वागतं पापेन (बृ.4.3.22) तथा अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः (छा.8.12.3) इत्यादिकं अर्थादात्मा न त्वहंकारादिपरिच्छिन्नः-संसारी किन्तु तदेवाव्ययं परं ब्रह्मेति जीवोपक्रमं परमात्मानं बोधयति। तथा सदेव सोम्येदमग्र आसीदित्युपक्रम्य (छा.6.2.1) जगत्कारणत्वं तस्य प्रपञ्च्य ऐतदात्म्यमिदं

सर्वं तत्सत्यमिति कारणत्वोपलक्षितस्य सन्मात्रस्य वास्तवं निष्प्रपञ्चत्वमर्थादुक्त्वा स आत्मा तत्त्वमसीति (छा.6.8.7) परमात्मोपक्रमं जीवान्तं जीवब्रह्मैक्यं बोधयति। तथा तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं,(बृ.2.5.19) तथा अस्थूलमनण्व-ह्रस्वमदीर्घमिति (बृ.3.8.8) कारणे निष्प्रपञ्चतन्निर्णयात् असङ्गोह्ययं पुरुषः (बृ.4.3.15) इति जीवे नित्यमसंसक्तात्मतां च बोधयदुभयोरैक्यमेव बोधयति। एवन्तत्तच्छाखोपनिषत्स्वाम्नायमहावाक्यजातं जीवे ईश्वरे वोभयोर्वाऽनात्मजातन्निवर्तयत् कल्पित भेदाद्यपनयेन पारमार्थिकं सिद्धमैक्यमेव बोधयितुं समर्थमित्यर्थः। एतेन अहेयानुपादेयेपि ब्रह्मात्मनि विधिं विनापि तात्पर्येण वर्त्तमानानां वेदान्तानां ब्रह्मानवबोधहेतुके संसाराद्यनर्थनिवर्तकत्वेन साफल्यं यथा रज्जुरियमित्याप्तवाक्यस्य सर्पभ्रमबाधकस्य तज्जन्यशङ्काविषभयकम्पनाद्यनर्थनिवर्तकत्वेन साफल्यमित्युक्तं भवति।

एवं प्रस्तुतमहावाक्यस्य सिद्धेऽर्थे प्रतिपादनक्रियां पञ्चश्लोक्या वक्ष्यन् आदौ तत्पदादीनां वाच्यार्थं निदर्शयति -

मुख्यतत्त्वमिह जीव उच्यते[40]
तत्पदेन जगदादिरीश्वरः।
एतयोरसिपदेन चैकता
ब्रह्मचित्सुखमखण्डमस्पंदः[41]।। 13 ।।

त्वमिति पदेन वाक्यार्थं शुश्रूषुश्चेतनो जीव उच्यते। तत्पदेन सदेव सोम्येद (छा.6.2.1) मित्यादिषु प्रकृतजगत्कारणं ब्रह्मोच्यते, तदेवेश्वरश्च। सोऽयं देवतैक्षतेति (छा.6.3.2) देवतापदेनोक्तो

'यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत।। (मु.1.1.9)

इति श्रुत्यन्तराच्च स्वप्नप्रपञ्चस्य तद्रष्टेव जगत उपादानत्वेन निमित्तत्वेन च कारणं सदेवेत्यर्थः। एतयोर्जीवेश्वरयोः[42] एकता भेदाभावः सोऽसि पदेनोच्यते। एषां पदानां समन्वयेयं वाक्यार्थः सम्पत्स्यत[43] इत्याह - ब्रह्मचित्सुखमखण्डमस्म्यद इति। अतः प्रकृतमद्वितीयं प्रत्यग्बोधपरानन्दात्मकं वस्तु भवति वाक्यार्थ इत्यर्थः। जीवस्य हि ब्रह्मभावोऽत्र बोध्यते, त्वं तदेव भवसि न ततोऽन्य इति वाक्यार्थश्च संग्रहेणोक्तो ज्ञेयः।

तत्र जीवपदार्थं विवेचयति -

स्वात्मनीदमहमादिमोहतोऽ-
ध्यस्त तत्र च तमप्ययोग्निवत्[44]।
तेन चैक्यमथ भोक्तृतां यतः
प्रत्यगात्मन उशन्ति जीवताम्।। 14 ।।

मोहतः स्वात्मानवबोधादनादेरिदमनिदं प्रतीतितो रूपमपि निरूप्यमाणे दृश्यत्वात् वस्तुत इदं रूपं यदहमादिकं देहान्तरमनात्मजातं तत्सत्ये प्रत्यगात्मनि अध्यस्य अविद्यया तादात्म्येन बुद्ध्वा स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः तथात्र तत्र च अहमादौ अनात्मवर्गे स्वात्मानमध्यस्य यथा अयस्याग्निदाहकप्रकाशगुणं अग्नौ च अयःपिण्डत्व दाह्यत्वादिगुणमितरेतरैक्येनाध्यस्यति लोकः। तथा इतरेतरधर्मिणो धर्माणाञ्चाध्यस्य तथा तेनाहमादिना वास्तवमेकीभावं च गत्वानन्तरं भोक्तृताज्ञातृत्वशक्तिं च यतो गच्छतः अनाद्यविद्यया संसारत इत्यर्थः। तस्य प्रत्यगात्मन एव जीवभावमिच्छति विवेकिनो वैदिकाः आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति कठश्रुतेः (1.3.4.)। ममैवांशो जीवलोके जीवभूतः सनातन इति गीतोक्तेश्च। (15 . 7)। अंशपदमंशपदव्यपदेशः। आत्माह्यपरिच्छिन्नोपि अहमाख्यबुद्ध्युपाधौ परिच्छिन्नवत् भाति। तदुक्तं

बादरायणेन पाराशर्येण भिक्षुसूत्रकारेण तद्गुणसारत्वात्तद्व्यपदेशः, प्रज्ञवदिति नैष्कर्म्यसिद्धौ।

अथेश्वरपदार्थं विवेचयति-

सच्चिदद्वयसुखात्मकः परो
दृश्यतादिगुणतः समस्तवत्[45]।
मामयान्य इव सर्वशक्तिकः[46]
सर्वकारणमहेतुरीश्वरः।। 15 ।।

यत् सत्यज्ञानानन्तादिलक्षणः परः सर्वतः उत्कृष्टः अदृश्यत्वादि-गुणतः यत्तदद्रेश्यमग्राह्यं (मु.1.1.6) इत्यादि परविद्याश्रुत्युक्तगुणः सर्वशक्तितः सर्वत्र शक्तिरस्य सर्वात्मिका शक्तिरस्येति वा अतो मायाख्यया शक्त्यावृतत्वात् जीव परमात्मनोऽन्य इव व्यवहारः। सर्वस्य कारणं उपादानं निमित्तं च स्वयं हेतुरहितः

सकारणं कारणकारणाधिपो
न चास्य कश्चिज्जनिता न चाधिप (श्वे.6.9) इति श्रुतेः।

स एवं विधः परमात्मैव ईश्वरशब्दवाच्यः ईश्वरः स एव जीवस्यात्मा भवतीति असि पदार्थोप्येकतारूपो व्याख्यातो ज्ञेयः।

एवं प्रसिद्धयोः तत्त्वं पदाभिधेययोः सामानाधिकरण्ये विरोधेनान्वयासंभवात् अत्र लक्षणावृत्तिराश्रयणीयेत्याह -

भिन्नदुःखिकृपणानिदन्तया-
नन्तसौख्यभगवत्परात्तया।
नैकता हि घटतेर्थयोरतः
सोयमादिवदिहार्धलक्षणा।। 16 ।।

प्रतिशरीरं भिन्नत्वं दुःखादिमत्वं अनीश्वरत्वं द्रष्टृत्वमित्यादिभिः

स्वानुभवसिद्धैः धर्मैरुपेतस्य जीवस्य त्वं पदार्थस्य त्रिविधपरिच्छेदराहित्यं परमानन्दत्वं ज्ञानैश्वर्यादिकल्याणगुणत्वं दृश्यत्वमित्याद्यैः शास्त्रसिद्धैः धर्मैर्युक्तस्येश्वरस्य तत्पदार्थस्येत्यनयोः विरुद्धधर्मवत्वात् तादात्म्यं यस्मान्न संभवति ततः कारणादिह वाक्ये लक्षणा आश्रयणीयेति शेषः। सा चात्र सोऽयं देवदत्त इत्यादि वाक्येष्विव अभिधेयांशापरित्यागात् प्रत्यासन्नेति भागलक्षणा नाम संभवति। त्रिविधा हि लक्षणा - जहत्स्वार्था, अजहत्स्वार्था, जगदजहत्स्वार्था चेति। तत्र गङ्गायां घोषः प्रतिवसतीत्यत्र वाक्ये गङ्गा शब्दः स्वार्थं प्रवाहं त्यजत् तत्तीरं लक्षयतीति जहल्लक्षणा। कुन्ताः प्रविशन्ति इत्यत्र कुन्तशब्दः स्वार्धमत्यजन्नेव तद्धारिणः पुरुषान् लक्षयतीत्यजहल्लक्षणा। सोऽयं देवदत्त इत्यादिषु वाक्येषु अतीतदेश-कालादिविशिष्टद्रव्याभिधायी स इति शब्दः वर्तमानकालविशिष्ट-द्रव्याभिधायी अयमिति शब्दश्च विशिष्टयोः स्वार्थयोः विरुद्धौ विशेषणांशौ परित्यजन्तौ अविरुद्धं विशेष्यं देवदत्तमात्रं लक्षयत इति जगदजहल्लक्षणा। एषैव भागलक्षणाख्या।

एतदेव विवृणोति -

मुख्यबाध उचितं हि मुख्यसं -
बन्धिलक्ष्यमिह तत्त्वमर्थयोः।
लक्ष्यमुज्झितपरोक्षताभिदं
ज्ञानमद्वयसुखानिदं निजम्।। 17 ।।

मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे मुख्यार्थेनाविनाभूते प्रतीतिः लक्षणोच्यते।। तत्त्वमस्यादि वाक्येषु लक्षणा भागलक्षणा। सोऽयमस्तीति वाक्यवाक्यस्थ पदयोरिव नापरेति वाक्यवृत्युक्तन्यायोत्र प्रदर्श्यते। वाक्यगतपदस्य यो मुख्यार्थः तस्य बाधे असंभवे वाक्यार्थान्वयायोग्यत्वे सति तस्य पदस्य मुख्यार्थेन संबन्धमुचितम्। वाक्यार्थनिष्पत्तौ

पदार्थान्तरत्वेनान्वेतुं योग्यश्च यत्तदेव खलु लक्षयितुं योग्यम्। इह च महावाक्ये तदर्थस्याद्वयानन्दलक्षणस्य परोक्षतादिधर्मिणः त्वमर्थस्य च प्रत्यक्बोधलक्षणस्य भेदादिधर्मिणः परस्परान्वयासंभवात् तदर्थविरुद्धं जीवाज्ञाननिबन्धनं द्रष्टृदोषकृतशंखपीतिमानमिव पारोक्ष्यादिकं प्रोक्तमर्थे च तादृशं भेदादिकं संत्यज्य तदर्थेऽद्वयानन्दांशं च त्वमर्थे चापरोक्षात् बोधमात्रं निजमुपादाय तत्त्वंशब्दौ परस्परलक्ष्यार्थान्वितं स्वार्थमात्मानं बोधयतः। तद्यथा तच्छब्द अद्वयानन्दं प्रत्यक्बोधत्वेन त्वं शब्दश्च प्रत्यक्बोधमद्वयानन्दत्वेन असि शब्दस्तु पदार्थयोस्त्याज्यांशानां आविद्यत्वं बोधयति। त्वं ब्रह्मासीति तावत् ब्रह्मत्वमाविद्यमित्यर्थः। एवञ्च महावाक्यस्य एक एव आत्मा स्वप्रकाशाद्वयानन्दरूपोर्थः सिद्धम्। विश्वरूपोक्तिर्हि -

तदर्थयोस्तु निष्ठात्माद्वयपारोक्ष्यवर्जितः।
नाद्वितीयं विनात्मानं नात्मा नित्यदृशा विना।।

वाक्यवृत्तिश्च -

प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः।। 39 ।।
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि।। 40 ।।
तदर्थस्य च पारोक्ष्यं यद्येव किं ततः श्रुणु।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते।। 41 ।।

ननु यद्यपि लक्षणाद्वारेण वाक्यस्य बोधकत्वं तथापि संसर्गो व्यवच्छेदो वा वाक्यार्थोऽभ्युपेतव्यः। उभयथाप्यात्मनोऽखण्डैकरसत्वं व्याहन्येतेत्याशङ्क्य परिहरति-

स्वप्रभे विगुणजातिकेन सं -

सृष्टता न च विशिष्टतात्मनि।

सम्पदादिभिरखण्डधीर्यथा

सुप्रकाश इन इत्युदाहृतौ।। 18 ।।

स्वप्रकाशतया जातिगुणद्रव्यसंज्ञादिजडधर्मराहित्यात् आत्मनि नदीतीरादि वाक्ये फलसंसर्गवत् न संसर्गो नीलोत्पलादिवाक्ये नीलान्वयद्वारा शुक्लादिव्यावृत्तिवत् न विशेषो वात्र वाक्यार्थः। किन्तु 'प्रकृष्टप्रकाशः सूर्य' इति वाक्य इव भिन्नप्रवृत्तिनिमित्तैरपर्यायश शब्दैः सत्यज्ञानादिभिरद्वितीयमसाधारणरूपमात्मनो बोध्यते। तथाहि प्रकृष्टप्रकाशः सूर्यः इत्यस्मिन् वाक्ये प्रकृष्टशब्दो जात्यादेरवाचकोपि सूर्यस्य तेजोन्तरेभ्यो व्यावृत्तिं वक्ति तथा प्रकाशशब्दोपि सूर्यव्यतिरिक्तस्य गुणाद्यात्मनः प्रकाशस्याभावेपि प्रकर्षोपाधिपरिच्छिन्नस्वरूपमेव अर्कस्य वदन्नर्थवान् सूर्यशब्दश्च विशेष्यसूर्यवाची सफलः। एवं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि (तै.2.1) वाक्येपि ब्रह्मशब्दो विशेष्यब्रह्मसमर्पकः। सत्य शब्दश्च द्रव्यादीनां सर्वेषां सत्यत्वमभ्युपगच्छतः तस्यापि द्रव्यादिव्यतिरिक्तवस्त्वन्तरानभ्युपगमाद् अनृतविरोधित्वलक्षणं स्वरूपमेव वक्तीत्यभ्युपेयम्। तथा ज्ञानशब्दोपि स्वयंप्रकाशे ज्ञाने सामान्य-विशेषाभावात् जडविरोधिस्वरूपमेव वक्ति। यद्यपि ज्ञाने जातिः तार्किकैरिष्यते तथापि जाते बुद्धिवृत्यात्मकजडांशाश्रयत्वात् जडांशं परित्यज्य चिदंशमविरुद्धं भागलक्षणयोपादत्ते। एवं विज्ञानमानन्दं ब्रह्मेति (बृ.3.9.28) वाक्यान्तरस्थ आनन्दशब्दो वैषयिके सुखे रूढः तत्परिच्छेदभेदमौपाधिकं विधाय दुःखविरोधिरूपमेव बोधयति। अनन्तशब्दस्तु त्रिविधपरिच्छेदराहित्यमेव वक्ति। एवमेते शब्दाः पदार्थान्तरान्वितान् स्वार्थान् अभिदधतोऽखण्डैकरसे वस्तुनि पर्यवस्यतीति सर्वं सुस्थम्। एवं निश्चितार्थस्य तत्पदस्य त्वं पदेनान्वयेनापि अनेनैव न्यायेन प्रागुक्ता भागलक्षणा ज्ञेया।

संक्षेपशारीरकेप्येवं निर्दिष्टं वस्तु।

एवं प्रकारेण सिद्धार्थमनुभवसौकर्यार्थं संगृह्याह -

तत्त्वमादि स य आदितद्य आ -
द्यागमेषु हि मिथस्तदात्मता।
ब्रह्मणो मम च तत्सदास्म्यहं
प्रत्यगात्मचिदनन्तसत्सुखम्।। 19 ।।

छान्दोग्ये तत्त्वमसीत्यादौ तैत्तिरीयके स यश्चायं पुरुषे यश्चासावादित्ये स एकः (तै.2.8) ऐतरेयके स यो श्रुतो गतो मतो नतो दृष्टोऽपि ज्ञातो नादिष्टः श्रोता मन्ता द्रष्टा देष्टा घोष्टा विज्ञाता सर्वेषां भूतानाम् अन्तरपुरुषः सम आत्मेति विद्यादित्यादौ वाजसनेयके अहं ब्रह्मास्मीत्यनुभवं प्रक्रम्य तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादौ (वा.3.1.4.10) ऐतरेयके तद्योहं सोऽसौ योऽसौ सोऽहमित्यादौ एवं सर्ववेदान्तेषु जीवब्रह्मणोः परस्परतादात्म्यमुक्तं यस्मात्तस्मादेव प्रत्यगात्मचैतन्यमनन्तानन्दसन्मात्रं ब्रह्मैवाहमेव तद् ब्रह्मेत्येवमात्मानुभवनिष्ठं सर्वे वेदान्ता इति प्रसिद्धम्।

एतदेव सत्यज्ञानादिलक्षणं ब्रह्म निष्कलं ब्रह्म विद्याप्राप्तये कामिनां तत्फलाय च मायोपाधिकं सद् विष्णुनारायणवासुदेवादि-शब्दैर्वाच्यम्। ज्ञानशक्त्यादिषड्गुणैस्तथा शिवेशरुद्रादिशब्दैः सर्वज्ञतादिषडंगैः तथा प्राणप्रजापति हिरण्यगर्भादिशब्दैः निरुक्त त्रयी समष्ट्याद्यैः धर्मैर्विशिष्टमिति वेदे तन्त्रे तदुभयमूलके पुराणे च तत्तद् भक्तानामुपास्यत्वेन चोच्यत इत्याह-

सच्चिदित्यखिलहेतुरित्यपि
स्वात्मलक्षणतटस्थलक्षणैः।
स्वात्मनस्सुखचिदात्मतादिवत्

तस्य षड्गुणषडङ्गताद्यपि।। 20 ।।

यल्लक्ष्यस्य स्वरूपमेव संलक्षयति तद् स्वरूपलक्षणम्। यथा- प्रकृष्टप्रकाशः चन्द्र इति। यत्तु लक्ष्यस्य स्वरूपात् बर्हिभूतं सल्लक्षयति तत्तटस्थलक्षणम्। यथा - शाखाग्रे चन्द्र इति। इह तु सत्यं ज्ञानमित्यादीनि स्वरूपलक्षणानि। यतो वा इमानि भूतानि जायन्त (तै.3.1) इत्यादीनि तटस्थलक्षणानि। एवं उभयविधलक्षणाभ्यां प्रत्यगात्मनः सुखचिदात्मता यथा प्रमिता एवं तस्यैवात्मनः त्रिगुणमायोपाधिकस्योपास्यत्वेन चोदितस्य रजोगुणप्रधाने हिरण्यगर्भत्वे त्रयीमयत्वं सर्वहेतुतया सर्वविभक्तत्वेन अनिरुक्तो वै प्रजापतिरिति श्रुतिसिद्धमनिरुक्तत्वं च सत्वप्रधाने विष्णुत्वे षड्गुणत्वं सर्वात्मकञ्च तमः प्रधाने महेश्वरत्वे षडंगत्वं सर्वनियामकत्वं च इत्यादि धर्मविशिष्टतयोपास्यत्वं ज्ञेयम्। एतेन वेदाविरुद्धानां सांख्ययोगपाञ्चरात्रपाशुपतादीनां सदागमादीनां स्वार्थे प्रामाण्यात् साकांक्षाणामन्यतः पूरणमिति न्यायाच्च वेदपुराणादिषु अदृष्टापेक्षिता गाः तत्तत् शास्त्रेभ्यो ग्राह्या इत्युक्तं भवति। अयं च अनन्तरवक्ष्यमाण- देवताविंशिका प्रस्तावश्च तेन देवतायां ये गुणास्ते सकामानां मुख्यया वृत्त्या ग्राह्याः। निष्कामैः तत्तद्गुणवाचिपदैः तत्तदर्थोपि तया लक्षणया वृत्त्या तेषां पदानां सच्चित्सुखात्मकत्वे अन्तर्भावः कार्यः। तदन्तर्भावश्च वक्ष्यते अतोऽत्र नोक्तः। तेन कारणेन तत्तद्गुणद्वारा सत्यज्ञानानन्दलक्षणं ब्रह्मैवेत्युपास्यमित्येवं सिद्धम्।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।
स्वात्मयोगप्रदीपे स्वे तुर्यां वाक्यार्थविंशिकाम्।।

इत्यमरानन्दयोगीश्वरकृतौ स्वात्मयोगप्रदीपप्रबोधिन्यां वाक्यार्थविंशिका तुरीया

सम्पूर्णा।

1. T T - स्वनाभिकां।

2. M T - शिष्याचार्येण।

3. T T - बद्धमोक्षौ । M T - खण्डमोक्षौ।

4. M T - मातृविध्येन।

5. T T - धर्मचतुष्कं।

6. T T - उपगतः।

7. M T - सगुरु।

8. T T - ज्ञायते।

9. M T - मननचिन्तनां।

10. M T - खण्ड।

11. T T - माया।

12. अनुवादो।

13. M T - प्रतिममेव।

14. M T - स्वात्मनि येन।

15. T T - भवनादि।

16. The first two verses are missing in M T.

17. M T - परतः प्रमाणता।

18. M T - वाक्यश्रवणान्तः।

19. M T - प्रतिपाद्यफलानुभूः।

20. M T - महाप्रभुः।

21. T T - भासकः।

22. M T - अतीन्द्रियेण।

23. M T - निगमत्वे वर्तते।

24. The last two lines are missing in M T.

25. T T - मूलतं।

26. M T - मन्मित्र।

27. T T - शस्त्राणि।

28. T T - तानू चतुर्देवौ। M T - तानू चतुर्देवो।

29. T T - शास्त्रशोचितं। M T - त्मास्त्रशोचितं।

30. T T - निरये। M T - निरये।

31. M T - दुःखविषादादि लिङ्ग।

32. M T - अपिचोदनं।

33. M T - द्रुतकर्मार्थता।

34. M T - हेय।

35. M T - नात्रविधि।

36. M T - समनुसत्यं।

37. M T - रत्नदर्पण।

38. T M - जयोतिशयः।

39. T T - विनिवर्णनामुखा। M T - विनिपत्तनमुखात्।

40. The verse is incomplete in M T.

41. T T - मस्यदः।

42. T T - एकयोः।

43. T T - संपद्यत।

44. M T - तमप्ययोनिवत्।

45. M T - समस्तवाक्।

46. M T - सर्वशक्तितः।

देवताविंशिकाप्रकरणम्

तत्तत्फलार्थिनां तत्तद्रूपेणोपास्यमीश्वरम्।
सच्चिदानन्दमात्मानं धीशुद्ध्यै देवतां भजे ।।

अथ देवताविंशिका व्याख्यायते-

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।। (गी.9.27)
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः।। (गी.9.28) इति

भगवदुक्तेः। मय्यर्पितानि कर्माणि न बन्धाय विमुक्तये इति ईश्वरोक्तेः।

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते।।

इति विष्णुधर्मोक्तेश्च। नाहं वेदैरित्युपक्रम्य 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन' (गी.11.54) इति गीतोक्तेश्च। तमर्थमीश्वर-स्वरूपमुपासनार्थं देवताविंशिकायां निर्धार्यते।

तदेवादौ प्रस्तौति -

मुक्तिर्गुरुश्रुत्युदितात्म[1]विद्यया
विद्या च देवप्रणिधायिनां भवेत्।
देवा[2]स्सदेव श्रुतमीश्वराह्वयः
कार्यं जगत् सावयवं यतोऽजनि।। 1 ।।

आचार्यमुखाद्वाक्यं श्रुतवतोऽधिकारिणो विद्या स्यात्। तया संसारविमुक्तिरित्युक्तम्। सा च विद्या देवताद्यनादिलीलाशीले परमेश्वरे बुद्धिप्रणिधायिनामेव स्यात् न शिलाभक्त्या मामभिजानातीति स्मृतेः। स

ईश्वराख्यो देवश्च जगत्कारणत्वेन सदेव[4] सौम्येत्यादौ एष[5] सर्वकाम इत्यादौ च श्रुतं समस्तशक्तिसन्मात्रमेव एतानां श्रुतीनां अनुग्राहकयुक्तिर्दर्शयति कार्यमिति। इदं दृश्यं जगत् सावयवत्वात् कार्यं, तच्च कार्यं यस्मात् परमकारणात् जातं स ईश्वर इत्यर्थः।

जगत्कारणं स ईश्वर इत्युपक्षिप्तं जगत्कारणत्वञ्च प्रधानादेरेव जडवर्गस्य युक्तं न निर्विकारस्येत्याशङ्क्य परिहरति -

प्रधानकालाद्यणुकर्मणां स्वतो
ह्यचेतनत्वान्न जगत् विधायिता।

जीवोल्पवित् कर्मवशोह्यनीश्वरः
कथं समर्थोऽस्य सिसृक्षयेक्षणे।।

सत्त्वरजस्तमसां साम्यावस्था[6] प्रधानं, प्रकृतिपुरुषयोः क्षोभादिहेतुः ईश्वरशक्तिविशेषः कालः, आदिशब्देन स्वभावनियतियदृच्छाद्या ग्राह्याः। अणवः[7] पार्थिवाद्याः कर्माणि पुण्यपापमिश्राणि[8] भोक्तृजीवादृष्टरूपाणि एतेषामचेतनत्वात् स्वतश्चेतनमधिष्ठातारं विना जगद्विधायिता जगतः कर्त्तृता न युक्ता, तर्हि चेतनानां जीवानां स्वकर्मद्वारा जगतः कर्त्तृता स्यादित्याशंक्याह - जीव इति। यद्यपि जीवश्चेतनः तथापि शरीराद्यावृतत्वादल्पवित् सर्वविषयज्ञानशून्यं कर्मवशत्वादनीश्वरश्च सन् स्रष्टव्यस्य सर्वस्यास्य सिसृक्षयेक्षणे इदं सृजेयमित्यालोचनेऽपि कथं समर्थः स्यात्। किं पुनः सर्गादौ जगच्च कर्तृसापेक्षं तस्मात् सावयवं यत इत्युपक्रम्य, अचेतनत्वात् प्रकृतेरज्ञत्वात् पुरुषस्य च। प्रधानपरमाण्वादि[17] यावत् किञ्चिदचेतनम्।

न तत्कर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना।। इति वायूक्तम्।

यत एवं -

अतोऽस्य कर्त्ता परमार्थवित् समः
समस्तशक्तिः परमेश्वरः परः।
सर्वत्र कर्त्ता निजकार्यनिर्मितिः
ज्ञात्रा समर्थेन वितायते यतः।। 3 ।।

प्रधानादीनां अशक्तेः तेभ्यः पर उत्कृष्टः सर्वज्ञसर्वशक्तिः परमेश्वरः समो रागादिरहितः अस्य जगतः कर्त्ता स्यात्। नन्वीश्वरस्य चेतनस्य कर्त्तृत्वे प्रसिद्धकुम्भकारादिवत् सशरीरत्वं किञ्चिज्ञतादि च स्यादित्याशंक्याह - सर्वत्रेति। सर्वत्र विषये निजकार्यनिर्मितिः यत्कार्यादि जानता तत्र समर्थेन च क्रियत इति विचित्रकार्येषु परिदृष्टसामर्थ्य-कारकप्रयोक्तृत्वं हि कर्त्तृत्वम्। अतः सर्वकर्त्तृत्वात् सर्वज्ञत्वादुपलभ्यमिति भावः। स्वशरीरस्याधिष्ठाने शरीरान्तराभावात् अशरीरस्याप्यधिष्ठाना-निष्टेः न अधिष्ठातुः शरीरनियमश्श्रुतेश्च न तस्य कार्यं कारणञ्च विद्यत इति यः कारणानि निखिलानि चैषः कालात्मयुक्तान्यधितिष्ठत्येक इति च।

ईश्वरः समस्तशक्तिश्चेत्युक्तम्। तदुभयं विवृणोति -

यज्जीवकर्मानुगुणं शुभाशुभं
तनोति तेनाविषमश्च नाघृणः।
योऽन्तः स्वशक्त्या बहिरागमैर्नृणां
यन्ता स्वतन्त्रश्च स विश्वतोमुखः।। 4 ।।

स यस्माज्जीवानां भोक्तृणां अनाद्यविद्योत्थकर्त्तृत्वाद्यभिमान[10]-जनितयोः कर्मणोः शुभाशुभयोरनुरूपः शुभाशुभं फलं जात्यायुर्भोगलक्षणं त्रिविधं विपाकं सुखदुःखोभयलक्षणभोग्यप्रकृतिपरिणामञ्च तनोति मलादि शक्त्या विपाचयति देहादिभिर्भोजयति

इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः।
नानात्वं विनियोगं च धातैवं[11] व्यसृजत्स्वयम्[12]।।

(वि.पु.1.5.62)

इति वैष्णवोक्तेः। तेन तज्जीवकृतसुकृतदुष्कृतसापेक्षत्वात् सुखप्रदत्वेपि न वैषम्यं दुःखप्रदत्वेपि न नैर्घृण्यं, पुण्यं पुण्येन कर्मणा भवति पापं पापेन कर्मणेति श्रुतेः।

अज्ञो जन्तुरनीशोऽयं आत्मनः सुखदुःखयोः।
ईश्वर प्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव च।।

इति वायूक्तेश्च, किञ्च यः परमात्मा सर्वत्र वस्तूनामन्तरावस्थितया स्वशक्त्या कर्मादि संज्ञया नियामकं यः पृथिव्यां तिष्ठन् पृथिवीमन्तरा यमयतीति (बृ.3.7.3) श्रुतेः यश्च बहुश्रुतिस्मृत्यादिशास्त्रैः नृणां नियन्ता स्वतन्त्रश्च न चास्य कश्चिज्जनिता न चाधिप (श्वे.6.9) इति श्रुतेः। ईश्वरः सर्वतोमुखश्च सर्वगतत्वात् सर्वतश्च मुखादिकार्यकरत्वादित्यर्थः[13]। विश्वतश्चक्षुरुत विश्वतोमुखः, अपाणिपादो जवनो गृहीता। पश्यत्यचक्षुः स श्रृणोत्यकर्णः(श्वे.3.19)इति श्रुतेः अनेन नित्यः सर्वशक्तिश्चेत्युक्तं भवति। नित्यो नित्यानां चेतनञ्चेतनानां परास्य शक्तिर्विविधैव श्रूयते (श्वे.6.8) इति श्रुतेश्च।

विश्वतोमुखत्व[14]सर्वशक्तित्वे युक्त्या चोपपादयति -

सर्वत्र कार्योदयदर्शनात्सदा
स व्योमवत् सर्वगतश्च शाश्वतः।
तस्मादभिन्ना सवितुर्यथा प्रभा
स्वाभाविक[15]ज्ञानबलादि शक्तयः।। 5 ।।

कर्त्तुः कार्यदेशा[16]वस्थितेः लोकदर्शनादत्रापि सर्वत्र कार्योदयदर्शनेन

लिङ्गेन तत्कर्त्तुरीश्वरस्य व्योमवत् सर्वगतत्वमभ्युपेयं तथा सर्वदा कार्योदयदर्शनात् शाश्वतश्च तस्मादीश्वरात् पृथक्सिद्धं य स्वाभाविक्यः कर्मादिहेतुराहित्यात् निसर्गसिद्धं नान्यो हेतुर्विद्यत ईशानायेति (श्वे.6.17) श्रुतेः। शक्तिशक्तिमतोर्भेदो नात्यन्तं विद्यते यतः इति वायूक्तेः। ज्ञानबलादीनां मूलभूता याश्च परशक्तेः परेण तादात्म्यं एव देवात्मशक्तिं स्वगुणैर्निगूढामिति (श्वे.1.1) श्रुतेः। अत्र सवितुः यथा प्रभा इति दृष्टान्तः। मायात्मकत्वाच्छक्तेरनिर्वाच्यत्वादेवापृथक् सिद्धिः।

ऐतदात्म्यमिदं सर्वमिति (छा.6.8.7) श्रुतिसिद्धं सार्वात्म्यं त्रिश्लोक्या युक्त्या समर्थ्यते -

स्वानन्यसिद्धं स्वकळेबरादिकं
यथा नियम्य न तथा घटादिकम्।
अतः समस्तैकनियामकत्वतः
सिद्धाऽस्य सर्वात्मकता महात्मनः।। 6 ।।

कर्त्तुः कुलालादेः स्वस्मादनन्यतया सिद्धं स्वशरीरादिकं यथा विधेयं भवति तथा स्वस्मात् पृथक्त्वेन सिद्धं घटदण्डादिकं न विधेयमेवं नियामकान्नियम्यस्यापृथक् सिद्धिः दृष्टा। अतः सर्वस्येश्वरनियम्यत्व श्रुतेः नियामकत्वादीश्वरादभेदोऽपि सिद्ध इति परमात्मनः सर्वैश्वर्येण सार्वात्म्यं सिद्धम्।

किञ्च -

यथा सुखात्मात्मसुखज्ञ ईश्वरः
तथाखिलात्माप्यखिलज्ञतास्य यः[17]।
इत्यस्य सर्वज्ञतया उपागता[18]
विश्वात्मता दृश्यदृ[19]गैकरस्यतः।। 7 ।।

यथात्मसुखश्चैत्रादि सुखात्मा स्वस्मादविविक्तसुख एवमीश्वरोऽप्यखिलात्मा स्वस्मादविविक्ताखिलप्रपञ्चम् अतोऽस्याखिलज्ञता एवं सर्वज्ञतयापीश्वरस्य सर्वात्मकता सिद्धा। किञ्च दृश्यदृगैकरस्यतोऽपि सर्वात्मकता सिद्धा यथा दृश्यः स्वप्नप्रपञ्चो दृक्स्वभावेन द्रष्ट्रैकरसः एवमखिलस्यापि दृश्यत्वात् दृक्स्वभावेन सर्वद्रष्ट्रा ईश्वरेणैकरस्यमित्यर्थः।

किञ्च विश्वस्योपादानत्वादपि ईश्वरस्य विश्वात्मतेत्याह -

स्वतन्त्रकर्त्तृत्वबलेन चात्मनः
परानपेक्षेण स ईश्वर श्रुतः।
विश्वस्य मूलप्रकृतिश्च सन्निजो[20]
जीव स्वबुद्ध्यादि गुणावलेरिव।। 8 ।।

परानपेक्षेण स्वात्मशक्तिव्यतिरिक्त कार्यकारणोपादानादि निरपेक्षेणात्मनः स्वतन्त्रकर्त्तृत्वबलेन विश्वस्य मूलप्रकृतिश्च ईश्वर एवेति स वृक्ष आसेत्यादि प्रश्नपूर्वं[21] ब्रह्म वनं ब्रह्म स आसेत्यादि उत्तरोक्तिरूपायां श्रुतौ यस्मात्तस्मादपि सर्वात्मता[22] यथा घटादिप्रकृतेः मृदादेश्च घटाद्यात्मता तथेति भावः। परनिरपेक्षस्वतन्त्रकर्त्तुरात्म-कार्यप्रकृतित्वे दृष्टान्तमाह - जीव इति। स्वप्नस्वबुद्धयादि-गुणावलेरित्यर्थः। न तत्र रथा न रथयोगा पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते (बृ.4.3.10) स हि सर्वस्य कर्त्तेत्यादि स्वप्नसृष्टिदृष्टान्त श्रुतेः। यथोर्णनाभिः सृजते गृहणत (मु.1.1.7) इत्यादि जाग्रत् दृष्टान्तश्रुतेश्च। स एव सर्वेषामुपादानं निमित्तमात्मा चेत्यर्थः। एको देवः सर्वभूतेषु गूढः सर्वव्यापीत्यादि (श्व.6.18) श्रुतेश्च। विष्णुर्विष्णौ विष्णुतश्च न परं विद्यते ततः (वि.पु.3.3.1) इति वैष्णवोक्तेश्च।

उक्तस्वरूपस्यैवेश्वरस्योपासनार्थं पाशुपतसारस्वतादिचोदिताः षडंगषड्गुणादिधर्माः सच्चिदानन्दस्वरूपान्नातिरिच्यन्त इति द्विश्लोक्याह-

सर्वज्ञता चित्सुखमेव तृप्तता
स्वतन्त्रता दुर्घटकारिमा यता।
शक्तिस्वभावस्फुरणं षडङ्गता
चित्सौख्यसत्त्वेन निरूपिता[23] विभोः।। 9 ।।

चिदेव सर्वविषया सर्वज्ञता नाम पर्यवस्यति। पर्याप्तसुखं हि तृप्तिः, कालातीतचिदेवानादिबोध इत्यर्थः सिद्धत्वान्नोक्तम्। अतिदुर्घटकारित्वमस्यानुत्तरमेव यत् तत् स्वतन्त्रत्वमीश्वरस्येति शैवोक्तेः। सेयं[24] भगवतो मया यन्नयेन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्।। (भा.पु.3.7.9) इति भागवतोक्तेः। दुर्घटकारित्वमविद्याया दूषणं न तु भूषणमिति न्यायात् अघटितघटनापटुतरानिर्वचनीय मायाशक्तियुक्तमेव स्वतन्त्रता। सा चासत्याधिष्ठानभूतं सद्रूपमेवेत्यर्थः। अविक्रियब्रह्मणः स्वाभाविकमायानिबन्धन सिसृक्षोन्मेषशक्तिः चिदपि तदनुग्रहहेतोरस्य सिसृक्षोः य आद्य उन्मेषः तच्छक्तितत्त्वं अभिहितं अविभागापन्नमस्यैवेति तत्त्वप्रकाशोक्तेः। सा च नित्यमलुप्ता शक्तिः अपरिच्छिन्ना चेत्यनन्ता शक्तिरिति द्विधा व्यपदेशः। सा चैकरूपं सन्मात्रमेवेति उक्तरीत्या[25] ईशितुः सच्चित्सौख्यमेव षडंगानीत्यर्थः।

तथा-

तेजश्चिदेवाचलधाम सद्बलं
वीर्यं स्वशक्तिप्रसरोऽखिलात्मनः।
स्वातन्त्र्यमैश्वर्यमतः स षट्गुणः
सच्चित्सुखात्मा भगवानितीरितः।। 10 ।।

स्वपरप्रकाशकं वस्तु तेज इत्यभिधीयते इति न्यायेन चिदेव प्रकाशकान्यानपेक्षया तेजः। बलं अवष्टम्भशक्तिः सा हि सर्वाधिष्ठानं सदेव शक्तिः पूर्वोक्तलक्षणा स्यात्। स्वशक्तेः प्रसरणं वीर्यं तच्च सदेव व्याख्यातम्।

स्वातन्त्र्यमैश्वर्यमतः सच्चित्सुखात्मकः स एवेश्वरो भागवते षड्गुणो भगवानित्युपास्यते।

अशब्दगोचरस्यापि यस्य वै ब्रह्मणो द्विज।

पूजायां भगवच्छब्दः क्रियतेह्युपचारतः।। (वि.पु.6.5.71)

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।

भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः।। (वि.पु.6.5.79)

इत्यादि बैष्णवोक्तेः। इत्थं सर्वशास्त्रेषु तत्तत्प्रकारैरुपास्यत्वेनोक्त स्वात्मरूपं परमेश्वरः एक एव तत्तत्फलार्थमित्यर्थः। तं यथायथोपासते तथा तथैव भवतीति श्रुतेः।

एवमुपास्यस्येश्वरस्योपासनार्थं प्रतिपत्तव्यानर्थविशेषानुद्देशेनाह-

स आप्तकामस्वसुखातिरस्कृतेः

विराजते मन्निजभूत[26] ईश्वरः।[27]

व्याप्यात्मशक्त्यंशज विश्वबुद्बुदं

विश्वातिरिक्तोऽनवधिश्चिद[28]म्बुधिः[29]।। 11।।

[30]सम प्रत्यगात्मभूत ईश्वरो निरवधेर्निजानन्दस्य निसर्गत एवाविद्यावरणाननुभवात् आत्मारामः अत एव आप्तकाम आत्मकाम (बृ.4.4.5) इति श्रुतेः आत्मलाभान्नापरं विद्यते इत्यापस्तम्भोक्तेश्च। एवं मायाशक्तेरंशभूतं प्रकृति संभूतमायामयं जगत् बुद्बुदं अन्तर्यामिरूपेण व्याप्य अनुप्रविश्य व्याप्त विश्वोत्कीर्णेन निरवधिके[31]न स्वेन रूपेण स्थितो विराजते। सर्वजगदपरोक्षतयेक्षणे स्वभासा भाति

स भूमिं विश्वतोवृत्वा अत्यतिष्ठद्दशाङ्गुलम् (पु . सू.1)।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।

(छा.8.4.1) इति श्रुतेः विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यादि

स्मृतेश्च।

एवं सर्वकामत्वादिगुणः सर्वात्मकः सर्वोत्तीर्णचिद्रूपश्चेत्युपास्तिरुक्ता।[32] अथ चिद्रूपापरित्यागेन सर्वात्मा परमेश्वर इत्याह-

चिदीश्वरस्वात्मचिदात्मकं जगत्
करोति चिच्छक्तिभिरात्मचित्क्रियः।
चित्कार्यकर्त्तादिभिदा भ्रमोपि चित्
सा चास्मि सत्सौख्यचिदेव देवता।। 12 ।।

चिद्रूप ईश्वरः स्वात्मभूतचिन्मयसृष्ट्यादिव्यापारः सन्[33] स्वात्मचिदेवात्मा स्वरूपं यस्य तज्जगत् चिन्मयीभिः शक्तिभिः करोति सृष्ट्यादि[34] कर्मतां नयति सोऽयमेकस्याऽस्थितः कार्यकर्त्तृकरणादिभेदभ्रमः सोऽपि चिदेव। अचिदात्मकत्वे भेदभ्रमस्याप्रकाशप्रसंगात् एव अयमेव न्यायो जगदादेरपि चिद्रूपत्वसिद्धौ। तथा च श्रुतिः कोऽयमात्मेति स्वयमुपास्मह इत्युपक्रम्य प्रज्ञानं ब्रह्मेत्युपास्य ब्रह्मणः प्रज्ञानात्मकतां तदात्मतां[35] च सर्वस्य दर्शयति। श्री पराशरोपि - ज्योतींषि विष्णुर्भुवनानि विष्णुरिति जगतो विष्ण्वात्मकतामुक्त्वा ज्ञानस्वरूपो भगवानिति विष्णोर्ज्ञनात्मकतां जगतश्च विज्ञानात्मताम् उक्त्वा - विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम् (वि.पु.2.12.43) इति विज्ञानस्यैव कर्त्तृकार्यादिरूपेण प्रतिभानमविद्योपाधिकमुक्त्वा तथा -

विद्याऽविद्या च मैत्रेय ज्ञानमेवोपधारय।। (वि.पु.2.6.51)
ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते।।
ज्ञानात्मकमिदं सर्वं न ज्ञानाद्विद्यते परम्।। (वि.पु.2.6.50)

इति भ्रमहेतोरविद्यया भ्रमविषयस्य च जगतो बन्धहेतुकर्मणां तन्निवर्तिकायाश्च विद्याया तत्सर्वकल्पनाधिष्ठानस्य च ब्रह्मणो बन्धज्ञानैकस्वभावतामेव

निर्णैषीत्। यैवं भूता सत्यसुखसंविदात्मिका परा देवता च सा प्रागुक्त सार्वात्म्यादिधर्मैरुपास्या तत्राप्यशक्तैर्वक्ष्यमाण-शुद्ध्यादिमद्भिरुपचारैरेव सैवाहमस्मि प्रत्यगात्मन एव सर्वोपाधि-भिरुपास्यत्वात्।

एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्मशाश्वतम्।।

तथा - आत्मैव देवतास्सर्वाः सर्वमजन्यमवस्थितं इति मनुस्मृतेः।

शुद्धाया देवताया उपासने कर्त्रादिभिः शुद्धैर्भाव्यमिति तच्छोदनक्रममाह-

सच्चित्सुखव्याप्त्यनिलानलामृतैः[36]
संशोषितप्लोषितसंप्लुतं जगत्[37]।
नीत्वैकतां ब्रह्मणि शोधिताखिल-
स्वात्मानमात्मन्यमलात्मना यजे।। 13 ।।

सर्वं दृश्यं जगत् सन्मात्रमिति बुद्धिलक्षणया सत्ताव्याप्त्या वायुस्थानीयया विशेषप्रविलापनाख्यं शोषन्नीतं सन्मात्रशेषं स्थापितं कृत्वा सद्रूपस्य चिज्जडसाधारण्येन लोकप्रसिद्धेः जाड्यांशचिन्मात्रता भावनाव्याप्त्याऽग्निस्थानीयया दग्धं दीपितं अपगतजाड्यं कृत्वा चितश्च सुखदुःखसाधारण्येन लोकप्रसिद्धेः सर्वसुखात्मकमित्यानन्दभावनाव्याप्त्या[38] सुधास्थानीयया आप्लावितं पूरितं आनन्दैकरसं भावयित्वा एवं सम्पन्नसच्चित्सुखात्मभावं जगत् ब्रह्मण्यैक्यं नीत्वा ब्रह्मैवेदमहञ्चेति भावनया प्लाविताखिलकर्तृकरणादिप्रपञ्चः सन् अहं सैन्धवघनवन्मूर्त्ति-भावमापद्य[39] परमात्मानं ब्रह्मभूतं ब्रह्मण्यधिकरणे ब्रह्मात्मना कर्तृकरणादिद्रव्येण यजे[40] अर्चयामि। कर्त्रादेः ब्रह्मात्मतानुसन्धानमेव शुद्धिः[41]। अहं क्रतुरहं यज्ञः, (गी.9.16) ब्रह्मार्पणं ब्रह्महविरित्यादि (गी.4.24) भगवद्वाक्यात् आत्मा

नदीसंयमतोयपूर्णेत्यादि भारतोक्तेः।

यज्ञः पशुर्वह्निरिति कर्त्ता क्रियाणां स च इज्यते प्रभुः।

स एव तत्कर्मफलञ्च तस्य यत्स्रगादितत्साधनमप्यशेषम्।।

[42]हरेर्न किञ्चिद्व्यतिरिक्तमस्ति[43] सकारणं कारणतस्ततोऽपि।

इति वैष्णवेक्तेः च सर्वं द्रव्यं जातं परं ब्रह्मेति अनुसंहितं शुद्धं स्यादित्यर्थः। अनेन स्थानद्रव्यात्ममन्त्रलिंगशुद्ध्याख्य पञ्चशुद्धि-विधिरप्युक्तो ज्ञेयः।

अत्र मन्त्रस्वरूपं निरूपयति-

स्वाधारधीमुख्यतयैकरस्येन

स्फूर्त्तेच्छयोक्त्याक्षरचित्पदादिका।[44]

स्वसाक्षिवेदि त्रवबोधकत्वभाक्[45]

वर्णात्मना लोकफलास्मि वाङ्मनुः[46]।। 14 ।।

स्ववक्तुरात्मा आधारो मूलाधाराख्यं देहमध्यं धी शब्दो धीस्थानस्य हृदयस्यापि लक्षकः वक्त्रं वर्णविशेषकादिव्यञ्जकं ताल्वादिस्थानाष्टकं तद्वागिन्द्रियस्याप्युपलक्षणं तेषु भवा स्वाधारधीमुख्या तद्भावेन तेषु स्थानेषु क्रमात् चत्वारि वागित्यादि श्रुत्युक्तः परा पश्यन्ती मध्यमा वैखरी संज्ञाश्चतस्रो वाचोऽवस्था स्युः। तासु पराख्या सूक्ष्मा वाक् वक्तुः बोधकशक्तिरूपा ज्ञानशक्त्यंशभूता वक्तुर्या आत्मन्यैकरस्येनास्ते। अतस्तामात्मत्वेन मन्यते वक्ता। अथ आधारस्था वर्णात्मकविकारोन्मुखी स्फुरति वक्तव्यपदार्थनिर्विकल्पकस्फुरणरूपा पश्यन्त्याख्यामापन्ना तत्साक्षिणात्मना साक्षित्वेन निरूप्यते। सैवार्थविशेषवाचकतया शब्दविशेषरूपेण विवक्षिता हृत्स्थायां बुद्धावहमनेन शब्देन इममर्थं वक्ष्यामीति इच्छया स्फुरन्ती मध्यमाख्या सती वाच्यवाचक-विशेषबोद्धुरात्मनो विभागाद्विशेषज्ञातृत्वेन निरूप्यते। अथ वक्तृगता ताल्वादिस्थानविशेषेषु प्रयत्नविशेषैरभिव्यज्यमाना स्फुटवर्णात्मिका

सती वैखर्याख्यामापन्ना परान् प्रतिज्ञापकस्य वक्तुरात्मनो विभागेनावबोधकत्वेन निरूप्यते। वाक् शक्तेः स्फुरणादाबिन्दुवर्णावस्था वक्तुः शक्तोद्युक्त-प्रवृत्तनिर्वाहत्वाख्य चतुरवस्थोपाधयः। अत्र शिक्षोक्तिः -

आत्मा बुद्धया समेत्यार्थान्मनोयुङ्क्ते विवक्षया।
मनः [27]कायाग्निमाहन्ति स प्रेरयति मारुतम्।। (पाणिनीयशिक्षा.6)

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् इत्यादिः। साम्बोक्तिर्यथा -

या सा मित्रावरुण सदनादुच्चरन्तीति षष्टिं
वर्णानत्र प्रकटकरणैः प्राणसंगात् प्रसूते।
तां पश्यन्तीं प्रथममुदितां मध्यमांबुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीञ्च प्रपद्ये।।

प्रपञ्चसारोक्तिश्च

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ् मध्यमाख्यः।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना
बद्धस्तस्मात् भवति पवनप्रेरितो वर्णसंघः।। (प्रपञ्चसारः .2.44)

आगमोक्तिश्च -

वैखरीशब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा।
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी।। इत्यादि।

एवं विधा परमाक्षररूपा संविदेव वक्तृवागवस्थादिभिरकारादिमातृका- वर्णरूपेण प्रवृत्ता सर्वार्थप्रकाशप्रयोजना सैवाहमस्मीति बोद्धव्यं इत्यात्माभेदेन शब्दब्रह्मोपास्तिविधिः पृथङ्मन्त्रः पृथङ्मन्त्री न सिध्यति कदाचनेति वचनात् गुरुदेवतामन्त्रनामैक्यं संभावयन् धिया शिष्य इति प्रपञ्चसाराच्च।

अथ देवतामूर्त्तिस्वरूपं निरूप्यते -

तत्त्वासनातत्त्वविभूषणास्त्रका[28]

स्वानन्दसौन्दर्यसदङ्गचित्प्रभा।

अन्तर्बहीरत्नघटस्थदीपवत्

स्फुरत् स्वभाग्रस्तभिदास्मि देवता।। 15 ।।

परशक्त्यादि पृथिव्यन्तानि यानि तत्त्वानि तान्येव परमात्मतत्त्वमय्या देवताया आसनं योगपीठं स्वमहिमात्मकं हि विश्वं दृश्यप्रपञ्चं व्याप्य तदुपचर्यापि[49] परतत्त्वमेवास्ते स भूमिं विश्वतो वृत्त्वा अत्यतिष्ठत्, अन्तर्बहिश्चैतत्सर्वं व्याप्य नारायणः स्थितः इति श्रुतिभ्यां जयासनैकविन्यस्तविश्वतत्त्वसमुच्चयेति शैवोक्तेश्च। एवं तत्त्वानि पुरुषादीनि कौस्तुभाद्याभरणानि मन आदीनि चक्राद्यस्त्राणि वैष्णवाद्युक्तानि यस्याः सा चिद्रूप परमात्मन्यध्यस्तश्चेत्यप्रपञ्चोऽस्य[50] शेषभूत एव। तेन तस्य हि परब्रह्मत्वे तच्छक्तितयेश्वरत्वे विभूतितया मूर्त्तित्वे भूषणास्त्रासनतया[51] जीवत्वे कार्यकारणाद्यात्मना जगत्वे तत्तत् वस्त्वात्मना तमेव तानि तत्त्वानि परिचरन्ति। अथातो दैवतमित्यादौ[52] देवताकाण्डे तत्स्वरूपनिरूपणे महाभाग्यदेवताया एक आत्मा बहुधा स्तूयत इत्यादौ आत्मजन्मानः। आत्मैवैषां रथो भवति। आत्माश्वः। आत्मायुधम्। आत्मेषवः। आत्मा सर्वं देवस्य देवस्येति निरुक्ते (7.1) यास्काचार्योक्तेः। अथातो विभूतयोऽस्यपुरुषस्येत्याद्युपासना श्रुति पुराणागमानुभवादिभ्यश्च। एवं कल्पितपरिकराया देवताया दिव्यदेहकल्पनामाह - स्वानन्दसौन्दर्येति। सा प्रत्यगात्मभूता विभक्तेष्वनुग्रहलीलालक्षणस्वशक्त्युपाधेः विहितविग्रहपरिग्रहादर्पणोपाधेः[53] द्रष्टुः मुखमिव दृश्यत्वमापन्ना भासते। तत्र च सन्मात्रमेव घनीभूतं दिव्यमूर्त्ति निजानन्द एव तस्याः सैन्दर्यं सौभाग्यादि चित्प्रकाश एव तद् गात्रप्रभाप्रसरः एवं तच्छास्त्रोक्तानेककल्याणगुणाः कल्प्याः।

न ते रूपं न चाकारो नायुधानि न चास्पदम्।

तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे।। इति शौनकोक्तेः।

अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितः।[54]

बिभर्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः।। (वि.पु.1.22.76)

इति वैष्णवोक्तेः। एवंविधा दिव्यमूर्त्तिः देवता स्फटिकादि-मणिमयघटान्तर्गतस्य रत्नप्रदीपस्य प्रभा यथा घटस्यान्तर्बहिश्च व्याप्य सर्वं तद्भेदं ग्रसन्ती प्रकाशमयमेव तत्सर्वं करोति एवं शुद्धोपाधि-प्रतिफलनोज्वलित परमज्योतीरूपतया अनन्तकोटिसूर्यप्रतिमेन स्वेन तेजसोपाधेः तत्परिकरस्य जगतः सोपासकानाञ्च सर्वभेदं ग्रसन्ती प्रकाशैकरसीकृतसर्वभूतजातेन तेजसात्मभूतेन स्वयं राजते सैवाहमस्मि इति देवताया स्वस्य चैक्यं ज्ञेयम्। अथ योऽन्यां देवतां उपास्ते अन्योऽसावन्योऽहमस्मीति न सा वेद इति भेदधीनिन्दाश्रुतेः। एवमुपासनस्य तदैक्यमेव फलं तं यथायथोपासते तथा तथैव भवतीति श्रुतेः। इत्थं 'सञ्चिन्तयन् विष्णुमभेदेनात्मनो द्विजे'त्यादि वैष्णवोक्तेश्च। (वि .पु.1.20.1)

एवंविधाया देवताया आसनाद्युद्वासनयन्त्रोपचार-कल्पनाञ्चतुश्लोक्याह -

स्वधाम विश्वाश्रयधीरिहासनं[55]

जगत्सुपूर्णस्थिरधामधीर्हवः।

अर्घ्योह्यनर्घ्ये सकलार्हणार्हधीः

पाद्यं तु विश्वांघ्रमृत त्रिपात्त्वधीः।।[56] 16 ।।

इहास्या देवताया आसनादीनित्यन्वयः। उपचारस्य गुणान्त-

रारोपेण वा तत्फलसिद्धत्वेन वा तदुपचाराभावोपलक्षणेन वा तत्तदुपचार-स्थाने भावनाविशेष एव ज्ञेयः। सर्वत्र हि तत्तदुपचारद्रव्याणां मूलभूतायाः परशक्तेः भोग्यायाः तत्तद्भोक्तृपरत्वस्य च तादात्म्यभावेनैवोपचारशब्दार्थः। उक्तं हि कृष्णपूजापद्धतौ -

वस्तुनो यस्य सारेण धारयत्यच्युतो जगत्।
तस्याच्युतत्वसन्धानमुपचारः प्रकीर्त्तितः।।

एवं सर्वोपचारेषु मूलशक्तिरनुसन्धेया। अत्र देवताया आत्मन आधारान्तराभावात् स्वस्यामध्यस्तस्य विश्वस्याधारत्वाच्च आत्माधारो विश्वाधारश्चेत्यनुसन्धायिनी भक्तस्य बुद्धिरेवासनकल्पनं आत्माधारो धराधार इति वैष्णवोक्तेः। स्वशक्त्या सर्वजगत्सु या पूर्णा अत एव तयानभिव्याप्तप्रदेशाभावादपावनीया तथा च स्थिरा प्रकाशात्मिका च देवतेति मतिर्हवः आह्वानं, दूरस्थस्य हि समीप प्रापणार्थमाह्वानं, तस्य पूर्णस्य स्थिरस्य परमात्मनो नित्यसान्निध्यात् सदा सिद्धमिति तत्फलमेवात्र ग्राह्यमित्यर्थः। वस्तुनो नित्यतृप्तनिरभिमाननिरञ्जन-स्वाभाव्यात् कुशपुष्पाक्षतोदकार्घ्यद्रव्यस्पर्शनायोग्यतया अनर्घ्येपि ब्रह्मणि कल्पितैश्वर्यात् सर्वमर्हति दाशार्ह इति न्यायेन सर्वाराधनायोग्यत्वमतिरर्घगृहाभ्यागतस्य हि पूज्यस्य विश्रान्ति-सन्तर्पणकरैः द्रव्यैः श्रमाद्यपनोदमर्घ्यदानं ब्रह्मणस्तु नित्यतृप्तत्वादिना तत्फलस्य सिद्धत्वादिति भावः। श्रान्तस्य पवित्रोदकादिकं पादपरिचरणार्थं पाद्यं, अत्र च पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि (छा .3.12.6) इति श्रुत्युक्त्या सर्वं जगत् देवतायाः पादः क्षमा- भयशक्त्याख्या त्रयः पादाः दिवि प्रकाशमये परमे पदे इति देवता-पादभूतस्य जगतः परदेवतांशत्वेन ज्ञानमेव क्षालनं पाद्यमिति भावः। एतेन मधुपर्काचमनीये व्याख्याते इति नात्रोक्ते।

ज्ञानन्तु[57] शान्तामलमङ्गलात्मधीः
विद्याम्बरं व्याप्तजगत् गुणातिगा[58]।
चिद्ब्रह्मसूत्रं त्रिगुणागमातिगा
भूषा जगद्भूषण रोचनात्मधीः।। 17 ।।

लोके तापमलामंगल्यादिहरं स्नानं चिद्देवतायास्तु नित्यं शान्त्यादिमत्वात्तादृशी चिदिति बुद्धिरेव ज्ञानं एवं गुणैरावरणैरनावृता जगदात्मादिका चिदिति विद्यैव वस्त्रं बद्धकच्छो बद्धशिखो यज्ञोपवीती च कर्म कुर्यादिति बाह्ये कर्मणि विधिः स चान्तरविवक्षामूलं तद्यथा देवताध्यायिनः चित्तस्य स्थैर्यार्थं प्राणसंयमः कार्यः। तत्र अधोमूलाधार-रन्ध्रःकच्छस्थाने उपरिशिखास्थाने ब्रह्मरन्ध्रः तन्मध्ये सुषुम्ना तत्पार्श्वयोरिडा पिंगला चेति नाडीत्रयं नियम्य प्राणायामे चित्तस्थैर्याद् देवतासु[59] ध्यानं स्यादिति मूलयुक्तिः। अत्र च कर्मकर्तृत्वाभावेपि लोकसंग्रहार्थं यज्ञोपवीतादिरपि ईश्वरेण धार्यते सैव सूत्रं चेत्यनुसन्धानमेव यज्ञोपवीतम्। ब्रह्मसूत्रस्य च त्रिवेदमयत्वेपि सर्ववेदवेद्यत्वात् चिद्देवतायाः स्वप्रकाशत्वं च तत्फलं सिद्धम्।

ज्ञानशिखिनो ज्ञाननिष्ठाः ज्ञानयज्ञोपवीतिनः।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुत्तमम्।।

वह्नेरिव शिखा नान्या यस्या ज्ञानमयी शिखा स शिखीत्युच्यते विद्वानितरे केशधारिणः इति श्रुत्या ज्ञानिनामपि ज्ञानमेव सूत्रं किंपुनः चिद्रूपस्यात्मनः इति भावः। लोके शुभाशुभस्य शोभनीकरणात् अरुच्यस्य रोचनाच्च भूषणं स्वार्थकं चितस्तु स्वसन्निधिना देहादिशोभाहेतुत्वात् परमप्रेमास्पदत्वाच्च जगदलङ्कारिणी परमरोचनी चिदेवेति मतिः भूषणम्।

लेपः स्वशक्तिः प्रणवाख्यसत्यवाक्[60]

पुष्पावतंसस्वयशोऽस्य धूपनम्।

दीपो जगद्वर्त्तिनिजप्रकाशधीः

निवेदनं विश्वभूगात्म तृप्तधीः।। 18 ।।

जीवारोपितसर्वदुर्वासना विनाशिका सकलकल्याणगुणैकराशिरूपा शुद्धचिच्छक्तिरेवास्येश्वरस्य अनुलेपनं वाचः सत्यरूपो यः प्रणवः सोऽस्य पुष्पमयं आपीडं, ओमिति सत्यं तदेतत्पुष्पं फलं वाचो यत्सत्यमिति श्रुतेः। जगति पुण्यगुणकर्मभिरधिवासयतीति श्रुत्यादि सिद्धा कीर्त्तिरेवास्य स्वधूपेति प्रतिपत्तिर्धूपः त्रिगुणात्मिका जगन्मयीं वर्त्तिमुपाधाय[61] स्वयं प्रकाशते परमात्मेति धीः दीपः। भोग्यस्य दृश्यजातस्य विश्वस्य भोक्ता यथाकालं पालयिता अत्ता चेति तथा आत्मारामतया नित्यतृप्तश्चेति धीः निर्वेद्योपहारः।

ताम्बूलमव्यक्तगुणत्रयेशधीः

आवृत्तिरात्मैक्यधियः प्रदक्षिणम्।

विश्वात्मविश्वाधिकधीर्नमस्क्रिया[62]

विसर्जनं[63] ब्रह्मनिजात्मशेषधीः।। १९ ।।

सत्त्वरजस्तमांसि क्रमात् पूगफलं नागवल्लीदलं शिलाक्षरश्चेति ताम्बूलं कल्प्यते। तेन प्रकृतिगुणसाक्षीश्वरधीस्ताम्बूलार्पणम्। अहमेव ब्रह्म ब्रह्मैवाहमस्मीति बुद्धेरसकृदावृत्तिस्तस्य प्रदक्षिणीकरणं नाम देवताया स्वस्यासक्तिद्योतनं[64] स्वस्माद्देवतायाः उत्कर्षप्रदर्शनं वा नमस्कारसाध्यं प्रयोजनम्। अतो विश्वात्मविश्वाधिकश्चेश्वर इति मतिर्नमस्कृतिः। ब्रह्मैवाहं न मदोऽन्यत् किञ्चिदिति बुद्ध्या सर्वभेद-प्रविलापेन ब्रह्मात्मैक्यावशेषणमतिरुद्वासनाय उपचारः। अत्रोक्ताः षोटशोपचाराः ताम्बूलेन विना स्युः। दिङ्मात्रं चेदं अर्घ्यपाद्य- मधुपर्कगव्यादि पञ्चकं च अष्टोपंचाराः। एवं तत्तत् मतभेदोक्ताः सहस्रसंख्यान्ता उपचाराः तत्तद्

गुणक्रियारोपणादिनोक्तन्यायेन ऊह्याः। उपचारच्छलेन देवतायां चित्तविक्षेपः प्रयोजनम्। यदुक्तं मनोहरस्तोत्रे -

स्तुतिरस्तुत्यतोक्तिस्ते पूजा चापूज्यतेक्षणम्।
ज्ञानमध्ये यतोऽज्ञानं अहो ते महिमा मृड।।
पूजाच्छलात्परिच्छेत्तुं निन्दितुस्ते स्तुतिच्छलात्।
ध्यानच्छलाच्च विस्मर्त्तुमहो देव प्रसीदसि।।
असंगमद्भिः स्नपयन् स्रग्भिरावेष्टयन्नभः।
निराजयन्निजज्योतिस्त्वां जिह्रेति जगद्गुरो।। इति।

अतः तेनाप्युपायेन परमेश्वरे चित्तक्षेपात् सकामस्य तत्तत्कामाप्तिः निष्कामस्य चित्तशुद्धिः फलं भक्त्याराधितान्नित्यतुष्टादपीश्वरात् भवत्येव।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।। (गी .9.26)

इति भगवद्वाक्ये भक्त्या प्रयच्छति, भक्त्युपहृतमिति च भक्ति-शब्दावृत्तेर्भक्तो भक्तिहस्ते पत्रादि ददाति तदादाय भक्तिरेव देवायोपहरति तद्देवो भुङ्क्ते इति भक्तिरेव भगवत्पदपर्यन्तं भक्तदत्तपत्रादि प्रापकत्वं दृश्यते। भगवान् नित्यतृप्तोऽपि भक्त्या गीतं भक्तजगद्धितार्थं भुङ्क्ते। तेभ्यः फलं तदनुरूपं दातुं न तु स्वभोगेच्छया दत्ते या दृगिव वै देवेभ्यः करोति तादृगिवात्मैदेवाः कुर्वन्ति इति श्रुतेः। भागवते च

नैवात्मानः प्रभुरयं निजलाभपूर्णो
मानं जनादविदुषः करुणो वृणीते।
यद्यज्जनो भगवते विदधीतमानं
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः।। (भा .पु.7.9.11)
यथा तरोर्मूलनिषेचनेन

तृप्यन्ति तत्स्कन्धभूजोपशाखाः।

प्राणोपहाराच्च यथेन्द्रियाणां

तथैव सर्वार्हणमच्युतेज्या।। (भा.पु.4.31.14)

अथ ऐहिकफलकामः सर्वजगत् तोषकामश्च भगवन्तं बाह्यद्रव्यैरपि यजेत्। आमुष्मिकार्थित्वान्तरैरेव मोक्षार्थित्वान्तरैः ज्ञनमयैर्वा -

श्रेयाद्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप।

अर्च्चयामास देवेशं भावपुष्पैर्मनोरमैः।।

इति वचनात् अन्तर्योहरतिर्यस्य न बहिर्भाग्यगौरवात् इति शौनकोक्तेः। बाह्यवस्तुभोगार्थिनां बाह्यद्रव्यैर्भागो अन्येषां अन्तर्ज्ञानमयैः ध्यानमयैर्वेत्यर्थः।

एवमुक्तोपासनस्येश्वरस्य मायातत्कार्यभेदोपाधिकानुपास्याद्रूपभेदात् दिङ्मात्रेणाह -

ब्रह्मैकमाभाति परेश्वरो पुमान्

महान् विराट् सूत्र हिरण्यगर्भखम्।

वैश्वानरप्राणमनांसि तारवाक्

भूतादिरूपं तदुपासनास्पदम्।। 20 ।।

स्वात्मरूपमेकमेव ब्रह्म दर्पणोपाधिना दृश्यतां गतं मुखमिव उपासनास्पदं स्वमायाशक्त्योपाधिनोपास्य तामापन्नं संपदादिरूपमाभातीत्यन्वयः। परं सर्वशक्तिसमस्तकारणमीश्वरः सर्वनियन्ता पुमान् स्वसृष्ट्यानुप्रविष्टो भोक्ता महान् बुद्धितत्त्वाभिमानि विराट् स्थूलदेहसमष्ट्यभिमानी सूत्रं प्राणसमष्ट्यभिमानी हिरण्यगर्भो लिङ्गशरीरसमष्ट्यभिमानी खं हृद्पुण्टरीकान्तस्थं दहराकाशं वैश्वानरं त्रैलोक्याभिमानी विराडवस्था विशेषः प्राणो मुख्यप्राणः मनः सङ्कल्पं तारः प्रणवः वाक् शब्दाभिमानी देवताभूतानि व्योमादि भूम्यन्तानि पञ्च

चराचरप्राणिजातानि वा आदिशब्दात् महाभूतांशाः सालग्रामशिला गङ्गासूर्याद्याः पूजाधिष्ठानविशेषाः ग्राह्याः। उक्तं हि भागवते -

सूर्योऽग्निर्ब्राह्मणो गावौ वैष्णवः खं मरुज्जलम्।

भूरात्मा सर्वभूतानि भद्र पूजापदानि मे।। (भा.पु.11.11.42)

इत्यादि तत्तच्छास्त्रोक्ताधिष्ठानं ज्ञेयम्। ब्रह्मैवेदं सर्वमिति ब्रह्मणः सार्वात्म्यात् प्रत्येकं च प्रातीतिकभेददृष्ट्या च भेदाङ्कीकारात् अवयवेषु देवदत्तबुद्धिवत् व्योमादिषु ब्रह्मांशेषु ब्रह्मबुद्धि-रुपासनायामुत्पद्यते। यदा तु सर्वमिदं ब्रह्माहमेवेति अनुभवो अपरोक्षः तदानीं उपासनापि नास्ति यत्र यस्येति श्रुतेः। तादृगनुभवार्थं अहंग्रहोपास्तिरभेदात्कार्या। यथोक्तं वैष्णवे -

विस्तारस्सर्वभूतस्य विष्णोः सर्वमिदं[65] जगत्।

द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः।। (वि.पु.1.17.84)

एवं देवताविंशिकायां श्रुत्युक्तेश्वरतत्त्वस्य युक्त्या मननं कृतं वक्ष्यमाण योगविंशिकावाच्यनिदिध्यासनोपायत्वेन इति ज्ञेयम्। वाक्यार्थविंशिकोक्तयोः जीवपरयोः जीवस्य प्रसिद्धत्वात् ईश्वरस्यो-पासनाच्छलेन मननयुक्तयः एवोक्ताः इत्यनन्तरयोगविंशिका प्रस्तावश्च सूचित इति सिद्धम्।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।

स्वात्मयोगप्रदीपे स्वे पञ्चमीं देवविंशिकाम्।।

इत्यमरानन्दयोगीश्वरकृतौ स्वात्मयोगप्रदीपप्रबोधिन्यां पञ्चमी विंशिका समाप्ता।

1. M T - मुक्तिश्रुत्युदिकार्यविद्यया।

2. M T - सदेव।

3. M T - प्रणिदिनामेव।

4. M T - तदेव सोम्येत्यादौ।

5. M T - एव।

6. M T - सामावस्था प्रकृतिपुरुषयोः।

7. M T - अर्णवः।

8. M T - पुण्यपापानि।

9. M T - प्रमाणपरमाण्वदि।

10. M T - कर्मत्व।

11. M T - धातैव। T.T. धातैव।

12. M T - व्यवधात्स्वयं। T T. व्यवधात्सयं।

13. M T - कार्यतरत्वादित्यर्थः।

14. M T - विश्वतोमुखतः।

15. M T - स्वाभावित।

16. M T - कार्यदेवावस्थिते।

17. T T - यत्।

18. T T - अप्युपागता।

19. M T - दृशैकरस्यतः।

20. M T - सन्निधौ।

21. T T - पत्नपूर्वं।

22. M T - सर्वात्मकता।

23. M T - निरूपितापि।

24. M T - सोयं। T.T. सोयं।

25. T T - उक्तनीत्या।

26. T T - निजरूप।

27. M T - ईश्वरं।

28. T T - न विधिश्चिदेबुधि।

29. The fourth line is incomplete in M T.

30. M T - स्वप्रत्यगात्मभूतो।

31. M T - निरवधिरवधिकेन।

32. M T - उपाधिरुक्ता।

33. M T - सत्।

34. M T - करोतिस्तानपिन्द्रियः।

35. M T - तदात्मकाम्।

36. M T - नलकृत्स्नमेकाम्।

37. The last three lines are missing in M T.

38. सर्वं।

39. T T - मुक्ति।

40. M T - याजे।

41. T T - ब्रह्मतानुसन्धानमेव। M.T- ब्रह्मात्मकानुसन्धान।

42. M T - हरन्न।

43. M T - व्यतिरिक्तमन्ति।

44. M T - चित्पदानिकाम्।

45. M T - त्रवबोधकत्वभा।

46. M T - वान्नरः।

47. T T - कायानिमाहन्ति। M T - कयानिमाहरति।

48. M T - विभूषणार्थ।

49. M T - तदुपर्यपि। T T तदुपर्यपि।

50. T T - परमात्मन्यन्यस्त।

51. M T - भूषणास्थानतया।

52. T M - दैवकमित्यादौ।

53. T T - विविध।

54. T T - रूपवर्जितं, M T- रूपवर्जितं।

55. M T - धीरिहासन।

56. M T - त्रिपाल्पधीः।

57. M T - स्नानन्तु।

58. M T - गुणातिका।

60. M T - सप्तवान्।

61. M T - वक्तिमुपाधाय।

62. M T - स्तमस्त्रिया। T M. स्तमस्त्रिया।

63. M T - निसर्ज्जनं। T T . निसर्जनं।

64. M T - स्वस्य सन्ति द्योतनं।

65. M T - विश्वमिदं। T. T. विश्वमिदं।

योगविंशिकाप्रकरणम्

आरुरुक्षुभिरारूढैर्ब्रह्मविद्भिश्च योगिभिः।
भावितं विदितं वित्तं परमात्मानमाश्रयेत्।।

अथ योगविंशिका व्याख्यायते। तत्रोक्तं वक्ष्यमाण संगतिं वदन् योगलक्षणमाह-

परापरात्मभक्त्येत्थं परमात्मा प्रसीदति।
प्रसादाद्योगयोग्यत्वं योगः स्याच्चित्तसंयमः।। 1 ।।

एवमुक्तप्रकारया परस्य निष्कलस्यापरस्य च सकलस्यात्मनो भक्त्योपासनेन परमेश्वरः प्रसन्नो भवेत्।

अणोरणीयान् महतो महीया -
नात्मास्य जन्तोर्न्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः।। (क.2.20) इति श्रुतेः।

यद्वा द्विविधया आत्मनो भक्त्या साधकस्यान्तःकरणं परं केवलं निर्मलीभवद्योगाधिकारी भवति। योगः संयतचित्तस्यात्मापरोक्षज्ञानं ततो मोक्ष इति भावः। तं देवमात्मबुद्धिप्रसादान्मुमुक्षुर्वै शरणमहं प्रपद्ये (श्वे.6.18) इति श्रुतेः।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।। (गी.2.65)

इति गीतोक्तेश्च।

चित्तसंयमो योग इति योगलक्षणम्। यमाद्यैः पञ्चभिरङ्गैः सुशोधितस्य चित्तस्य शुभे आश्रये धारणाध्यानसमाध्यवस्थाक्रमेणावस्थितिः संयमः। त्रयमेकत्र संयम इति पतञ्जलिः। स एव योग इत्यर्थः।

श्रुतिविहितनिदिध्यासनत्वात् योगस्य कर्तव्यतेत्याह -

उपनिषदां स्वात्मैक्ये तात्पर्यावधारणं श्रवणम्[1]।
मननं तदनुग्रहणं नयैर्निदिध्यासनं योगः ।। 2 ।।

सर्वेषां वेदान्तवाक्यानां ब्रह्मात्मैक्यप्रतिपादने तात्पर्यमितिनिश्चयः श्रवणं स्यात्। श्रुतस्यार्थस्य शास्त्रान्तरादिविरोधशङ्कायां तदनुग्राहकन्यायानुभवाद्यैः तद्विरोधपरिहाराख्यो मनोव्यापारो मननम्। श्रुतियुक्तिनिर्णीतस्यार्थस्य अवधारणार्थं चित्तस्य विक्षेपनिरासेन ऐकाग्र्यकरणलक्षणो मनोव्यापारो योगः। स एव निदिध्यासनम्। श्रवणप्रधानमिदं त्रयं आत्माऽपरोक्ष्यकारकं तेनात्मनो अविद्यानिवृत्तेः नित्यमुक्तता[2]भिव्यक्तिरिति भावः। श्रूयतेहि- 'आत्मा वा अरे दृष्टव्यः' (बृ.2.4.5) इति विहितस्य दर्शनस्य साधनत्त्वेनानन्तरमेव 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' (बृ.2.4.5)इति श्रवणादि विधित्रयम्।

स्मर्यते च -

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
ज्ञात्वा च सत[3]तं ध्येय एते दर्शनहेतवः।।

एवमात्मविषय एव योगो विहितः। अन्ये तु उपासनायोगः सर्वेः काम्य इत्यर्थः।

तत्र योगं विवृणोति -

सगुणः तदितरात्मना द्विधा[4]सौ
यमनियमादिभिरष्टभिर्युतोंगैः।

स भवति बहिरन्तरङ्गभावात्
परमपुमर्थसमर्थने समर्थम्[5]।। 3 ।।

असौ निदिध्यासनात्मको योगः यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधि लक्षणैरष्टभिरङ्गैः युक्तम्। स च सगुणो निर्गुण इति द्विधा। तयोः सगुणस्तु परमपुरुषार्थस्य मोक्षस्य[6] साधने बहिरंगतया परम्परया समर्थो भवति। निर्गुणस्तु अन्तःरंगतया साक्षत् साधने मोक्षस्य समर्थः। तत्र सगुणयोगस्य अष्टांगयोगानां यमादीनां लक्षण विलिख्यते शास्त्रान्तरस्थम्। यथा पातञ्जले यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधयोऽष्टांगानि। अहिंसा सत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। स्थिरसुखमासनम्। शैवे तु -

स्वस्तिकं पद्ममध्येन्दुं वीरं योगं प्रसाधितम्।
पर्यंकं च यथेष्टं च प्रोक्तमासनमष्टधा ।। (शि.पु.7.2.36.20)

प्राणः कोष्ठगतो वायुस्तस्यायामो निरोधनम्।
तद्रेचकं पूरकं च कुंभकं च त्रिधोच्यते।। (शि.पु.7.2.36.21)

कौर्मे च -

रेचको अजस्रनिश्वासात् पूरकस्तन्निरोधतः।
साम्येन संस्थितिर्या सा कुम्भकः परिगीयते।(कू.पु.2.11.37)

इन्द्रियाणां विरचतां विषयेषु स्वभावतः।
निग्रहः प्रोच्यते सद्भिः प्रत्याहारस्तुसत्तमाः[7]।(कू.पु.2.11.38)

हृत्पुण्डरीके नाभ्यां वा मूर्ध्नि पर्वसु[8] मस्तके।
एवमादिषु देशेषु धारणा चित्तबन्धनम्। (कू .पु.2.11.39)

शैवे तु -

धारणा नाम चित्तस्य स्थानबन्धस्समासतः।
स्थानं च शिव एवैको नान्यद्दोषाश्रयं[9] यतः।।(शि.पु.7.2.36.48)

वैष्णवे च -

आश्रयश्चेतसो ब्रह्म द्विधा तच्च सरूपतः।
रूपमूर्त्तममूर्त्तं च परं चापरमेव च ।। (वि.पु.6.7.47)

तत्र परं ब्रह्म शुद्धरूपेण जगत्कारणरूपेण च अमूर्तं ब्रह्मादिस्थावरान्त जगद्रूपेण तद्रक्षक मत्स्यकेशवाद्यवतारमूर्त्यादिरूपेण च द्विधा इति चतुर्धोपास्यमित्यर्थः।

तद्रूपप्रत्ययाचैका सन्ततिश्चान्यनिःस्पृहा
तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप।। (वि.पु.6.7.91)
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते।।
(वि.पु.6.7.92)

एवं सगुणस्य योगस्य योगशास्त्रादिप्रसिद्धत्वात् तमुपेक्ष्य निर्गुणयोगं विवृणोति -

देहाक्षादौ[10] विरक्तिर्यम इह नियमस्वात्मतत्त्वेऽनुरक्तिः
बाह्यौदासीन्यमेवासनमसुनियतिस्त्वक्षरोधो मृषार्थात्।।
प्रत्याहारःस्वबुद्धेर्विषयविमुखता धारणा स्वात्मनिष्ठा
ध्यानं ब्रह्माहमात्मेति दृगनहममोहात्मसंवित् समाधिः।।4।।

देहेन्द्रियप्राणबुद्ध्यहङ्कारादिषु अनात्मसु निषिद्धेषु विरक्तिरनभिषङ्गो यमः। निषिद्धात् हिंसादेर्निवृत्तिर्यमः। विहिते प्रत्यगात्मन्यनुरक्तिरात्मप्रणवत्वादि नियमः। विहिते हि स्वाध्यायादौ निष्ठा नियमः। बाह्यार्थेषु क्षेत्रवित्तादिष्वौदासीन्यं अप्रवर्ततया स्थितिरासनम्। कर्मेन्द्रियाणां हि संयत्यावस्थितिरासनम्। असुनियतिस्त्वक्षरोधोमृषा-र्थादिति प्राणायामलक्षणोक्तिः। दृश्यप्रपञ्चः सर्वेपि सदसद्वैलक्षण्यात् मिथ्येति बुद्ध्या तस्मान्मिथ्याभूतात् अर्थात् अक्षाणां इन्द्रियाणां रोधो निवर्तनं प्राणायामः। सर्वचेष्टाहेतोर्हि प्राणवायोः स्वारसिकव्यापारव्याघातः प्राणायामः। विषयेभ्यो दिव्यमानुषेभ्यः शब्दादिभ्यो बुद्धेर्वैमुख्यं परं वैरागाख्यं प्रत्याहारः। इन्द्रियाणां हि विषयेभ्यो व्यावर्तनं प्रत्याहारः। स्वात्मनिष्ठाबुद्धेः स्थापनं धारणा। शुभाश्रये हि चित्तबन्धो धारणा। ध्यानं ब्रह्माहमात्मेति दृग् अहमात्माब्रह्म ब्रह्मैवाहमस्मीत्यैकाग्र्येण दर्शनं ध्यानम्। ध्येये हि बुद्धेरेकतानता ध्यानम्। अनहं अनहंकारा अमोहा निरवद्या च या आत्मरूपा संवित् स्फूर्त्तिः सैव समाधिः। अनहमिति जाग्रत्स्वप्नव्यावृत्तिः। अमोहेति सुषुप्तिव्यावृत्तिः तुरीयतयावस्थितिः समाधिः।

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते।।
(वि.पु.6.7.92)

तथा चोक्तं निर्गुणाष्टांगयोगपद्धतौ-

देहेन्द्रियादौ सर्वेषु दृष्टानुश्राविकेषु[11] च ।
विषयेषु तु वैराग्यं यम इत्युच्यते बुधैः।।
विषयेषु च सर्वेषु वैराग्यं सम्यगुत्थितं।
स्वाध्यायादीनामिष्टदेवतासन्दर्शनादिकञ्च स्युः। प्राणायामा-

दृढञ्चात्मनिरागञ्च नियमस्स प्रकीर्त्तितः।।
न हि रागो विरागश्च सर्वेषु विषयेष्वपि।
उदासीनस्थितिर्यास्यात्तदासनमितीरितम्।।
देहेन्द्रियादिकं सर्वं ज्ञात्वा स्वप्न इवानृतं।
न तत्र चेष्टा यत्र स्यात् प्राणायामस्स[12] उच्यते।।
असत्यञ्चेज्जगत्सर्वं असदुःखतरं[13] हि यत्।
अन्तर्मुखं यदा चेतः प्रत्याहारस्स उच्यते।।
अन्तर्मुखं हि यच्चेतो न पुनःस्यात् बहिर्मुखं।
स्थिरमात्मनि संस्थञ्चेद्धारणा सा समीरिता।।
शुद्धं चैतन्यमेवाहमिति यत्रास्ति भावना।
ध्यानन्तन्निर्गुणं प्रोक्तं अन्यध्यानविवर्जितम्[14]।।
चैतन्यं[15] केवलं यत्तदहमस्मीति भावना।
तदाभासावस्थितिर्या समाधिर्निगुणात्मकः।।
भेदं विहाय सुप्तौ च तुरीये चास्य यं यथा।
तदात्मा केवलेऽस्त्येव सर्वभेदविवर्जितः।।
तदास्ते विक्रियाभेदविहीनोऽसौ सुखान्वितः।
समाधिस्तुरीयमित्युक्तं तुर्यातीतो[16] निजःस्वयम्।।

अनयोः फलं दिङ्मात्रेणाह -

गौणकाम्ये कामा वैरत्यागाश्चाहिंसादेः स्युः।
योगे निष्कामे नैर्गुण्यद्वारा मुक्तिस्सैवागौणे।। 5 ।।

सगुणयोगो द्विविधः सकामो निष्कामश्चेति। निर्गुणस्तु निष्काम एव। तत्र सगुणे काम्ये योगे तत्तत्कामप्राप्तिः अनुषङ्गाच्चाहिंसादीनां यमाङ्गानां फलान्तरं च तत्सन्निधौ वैरत्याग इत्यादिकं नियमाङ्गानां च

द्यङ्गान्तरफलानि चादिशब्दात् ग्राह्याणि।

18 एते यमाः स नियमाः पञ्चपञ्चप्रकीर्त्तिताः।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः।।
(वि.पु.6.7.38)

इति वैष्णवोक्तेः।

19 अङ्गारोह्यमनालस्यनिर्विषत्वन्तथासनैः।
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।।
प्रत्याहारेण विषयान् ध्यानेनानैश्वरान् गुणान्।
समाधिना तु मनसस्तत्वे प्रज्ञा प्रवर्त्तते।।
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।।

इत्यादि शास्त्रेभ्यश्च सगुण एव निष्कामे मोक्षकामे योगे निर्गुणाष्टाङ्गयोगोत्पादनद्वारा तज्जन्यनिष्कल ब्रह्मात्मैक्यज्ञानात् कैवल्यमेव स्यात्। निर्गुणे तु योगे मुक्तिरेव फलं नान्यत्। अन्यच्चेत् स्वयं संगापादानद्वारा योगिनो विघ्न एवेति ज्ञात्वोपेक्ष्यम्।

योगप्रसङ्गाच्चित्तवशीकरणोपायभूतं योगद्वयमाह -

20 यल्लोकराष्ट्रपुरवेश्मवपुर्हृदादि-
ष्वन्तःक्रमात्कृतपदस्थितिसूक्ष्मतत्त्वम्।
चित्तस्य तत्र विलयो यदि वा व्यतीत-
सर्वावृतो महतिचिद् गगनेपि योगः ।। 6 ।।

आदौ विराडादिरूपेण संर्वलोकाद्यात्मकं परतत्त्वमिति धारयित्वा अथ तदन्तस्य राष्ट्रादि हृद्पुण्डरीकपर्यन्तेषु तथा आदिशब्दगृहीतेषु तैत्तिरीयोपनिषदुक्तेषु च हृद्पुण्डरीकान्तस्थसुषिरतन्मध्यगतवैश्वानराग्नि

तन्मध्यगतश्चिखा तदन्तर्गतपरमात्मतत्त्वपर्यन्तेषु च स्थानेषु पूर्व-पूर्वपरित्यागेनान्तःक्रमात् सर्वान्तःस्थे सर्वप्रमाणाद्यगोचरतया सूक्ष्माख्ये परतत्त्वे चित्तस्य ध्यायतो यो लय उपरमः स सूक्ष्माख्यो योगः। यद्वा देहात् बहिः पार्थिवं कार्यं सूक्ष्ममणुमारभ्य बहिः क्रमात् गृहपुरराष्ट्रब्रह्माण्ड तदावरणसप्तकप्रधानपुरुषपरमात्मपर्यन्तेषु तत्त्वेषु धारणां कृत्वा सर्वावरणातीतेष्वनवच्छिन्नतया परममहदाख्ये परमतत्त्वे चित्तस्य ध्यायतो यो लय उपरमः स सूक्ष्माख्यो योगः। यद्वा देहात् बहिः पार्थिवविलयो यः स स्थूलाख्यो योगः। एतौ च योगौ पतञ्जलिना परमाणु - परममहत्त्वान्तोऽस्य [illegible] (1.40) इति योगसूत्रेण सूचितौ। विष्णुपुराणे च विवृतौ यथा -

रूपं महत्ते च्युतमत्रविश्वं अन्तश्च सूक्ष्मं जगदेतदीश।
रूपाणि सूक्ष्माणि च भूतभेदास्तेष्वन्तरात्माख्यमतीव सूक्ष्मम्।।
तस्माच्च सूक्ष्मादि विशेषणानामगोचरे यत्परमार्थरूपम्।
किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय।।

(वि.पु.1.20.74,75)

इति, सकलावरणातीतनिरालम्बनभावना महाविभूतिसंस्थान नमस्ते पुरुषोत्तमेति च। एतेन अणोरणीयान् महतोर्महीयानित्यादि (क.2.20) श्रुत्युक्तेः सर्वात्मको अनन्त आत्मैको योगद्वयेनानुसंहितः स्यादिति ज्ञेयम्। आनन्दविंशिकायामयमेवार्थः प्रागुक्तः, अनादिभेदपरिकल्पितेत्यादि श्लोके।

अस्यैव निर्गुणयोगस्य प्रतिपत्तिसौकर्यार्थं [21] प्रतिपादनप्रक्रियाभेदाच्चातुर्विध्यं द्विश्लोक्याह -

क्वापि दैवतमहस्सुधांबुधिः
प्लावयत्यखिलमात्मना सह[22]।

क्वापि चात्मचिदसीम सागरो
मज्जयेज्जगदिदं स दैवतम्।। 7 ।।

कस्मिंश्चिद्योगे सदेव सोम्येदमग्र आसीत् (छा.6.2.1) इति ईश्वरोपक्रमेण ऐश्वरतेजोमृतांबुधिर्व्याप्त्या ऐतदात्म्यमिदं सर्वमिति (छा.6.8.7) जगतः स्वरूपविलयेन तत्त्वमसीति जीवस्य परमेश्वराद् भेदमात्रविलयेन इत्थं जगदात्मनोः प्लावनं तथा च वैष्णवे-

यत्र सर्वं यतस्सर्वं यः सर्वं सर्वसंश्रयः।
सर्वगत्वादनन्तस्य स एवाहमवस्थितः।। (वि.पु.1.20.84)
मत्तत्सर्वमहं सर्वं मयि सर्वं सनातने। (वि.पु.1.20.85)

इत्यादिना यमे च योगे निदर्शितं तथैव कस्मिंश्चिद्योगान्तरे आत्मा वा अरे द्रष्टव्य (बृ.2.4.5) इति प्रत्यगात्मोपक्रमेण असंगोह्ययं पुरुष (बृ.4.3.15) इति निष्प्रपञ्चं प्रपञ्च्य एतावदरे खल्वमृतत्वमिति महाऽमृतात्मकपरब्रह्मापवर्गेण प्रपञ्चस्य स्वरूपलयात् ब्रह्मणश्चाभेदलयात् जगद्देवतयोः प्रत्यक्चैतन्यांबुधौ मज्जनं 'आत्मा शुद्धोऽक्षरः[23] शान्तो निर्गुणः प्रकृतेः परः' (वि.पु.2.13.71) इत्यादि वैष्णवोक्तम्।

क्वापि तद्द्वयभिदाकरमाया-
रूपसेतुविलयाच्च तदैक्यम्।
क्वापि चैतदुभयत्रजडांश-
त्यागतः स्फुरति तद्द्वितयैक्यम्।। 8 ।।

कस्मिंश्चिद्योगे स यो श्रुत इत्यारभ्य सम आत्मेति विद्यादित्यन्तेन एकत्वविद्याविधानेन मायाधीनजीवब्रह्मभेदस्य मायामयस्य च प्रपञ्चस्य अर्थान्निवृत्तिः यथैकस्य सरसो मध्यो सैकतसेतुनिबन्धनद्वैतीभावस्य उभावप्येकीकृत्य तत्र ब्रह्माम्भोधौ

तदुभयपार्श्वगतसरोद्वयतरङ्गाभिघातात् सैकतसेतुविलये सिद्धमेव सर एकत्वं स्फुरति। तथा जीवेश्वरभेदहेतुभूतमूलाविद्यायां तदुभय-तत्त्वविचारलीनायां सिद्धमेव ब्रह्मात्मैक्यं स्फुरतीत्यर्थः। तथा कस्मिंश्चिद्योगान्तरे तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादि शास्त्रेण जीवब्रह्मणोरितरेतरतादात्म्यप्रत्ययविधानबलात् जीवगते जाड्ये भेदादिलक्षणेश्वरगते चापरोक्ष्यादिलक्षणे निवृत्ते सिद्धमेवैक्यं स्फुरति। यथा सोऽयं देवदत्त इत्यादि प्रत्ययेपि भेदजनके ज्ञाने नाशमात्यन्तिकं गते आत्मनो ब्रह्मणो भेदमसन्तं किं करिष्यतीत्यर्थः। एतद्योग-चतुष्टयमैकात्म्यनिष्टं विप्रतिपादनप्रक्रियाभेदमात्रेण तादृशभावना-चतुष्टयोपपत्तेः चतुर्विधेति कथितम्। एवमन्येपि प्रक्रियाभेदाः श्रौतात्मैक्योपपत्तये तत्रानुसन्धेया इत्यादि दिङ्मात्रं प्रदर्शितम्।

अथ निष्कलयोगोपायभूतं प्रणवप्रतीतं योगान्तरमाह -

स्वाधारोद्यत्प्रणवनिलयं जीवचिद्बिन्दुमन्त-
र्ब्रह्माम्भोधिं बहिरनवधिं ब्रह्मनाड्यैव हेतुः।
अन्योन्यैक्याभ्यसनविधिना ध्वस्तदेहादिभेदाः
स्फारादारा स्फुरति परितो ब्रह्मसाम्राज्यसंपत्।। 9 ।।

आत्मीयमूलाधारे उद्यन्तं स्वशक्त्योत्थापितं सुवर्णघनबिन्दुमिव शलाकीक्रियमाणं प्रणवं स्फुरन्नादरूपं ध्यात्वा तन्निलयं तस्योत्थापकत्वेन तदायतनं तेनैव एकीभूतं जीवचैतन्यात्मकं विन्दुं पूर्णप्रधानसारस्य घनं ब्रह्मनाड्या सुषुम्नया सर्वाधारपद्मभेदिन्या 24 ब्रह्मरन्ध्रान्तः मूर्धान्नीत्वा ततो देहाद्बहिः व्योमपद्ममध्यगतत्त्वेन भाव्यमानं निरवधिकं पूर्णप्रकाशानन्दात्मकं ब्रह्माम्भोधिं प्रवेश्य तथा तं च ब्रह्माम्बोधिं तेनैव ब्रह्मनाडीमार्गेणान्तर्मूलाधारगतप्रणवशिखास्थबिन्दुपर्यन्तं नीत्वा भूयश्च

आध्यात्मिकादिभेदभिन्नदेहेन्द्रियप्राणमनोबुद्ध्यहंकारप्रधानाख्यानात्मसप्तकं तथा अकारोकारमकार बिन्दुना दशान्ताख्यप्रणवावस्था सप्तकं स्वरव्याहृति लोकादि सप्तकानि च तत्तदैक्यभावनया विलाप्य निर्भेदतया स्थितस्य भावकस्य ब्रह्मसाम्राज्यसंपदेव सवर्तो निर्भेदतया स्फुरति। अनेन क्रमेण ब्रह्मात्मैक्यधीः सुकरेति भावः। उक्तं च प्रपञ्चसारे -

आदौ तारः प्रकृतिविकृतिप्रोत्थितोऽसौ मूला -
धारादारादळिविरुतिराविश्य सौषुम्नमार्गम्।
आद्यैः शान्तावधिभिरनुगो मात्रया सप्तभेदैः
शुद्धो मूर्धावधि परिगतः शाश्वतोऽन्तर्बहिश्च।। (18.5)

अयं च प्रणवस्तत्तत्तन्त्रोक्तमन्त्रोक्तमन्त्रबीजानामुपलक्षणम्। योगो हि सर्वशास्त्रेष्वप्युच्यते स हि श्रुत्यैवाथर्वण्या प्रणवोधनुश्शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन वेद्धव्यं शखत्तन्मयो भवेत्।

लक्ष्यं सर्वगतं ब्रह्म शरोमे सर्वतोमुखम्।
वेद्धा सर्वगतश्चाहं विद्धं लक्ष्यन्न संशयः।।

इति च श्रुत्यन्तरैरपि परिच्छिन्नदेहस्थाभिमानिनं जीवं तत्तद्देहसंबन्धं त्याजयितुं देहातीतशुद्धब्रह्मणापूर्णेन योजयितुं कल्पित उपायो न वास्तवः।

एवं योगमभ्यसतो मनसो विक्षेपकषायलयाख्य त्रिदोष-शान्त्युपायमाह-

चलति चपलचित्तं[25] यत्र तद्ब्रह्म पश्येत्
स्वमहसि जुहुयादावर्त्तयेद्वा मनोर्थात्।
हृदयशयनमोहेन्तादि सन्धानतो द्वि -
त्रिषु विषयमूलप्रेक्षणात्स सत्त्वशुद्धिः।। 10 ।।

स्वभावतश्चपलचित्तं यत्र यत्र वस्तुनि गच्छति तत्तत् ब्रह्मैवेति

भावयेत्। ज्ञानात्मनो ब्रह्मणः सर्वस्य कारणत्वेन सर्वज्ञेयात्मकत्वात् अयं चित्तविक्षेपशान्त्युपायो विषयविलापनाद्यशक्तस्य योगिनः यत्र यत्र गतं चेतः प्रीत्या स्नेहेन वा तव। तं तं चिन्तय गोविन्दं मनसस्थैर्यकारणात् इति विष्णुधर्मोक्तेः। स्वमहसि स्वप्रकाशे तत्तद्विषयादिकल्पनाधिष्ठाने ब्रह्मणि तं तं विषयं जुहुयात्। अध्यस्तस्याधिष्ठानव्यतिरेकेणासत्वमिति भावनया तं तं प्रविलापयेत्। ततो हि शैलाब्धिधरादिभेदात्[26] ज्ञानी हि विज्ञानविजृम्भितानीति (वि.पु.2.12.39) वैष्णवोक्तेः। अयं चोपायः प्रत्याहारोक्तौ। अथ प्रत्याहारमेवाह आवर्त्तयेद्वेति अर्थाद्विषयादात्मन आवर्त्तयेत् प्रत्याहृत्यात्मन्यवस्थापयेत्।

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।। (गी.6.26)

इति गीतोक्तेः। हृदयस्य निद्राख्ये मूर्च्छाख्ये च लये तत्तत्पूर्वोत्तर-कालयोरात्मस्वरूपानुसन्धानतो मध्ये कालेप्यनुसन्धानं कृतं स्यात्। आद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये इति न्यायात्। तथा द्वेषरागादिषु तत्तद्विषयस्य द्वेषकान्तादेर्मूलं अप्रीतिप्रीतिभावनानिमित्तं दोषगुणाद्यारोपं समत्वबुद्ध्या ब्रह्मात्मबुद्ध्या वा पश्येत्।

परस्वभावकर्माणि न प्रशंसेन्न[27] गर्हयेत्।
विश्वमेकात्मकं पश्यन् प्राकृत्या पुरुषेण च।।
(भा.पु.11.28.1)

तदेतद् भवता ज्ञात्वा मृष्टामृष्टविचारि यत्।
तन्मनःसमतालंबि कार्यं साम्यं हि मुक्तये।।

इति भागवतवैष्णवोक्तिभ्यां एवं पश्यतः सत्त्वस्य चित्तस्य शुद्धिः स्यात्। शुद्धा हि समत्वाख्यावस्थां प्राप्ता मतिः स्वकार्ये तत्त्वानुसन्धाने क्षमा स्यात्।

तदुक्तं गौडपादाचार्यैः-

लये संबोधयेच्चित्तं विक्षिप्तं पुनराहरेत्।
स कषायं विजानीयात् समप्राप्तं न चालयेत्[28]।।
(गौ.का.3.44)

इत्यादि विक्षेपादिष्वन्येषामन्तर्भावात् भगवतोक्तेः सर्वदोषाणां परिहारोपायो भगवतोक्तः यथा -

कांश्चिन्ममानुध्यानेन नामसंकीर्त्तनादिभिः।
योगेश्वरानुवृत्या वा हन्यादशुभदाञ्छनैः।।
(भा.पु.11.28.40)

इत्यादि। अतोऽन्येपि विघ्नाः अनेन न्यायेन ज्ञेया उपेक्ष्याश्च। ते यथा आलस्यं व्याधिराध्यात्मिकादिदैविकाख्यं दुःखभूयं प्रमादोत्थानसंशयानवस्थितचित्तं दौर्मनस्यं[29] विषयलोलता-श्रद्धादर्शनभ्रान्तिरिति दश अन्तरायाख्याः विघ्नाः। प्रथमं स्युर्धारणतः परन्तु प्रतिभा श्रावणी वार्त्ता दर्शनास्वादवेदना इति मनः श्रोत्रघ्राणचक्षुर्जिह्वास्पर्शनैः तद्विषयाणां आब्रह्मभुवनान्तं ज्ञानरूपा उपसर्गाख्य षट् सिद्धिसूचकाः स्युः। ततो यावत् समाध्युदयः[30] तावत् अणिमालघिमागरिमामहिमाप्राप्तिः प्रकास्येशितावशित्वं यत्र कामावसायित्वमित्यष्टौ गुणसिद्धयः स्युः। पृथिव्यादि महत्तत्त्वान्त तत्त्वाष्टकात्मप्रकृतिजयाद्यथोत्तरमष्टगुणबृद्ध्या चतुःषष्टिगुणबोधः[31] ब्राह्ममैश्वर्यं ततः प्रकृतं पौरुषमित्यादि लैङ्गशैवाद्युक्तान्यैश्वर्याणि स्युः। तत्सर्वं स्मयसंगापादकतया विघ्नो ब्रह्मात्मैक्यविद्याया इति ज्ञात्वा मुमुक्षुणोपेक्ष्यम्। दृष्टं चैतद्।

अथ शैवलैङ्गादिप्रसिद्धं मन्त्रयोगादिपञ्चकं पञ्चश्लोक्याह- तन्मनोनुसारेण प्राणो नियम्य इत्यर्थः। यत्र मनसस्तत्र वायुरिति

विष्ण्वीशानरमांबिकार्कगणभृद्वागाद्यधीशामहा
मन्त्रायेपि च सिद्धशाबरपरा नानामुखाम्नायजाः।
छन्दो दैवतबीजशक्त्यृषिकलास्तत्त्वार्थचिन्तान्विता
स्तद्वारापरधाम्नि मानसलयो योगस्तु मन्त्राह्वयः ।।11।।

हरिहरादिविनायकसरस्वतीपर्यन्त दैवत्यादिकास्तान्त्रिकाश्च महामन्त्राः तथा सिद्धशाबराख्याश्च लौकिकदेशभाषाप्राया मन्त्राः। इत्थं वैदिकागमिकतया द्विविधा। ब्रह्मणशिवस्य च नानामुख-विनिर्गताम्नायान्तर्गतास्ते च स्वस्वाङ्गभूतानां छन्दः प्रभृतीनां चिन्तया प्रतिपत्यान्विताः। तत्र छन्दांसि गायत्र्यादीनि[32] मन्त्राक्षरसंख्यावच्छिन्नानि दैवतम्मन्त्राभिमानिनी मन्त्रप्रकाश्या च द्विविधा देवताबीजं देवतानामप्रथमो नान्योपायविशेषः तद्देवताशक्तेः स्मारको वर्णशक्तिः पुंप्रधानादि द्वन्द्वत्रयं नादोत्पादकं असाधारणे बीजशक्ती ऋषिः मन्त्रस्य द्रष्टा कलाः तद्देवताशक्तेरंशाः तत्त्वमन्त्राक्षरादि तादात्म्योपास्यं पृथिव्यादिकम्। अर्थो मन्त्रार्थः देवतायाः इच्छा गृहीतमूर्त्तिश्च एवमादि तत्तत्कल्पोक्तप्रतिपत्तिविशिष्टमन्त्र तद्देवतादितादात्म्यानुसन्धानद्वारा परमात्मतेजसि बुद्धेरेकनिष्ठतया विलयो मन्त्रयोगाख्यो योगः।

अथ स्पर्शयोगः -

मनोगाधारमुखात्माब्ज[33]षट्पदं[34]
सुषुम्नया प्राण[35]समीरसंयमात्।
स मन्त्रयोगात् स्वमनो लये स्फुर -
न्निजं विदुः स्पर्शमिहैव योगिनः।। 12 ।।

आधारोऽत्र मूलाधारः तत्प्रमुखानि यानि षडाधारपद्मानि तानि षडेव पदानि धारणास्थानानि। यस्य मनसः तन्मनो तस्य पश्चात्

न्यायात् तत्तदाधारेषु सुषुम्नामार्गेण प्राणवायोस्संयमो यमः। तस्मात् प्रागुक्त मन्त्रयोगसहिता चित्तस्य स्थानविशेषे विलये सति निज-मात्मस्वरूपं स्फुरतीति यत् तादृशं स्फुरणं स्पर्शयोगं योगिनो विदुः। अथ भावयोगः -

36.
विराडाद्यंरूपं भुवनपरिक्लृप्तावयवयुक्
स्मरेदेवं यद्वा परिमितभुजास्त्राभरणकम्।
ततो मुक्त्वैकैकं तदवयवमङ्गिन्यनुपमे
स योगो भावाख्यो निजमहसि यच्चित्तविलयः।। 13 ।।

पुरुषसूक्तादि श्रुत्या

यस्याग्निरास्यं द्यौर्मूर्धा खन्नाभिश्चरणौ क्षितिः।।
सूर्यश्चक्षुः दिशश्रोत्रं तस्मै लोकात्मने नमः ।।

इत्यादि श्रुत्या चोक्तम्।

यदैश्वरं विश्वरूपं विराड्वैश्वानरादिसंज्ञकम्।
अनेकब्रह्माण्डधारकं चतुर्दशभुवनात्मकम्।।
त्रिलोकात्मकं वा रूपं भुवनादिकल्पितगात्रम्।
भक्तानां यश्चोपासकानुग्रहार्थं गृहीतम्।।

पुराणाद्युक्त द्विचतुरष्टषोडशादिबाहुकं तत्त्वपरिकल्पितास्त्रभूषणकं ऐश्वरं रूपं ध्यायेत्। तस्मिन् रूपे धारणायां क्रमादेकैकमवयवं मुक्त्वैकावयवे संघातरूपे अवयविनि परतेजसि विमुक्ताभरणभावे काञ्चनधन इव चित्तस्य यो विलयः स एव भावयोगाख्यः। वैष्णवे हि तच्च मूर्तं हरिरूपं यादृक् चिन्त्यमित्युपक्रम्य सकलाङ्गध्यानमुक्त्वा ततः शङ्खगदाचक्रशार्ङ्गादि रहितं प्रशान्तं साक्षसूत्रं ध्यायेदित्युक्त्वा किरीटकेयूरमुखैः विभूषणैः रहितं स्मरेदिति चोक्त्वा -

तदेकावयवं देवं चेतसा हि पुनर्बुधः।

कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत्।। (वि.पु.6.7.90)

इत्याद्युक्तम्। अयमेव भागवते चसञ्चिन्तयेद्भगवतश्चरणारविन्द-मित्युपक्रम्य (भा.पु.3.28.21) हासं हरेरित्यन्तेन पादादियावद्धसितं धारणाक्रमेणोक्तम्।

अथाभावयोगः

अद्रेश्याद्युपनिषदापि[37] नेतिवाक्यैः
प्रोक्तात्मन्यखिलजगद्विलक्षणत्वात्।
वाग्दूरे निलये निजे विकल्पशून्ये
मन्यन्ते मतिविलयं ह्यभावयोगम्।। 14 ।।

द्वे विधे वेदितव्ये परा चैवापरा चेत्युपक्रम्य ऋग्वेदादिलक्षणां परां प्रपञ्च्य अथः परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमित्याद्य-थर्वोपनिषदा अथात आदेशो नेतिनेति न ह्येतस्मादिति नेत्यन्यत् परमस्तीति तथा अस्थूलमनण्वह्रस्वमित्यादिकया वाजसनेयोपनिषदापि विश्वस्वरूपवैलक्षण्यमेव लक्षणं कृत्वा अदृश्यत्वादिलक्षणे आख्यापिते ततो जातिगुणक्रियाद्रव्यसंज्ञाख्यपञ्चविकल्पोपाधिविरहात् वा अगोचरे अनिलये अनन्याधारे निजे सर्वेषां भूतानामन्तरपुरुषे सन्मात्रे मतेर्विलयः सन्मात्रत्वेनावस्थानमभावाख्यं योगं निर्गुणयोगिनोपि मन्यन्ते। अयमेव हि योगः श्रीगौडपादाचार्यैः अस्पर्शयोगाख्ययोक्तः।

अस्पर्शयोगो वै नाम दुर्दशः सर्वयोगिभिः।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिन ।। (गौ.का.3.39)इति।

अथ महायोगः -

प्रपञ्चस्य भानेप्यभाने समं यत्
न चाविद्यया विद्ययालिङ्कितांगम्[38]।
तदात्मस्वरूपं सदानन्दसान्द्रं[39]

परं ब्रह्मभानं महायोगमाहुः[40] ।। 15 ।।

मीमांसकनैयायिकादिवत् संविदो विषयभानैकस्वभावत्वानभ्युपगमात् स्वरूपेणैव भाति ब्रह्मेत्यभ्युपगमाच्च प्रपञ्चस्य भानाभानयोरविशिष्टं तत्। अत एव अविद्यया अज्ञानेन नालिङ्गिताङ्गं मां न जानामीत्यनुभवे अज्ञानस्यापि साधकत्वेन प्रथनात् तथा विद्यया ज्ञानेन चानालिङ्गिताङ्गं मां न जानामीति ज्ञानेपि ज्ञातृज्ञानयोरपि साधकत्वेन स्फुरणात् तत्प्रत्यगात्मस्वरूपभूतं तमेव भान्तमिति (क.5.15) श्रुतेः सन्मात्रात्मकं निरन्तरानन्दं परस्य ब्रह्मणः स्वरूपभूतं सदा अतिरोहितं भानं तदेवाहमिति ज्ञानं महायोगमाहुः। अयं च महायोगः प्रागुक्तानां मन्त्रस्पर्शयोगादीनां चतुर्णां क्रमसिद्धानां फलरूपं तन्निदर्शितम्। वैष्णवे-

निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः।
क्रमावाप्तमहायोगो निश्चलात्मा यथा यति।। (वि.पु.5.10.10)

इति शैवे चैषां लक्षणं दिङ्मात्रं यथा निरुद्धवृत्यन्तरस्य शिवे चित्तस्य निश्चला या वृत्तिः सा समासेन योगः। स खलु पञ्चधा-

मन्त्रयोगास्पर्शयोगो भावयोगस्ततः परः।
अभावयोगः सर्वेभ्यो महायोगः परो मतः।।
मन्त्राभ्यासवशेनैव मन्त्रवाक्यार्थगोचरा।
अव्याक्षेपा मनोवृत्तिर्मन्त्रयोग उदाहृतः।।
प्राणायामसखासैव स्पर्शयोगोऽभिधीयते।
सा मन्त्रस्पर्शनिर्मुक्ता भावयोगः प्रकीर्त्यते।।
विलीनावयवं विश्वस्वरूपं भाव्यते यतः।
अभावयोगः प्रोक्तोऽसौ नाभावाद्वस्तुनः सतः।।

समस्तविकल्पानां निवृत्तिकीर्त्तनादविद्यानिवृत्तिः सती असती सदसती

शिवः स्वभाव एवैकश्चिन्त्यते निरुपाधिकः।

यया सैव मनोवृत्तिर्महायोग इहोच्यते।।

एवं क्रमावाप्तमहायोगसंस्कृतचित्तस्य योगिनः प्रागुक्तमननानुगृहीत वेदान्तवाक्यश्रवणादपरोक्षानुभवे जाते तत्समनन्तरं अविद्यातत्कार्यानर्थ-निवृत्तौ जीवत एव मुक्तिरेवेत्यर्थं पञ्चश्लोक्याह -

अथ योगिन आगमोत्थबोधात्[41]

हृदयग्रन्थिविमोहकर्मनाशे।

गतभेदमहो महोदयाब्धौ

स्फुरति ब्रह्मणि जीवतो स्वमुक्तिः[42] ।। 16 ।।

अथ महायोगावाप्त्यनन्तरं वेदान्तवाक्यानुसन्धानेन यो जायते स्वात्मापरोक्षात्मको बोधः तस्मादनर्थमूले मोहे अबोधे नष्ठे तत्कार्यो योगहृदयग्रन्थिर्दुरुच्छेदोऽहंकारग्रन्थिसंज्ञो देहादावनात्मनि आत्माध्यासलक्षणो योऽभिमानः यन्निबन्धश्चात्मनि[43] कर्त्तृत्वाद्यारोपरूपो यो मोहो विभ्रमस्तन्निमित्तञ्च पुण्यपापलक्षणं यत्कर्म तेषु नष्टेषु निश्रेय आनन्दामृतावात्मकं निरावरणं ब्रह्मैव वीतभेदं यथा तथा स्फुरति। भिद्यते हृदयग्रन्धि श्छिद्यन्ते सर्वसंशयाः।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परापरे।। (मु.2.2.8)। इतिश्रुतेः

यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषम्।

तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदः।।

इत्यादि वैष्णवोक्तेश्च (वि.पु.2.12.40)। एवं मोक्षार्णवे ब्रह्मणि स्फुरति सति योगिनोऽस्य जीवत एव देहादिष्वनभिमानलक्षणो मोक्षः स्यादेवेति महाश्चर्यं तद्यथाऽर्हिर्निल्वयनी वाल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेत इत्यादि जीवन्मुक्तश्रुतेः (बृ.4.4.7) स्थितप्रज्ञलक्षणस्मृतेश्च। एवं महोदयाब्धौ ब्रह्मणीत्यनेन नित्यसिद्धमुक्तिस्वरूपे ब्रह्मणि

सदसद्विलक्षणाप्रकारान्तरं चेत्यादि पर्यनुयोगानामनवकाशः। तन्नाशेऽप्यात्म शेषतेति निर्णयात्।

एवं कर्मक्षये विशेषं वक्ति -

> इह प्रकृतबोधतः[44] सपदि कर्मपुण्यादिकं
> प्रणश्यति पुराकृतं यदिव दुष्कृतं स्वप्नजम्।
> विना तदिह यत्कृतं भवति वर्तमानं वपुः
> परन्त्वभिमतिच्युतेरनधिकारतो निष्फलम्।। 17 ।।

इह एव अहङ्कारमोह[45]कर्मसु कर्मणां सञ्चितागामिप्रारब्धतया त्रिविधानां नाशोऽत्रोच्यते। ब्रह्मज्ञानात्पूर्वं पूर्वदेहेषु तद्देहे च कृतं इह परत्र च देहे भोक्तव्यत्वेनान्तःकरणाख्ये लिङ्गे संस्कारदृष्टात्मना सञ्चितं सञ्चिताख्यं ज्ञानोत्तरं करिष्यमाणमागामि संज्ञ एतद्देहारम्भकं प्रारब्धाख्यं फलं दातुं प्रक्रान्तत्वात् तत्र सञ्चितादित्रिविधकर्मनाशो यथा प्रकृतादुदितापरोक्षानुभवात् अखिलं पुराकृतं कर्मसु कृतं दुष्कृताख्यं सपदि ज्ञानोदयक्षण एव नश्यति। कर्मणः कर्तृत्वाध्यासमूलस्य तन्मूलाज्ञाननाशे नैव नाशात्तत्र दृष्टान्तः स्वप्नजं सुकृतदुष्कृतं यद्वदिति। तद्यथैषिकारूलमग्नौ प्रोतं प्रदूय एवं हास्य सर्वे पाप्मानः प्रदूयन्त इति श्रुतेः। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति गीतोक्तेश्च किमविशेषेण कर्माणि दह्यन्त इति नेत्याह - विना तदिहेति। इह देशे काले वर्तमाने इदं भोगायतनं शरीरं यावता येन च सुकृतदुष्कृता-द्यात्मना कर्मणा प्रारब्धं तत्तावत्कर्म विना नश्यतीत्यर्थः। एतद्देहारम्भक-कर्मणामेताद् ज्ञानोत्पादककर्मणाञ्चेतद्देहारंभकतया विरोधाभावात् तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति श्रुतेः (छा.6.14.2)। एवमस्मदादीनां लोकयात्रानविकृतानां प्रारब्धस्थितिरेकदेहभोग्या लोकयात्राधिकृतानान्तु

मनुव्यासाद्यधिकारिपुरुषाणां प्रारब्धस्य बहुदेहभोग्यत्वेपि ज्ञानतिरोधानाभावात् बाल्यकौमारादिदेह-भेदेऽप्येकदेहत्वं यथा तथा तेषामेकदेहादेवेत्यविरोधः। यावदधिकार-मवस्थितिरधिकारिणामिति दशसंख्यादेहे भोग्यतेत्यर्थः। दशवृत्या परैषिण इति वैष्णवोक्तेः। एवं देवाः सवितर ऋषयो मनवश्च हि मन्त्रैस्सहोर्ध्वं गच्छति व्यावर्तन्ते तैः सह-

जनलोकात्सुराः सर्वे पशुकल्पात्पुनः पुनः।

पर्याप्ताकाले सम्प्राप्तो सम्भुता नैव नस्य?तु।।(वा.पु.1.61.129)

अवश्यम्भाविनार्थेन सम्बध्यन्ते तदा तु ते।

ततस्ते दोषवज्जन्म पश्यन्ते रागपूर्वकम्।। (वा.पु.1.61.130)

निवर्तन्ते तदा वृत्तिस्तेषामदोषदर्शनात्।

एवं देव युगानीह दशकृत्वा निवर्तते।। (वा.पु.1.61.131)

इत्यादि वायूक्तेश्च। एतान्येव वचनानि जीवन्मुक्तिसिद्ध्यर्थं अज्ञानलेशसद्भावाद्युपगमादेहस्थितौ शिष्यादि भेददर्शन तदुपदेशसद्भावे च मानानि स्युः। ब्रह्मविद्योत्पत्तिसमकालं निःशेषज्ञानेन सह देहस्यापाते ब्रह्मविद्यासम्प्रदायोच्छेदापत्तेः। अस्ति च तत्सम्प्रदायः तद्धैतत् ब्रह्म प्रजापतय उवाच प्रजापतिः मनवे मनुः प्रजाभ्य इत्यादि छान्दोग्ये च तथा तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार (छा.7.26.2) इति च भूयश्चान्ते विश्वमायानिवृत्तिरिति लेशस्थिति, स्मृतेश्च न च शास्त्रीयज्ञानादुपदेशः तत्त्वसाक्षात्कारस्तु चरमक्षण[46] एव भविष्यतीति जीवन्मुक्तिकल्पनयेति वाच्यम्। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः इति गीतायां (4.34) तत्त्वसाक्षात्कारिणा-मेवोपदेशाधिकारोक्तेः।

येषां तन्नाममात्रेण मुक्तिर्वै नाममात्रिकी।

यैः पुनर्विदितं तत्त्वं ते मुक्ता मोचयन्त्यपि[47]। (शि.पु.7.2.15.42)

यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्त्तते।

तस्यावलोकनाद्यैश्च परानन्दोऽभिजायते।। (शि.पु.7.2.15.43)

तस्माद्यस्यैव सम्पर्कात् प्रबोधानन्दसंभवः।

गुरुं तमेव वृणुयान्नापरं मतिमान्नरः (शि.पु.7.2.15.44) ।।

इति शैवलैङ्गाद्युक्तेश्च जीवन्मुक्तिः सिद्धा। अतो मूलाज्ञाननाशेऽपि पुष्पपुटिका परिमल[48] इत्याद्येन यावत् प्रारब्धकर्मभोगमविद्यालेशोस्तीति देहं तिष्ठेदेवेति प्रारब्धस्य गतिं ज्ञानोदयात्परं करिष्यमाणमागामि संज्ञकं कर्म यत्तस्य नैष्फल्यमेवेत्याह - परन्त्विति। तत्त्वज्ञानोत्तरकालं क्रियाहेतुषु देहादिष्वभिमानराहित्येनाधिकाराभावात् अनधिकारिणा कृतमकृतमिति न्यायात् निष्फलं नाकर्तारमात्मानं संश्लिष्यतीत्यर्थः। तद्यथा पुष्करपर्णं आपो नाश्लिष्यन्त एवमेवं विदित्वा पापं कर्म न श्लिष्यत इति श्रुतेः।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते।

हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते।। (गी.18.17)

इति गीतोक्तेश्च। पापमपि पुण्यस्याप्युपलक्षणं, पुण्यपापक्षये क्षयमिति वैष्णवोक्तेः तदधिगम उत्तरपूर्वार्धयोराश्लेषविनाशौ तद् व्यपदेशादित्यादिना सूत्रितत्वाच्च। एवं ज्ञानोत्तरं कृतं पुण्यं पापञ्च ज्ञानिनमस्पृशत्। तस्मिन् प्रीतिद्वेषवतोजनो यो फलत तस्य पुत्रादयमुपयन्ति सुहृदः साधुकृत्यात् विषन्तः पापकृत्यानीत्यादि श्रुतेः।

तीर्थेश्वपच गृहे वा नष्टस्मृतिरपि परित्यजन् प्राणान्।

ज्ञानसमकालमुक्तः समकालं याति हतशोकः।।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।

इत्यादि वचनैश्च जीवन्मुक्तिरस्ति। अतो न कर्मलेपो मुक्तस्य सञ्चितानां नाशः आगामिनामस्पर्शः प्रारब्धानां भोगादेव क्षय इत्यर्थ। एवं त्रिविधकर्मक्षयात् विदुषो देहान्तेधिदेहकैवल्यमेवेति स्थितिः।

ननु विदुषः प्रारब्धकर्मभोगार्थं देहादेस्तन्मूलस्याविद्यालेशस्य चावस्थानेऽभ्युपगम्यमाने विद्वदविदुषो भोगादौ को विशेष इत्याशङ्क्याह-

भिन्ने माने स्वान्यदेहेषु साम्यात्
भोगः प्रारब्धेऽस्य मत्तादिवत् स्यात्।
जीवन्मुक्तात् भक्तलोकेष्टसिद्धिः
भक्ता दृष्टैरीशमूर्त्तेरिव स्यात् ।। 18 ।।

मूल पाठ में "दृष्टै" पर 49 और "रिव" पर 50 अंक छपे हैं: दृष्टै[49] ... रिव[50]

माने अहङ्कारग्रन्थौ भिन्ने शिथिले सति अस्य विदुषः स्वान्यदेहेषु साम्यात् परदेहतयाभिमतेष्विव स्वीयतया अभिमतेष्वपि देहादावदृढाभिमानितयानुभवः स्यात् प्रारब्धेऽस्य प्राचीनशुभाशुभफले यो भोगसाक्षात्कारः स मत्तसुप्तबालानामिव मन्दानुसन्धानो भवेत्, अन्तर्ब्रह्मानुभवस्यातिरोधानात् बहिरनुसन्धान शैथिल्येनैवास्य भोग इत्यर्थः। एवं तर्हि वेदान्तवाक्यशक्तितात्पर्याद्यनुकूलन्यायदृष्टान्ताद्य-नुसन्धान शैथिल्यात् कथं शिष्यादिबोधनादीत्याशंक्याह भक्ता दृष्टैरीशमूर्त्तेरिव स्यात् इति। विदुषः स्वतोनुसन्धानराहित्येपि ज्ञानप्रभक्तभाग्यवशादेव बोधनादि सिद्ध्यर्थं तत्तदनुसन्धानचेष्टापि भवेदेव। यथेश्वरस्यातिरोहितब्रह्मभावस्य रागद्वेषाद्यभावेपि अनुग्राह्य निग्राह्य जनसुकृतदुष्कृतवशात् गृहीतमूर्त्तेरनुग्रहादिचेष्टा दृष्टासमस्त-शक्तिरूपाणि तत्करोति जनेश्वरम्।

देवतिर्यङ्मनुष्याख्य चेष्टावन्ति स्वलीलया।
जगतामुपकाराय न सा कर्मनिमित्तजा।।

चेष्टा तस्येत्यादि।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।। (गी.9.29)

तथा-

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। (गी.10.11)

तथा

तानहंद्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।। (गी.16.19)

इत्यादि वाक्येभ्यः, तथैव ज्ञानिनोपि अनुग्रहादि चेष्टेत्यर्थः। अथवा ईश्वरस्य मूर्त्तिमिव कृष्णाद्यात्मिकां श्वेतादिव शान्तयोगाचार्यमूर्त्तिमिव च स्वभक्तानामेव भाग्यवशात् विद्वन्मूर्त्तिमास्थितस्तदीयैरेव कारणैः तत्तदनुग्रहादि करोति।

आचार्यमूर्त्तिमास्थाय पशोः पाशपरिक्षयम्।
कृत्वा देवो निजं लोकं नयत्येनमिति श्रुतिः।।

इत्यादि वायूक्तेः। अतो बाह्यभोगेषु जडोन्मत्तपिशाचायमानानामपि भरतादीनां सौवीरराजादिषु सानुबन्धानानुग्रह दर्शनाच्च विदुषोप्य-विद्यालेशात् देहादिस्थित्या जीवन्मुक्तिः प्रारब्धकर्मभुक्तिः संप्रदायविद्योक्तिश्चाविरुद्धेति सिद्धम्।

इति निजगुरु ब्रह्मात्मैकत्वबोधविधूदयात्
भवति वितततापो[51] ब्रह्मैव सन्निह यन्मुनिः।
यदनुभवसत्सान्द्रानन्दं स्वतन्त्रमहोदय-
स्तदहममलं ब्रह्मानन्दं शिवं परमं पदम्।। 19 ।।

यो मुनिः विद्याधिकारी पूर्वमपि यदेव ब्रह्म सत् स्वाविद्यामात्रप्रतिबद्धब्रह्मभावत्वात् तमस्तापवानिव जातः इत्थमुक्तप्रकारेण स्वगुरोस्तस्य ब्रह्मणः प्रत्यगात्मनश्च योऽयमेकत्वानुभवः स एवाविद्यातमसः

तापत्रयस्य चाध्यात्मिकादेः शमनच्चन्द्रवत् चन्द्रं तस्याविर्भावादिहैव जन्मनि ब्रह्मलोकादिव्यवधानं विनैव विगताविद्यो विगततत्कार्यश्च भवति। यच्च -

ब्रह्मसदनुभवानन्दसाम्यसान्द्रं विश्वाशिवोपशमनाच्छिवम्।
यदा तमस्तन्नक्तन्दिवा न रात्रिर्न्नसन्नचासज्जीव एव केवलः।।

इत्यादि श्रुतिशतप्रसिद्धं सर्वपरिच्छेदराहित्यात् अनन्तं अत एव स्वतन्त्रमहोदयः अनन्याधीननित्यसिद्ध परमनिर्वाणरूपं सर्वोत्तरतया परमं सर्वोपायप्राप्यं च यद्वैष्णवं पदं सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदमित्यादि श्रुतिसिद्धं (छा.1.2.12) तदेवाहमस्मीति सर्वशास्त्रार्थस्य संग्रहेणोक्तिः कृता वेदितव्या। इहैव विततस्तापो भवतीति वदन्नद्वैतात्मज्ञानहीनानां सत्यकामादि सगुणब्रह्मोपासकानां उपासनाज्ञानकर्मसमुच्चययोगिनां अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तानां तत्र लब्धशुद्धात्मज्ञानानां प्राकृतप्रलये आत्यन्तिकी मुक्तिरिति सूचयति। अत्र श्रुतिः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानभिनिसृतैका तयोध्वमानयन्नमृतत्त्वमेति विष्वन्नन्या उत्क्रमेण भवन्तीति मूर्धन्या नाडी सुषुम्ना तयाप्युत्क्रान्तानां अर्चिरादिमार्गैः नाड्यन्तरैरुत्क्रान्तानां केवलकर्मयोगिनां धूमादि मार्गेण चन्द्रमसं प्राप्य प्रत्यावृतानां स्वकर्मशेषानुरूपं तत्तद्योनिषु जन्म स्यात्। अर्चिरादिमार्गादौ छान्दोग्योपनिषद्यथा इमेऽरण्ये श्रद्धा तपसा सत्यमित्युपासते तेऽर्च्चिषमभिसंभवन्ति अर्चिषो हरन् आपूर्यमाणपक्षमापूर्यमाणपक्षाद्या षड्डुदन्देति मासात् तन्मासेभ्यः संवत्सरं संवत्सरादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसोविद्युतं तत्पुरुषो मानवः। स एनान् ब्रह्म गमयत्येषदेवयानः पन्था एतेन प्रतिपद्यमाना इमं मानवमान्नावर्त्तन्त इति।

मुण्डके च -

बेदान्तविज्ञानसुनिश्चितार्थाः

सन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोके तु परन्तकाले
परामृताः परिमुच्यन्ति सर्वे।। (मु.3.2.6)

ब्रह्माण्डे च ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे परस्यान्ते कृतात्मनः प्रविशन्ति परं पदम्। अयं च मार्गः सगुणब्रह्मात्मक त्रिगुणमूर्त्त्युपासकानां समानः सत्यलोक एव त्रिमूर्त्तीनां स्थानांशभेदात् स्थितेः। तत्र हि तत्तद्देवताभक्ता स्वस्वोपास्यदेवताभिः सहैक देहदेहित्वलक्षणं सायूज्यं शिशुपाल इव भगवता यान्ति केचित्तदेकलोकवासं सालोक्यं यथा कामधेनुवाहनहंसाद्याः अपरे तु तदासन्नदेशस्थितिसामीप्यं ब्रह्मण एव यथा सावित्र्याद्याः एते तु तत्समानाकारं सारूप्यं यथा शिवेन रुद्राः अन्ये तत्समानैश्वर्यतां यान्ति यथा नन्दी शम्भुनेत्याद्युदाहार्यम्। अर्चिरादिमार्गेण संग्रहश्लोको यथा -

अर्च्चिर्घसोद्धमासस्सितउदगयनेषडर्कस्य मासाः
तेभ्यो वाय्वर्कचन्द्रास्तद्धिदथवरुणश्शक्रधात्रोश्च लोकौ।
वोढारोवैद्युतोर्वा जनयति तत्पुरुषो वैद्युतस्तेभ्य ऊर्ध्वं
आब्रह्मान्मानवोस्मात् परमितिकथयन्त्युत्तरमार्गमेतम्।।

धूमादिमार्गे च छान्दोग्ये यथा - अथ य इमे ग्रामइष्टापूर्त्तदत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं शत्रेरपरपक्षमपरपक्षाद्यात् षट् दक्षिणैति मासांस्तान्नयति संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशं आकाशाच्चन्द्रमसं एष सोमो राजा तद्देवानामनन्त-देवानभक्षयन्ति तस्मिन् यावत्संपातमुषित्वा तथैव तमेवाध्वानं पुनरावर्त्तन्त इत्यादि तथैतद्यथेह रमणीयाचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा चण्डालयोनिं वेत्यादि धूमादौ यथा संग्रहश्लोकः अथवा शतरुद्रीयं जपेदामरणाद् द्विजः। (ईश्व.2.11.99)

-

धूमं रात्रिं बहुलमयने दक्षिणेर्कस्यमासान्
आपद्यन्ते पितृपदमथ व्योमचन्द्रं दिवं च।
प्रत्यावृत्तौ गगनपवनौ धूममभ्रं च मेघं
वृष्ट्योद्भिज्जान् पुरुषवनिते दक्षिणो मार्ग एषः।।

अर्थादन्येषां पुण्यपापकृतां स्वर्गनरकौ ज्ञेयौ। तत्त्वविदां तु साक्षात् विदेहकैवल्यमेव हृदयग्रन्थेर्विभेदा लिङ्गशरीर राहित्यात् तदधीनो-त्क्रान्तिगत्याद्यभावात् सर्वकर्मक्षये पुनर्जन्मानुपपत्तेः इहैव देहे ज्ञानसमकालमेव मुक्तिः न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवलीयन्ते, तमेवं विद्वानमृत इह भवति (बृ.4.4.9) अत्र ब्रह्म समश्नुते (ब.4.4.7) विमुक्तश्च विमुच्यते, ब्रह्मैव सत् ब्रह्माप्येति, ब्रह्म वेद ब्रह्मैवभवति (मु.3.2.9) इत्यादि श्रुतिभ्यश्च वाराणस्यान्तु पातकन्न प्रविशति तत्र मृतो मुक्त एव तत्र सर्वप्राणिनां प्रयाणकाले विश्वेश्वरेण तारक-ब्रह्मविद्योपदेशात् तन्मूर्त्तिसाक्षात्काराच्च क्षीणकर्मणां तत्क्षेत्रे मरणं तत्रत्यानामेव तारकोपदेशः ततो ज्ञानं ज्ञानादेव मोक्षश्चेति युक्तम्। अतस्तत्काश्यामपि विश्वेश्वरसारूप्याद्यन्यतमा मुक्तिरस्त्येव तत्रैव क्वचिदीशसन्निधौ व्याघ्रहतस्य हरिणस्य सद्यः शिवसारूप्येण शिवलोकप्राप्तिर्बभूवेति कौर्मोक्तिलिङ्गदर्शनात् काशी वाराणसी अविमुक्तमन्तार्गेहं चेति चतुर्था क्षेत्रावान्तरकक्ष्यावशात् तत्र जीवयोग्यतानुरूपञ्च मुक्तिषु तारतम्यं च कल्प्या। मुक्तिस्तु तत्र कृतपापानामपि तत्रैव मरणे सिद्धैव वरणाया अस्याश्च मध्ये आविमुक्तः प्रतिष्ठित इत्युपक्रम्य अत्र हि जन्तोः प्राणैरुत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्ट इति जाबालश्रुतेः (जा.1.1)।

यावज्जीवं जपेद् युक्तः प्रणवं ब्रह्मणो वपुः।

एकाकी यतचित्तात्मा स याति परमं पदम्।
वसेद् वामरणाद् विप्रो वाराणस्यां समाहितः।। (ईश्व.2.11.100)
सोऽपीश्वरप्रसादेन याति तत् परमं पदम्।
तत्रोत्क्रमणकाले हि सर्वेषामेव देहिनाम्। (ईश्व.2.11.101)
ददादि तत्परमं ज्ञानं येन मुच्येत बन्धनात्।। (ईश्व.2.11.102)

इतीश्वरगीतोक्तेश्च। तत्र संग्रहश्लोकाः -

यावज्जीवं प्रणवमथवा वर्त्तयेद्रुद्रियं वा
याजुर्वेदं वसतिमपि वा वारणस्यां विदध्यात्।
त्यक्वा लज्जां कलिमलकुलच्छेदकानीरयेद्वा
विष्णोर्नामान्यनिशममृत प्राप्तिरेवं चतुर्धा।।
गङ्गायां मरणं चैव दृढा भक्तिश्च केशवे
ब्रह्मविद्याबोधश्च नाल्पस्य तपसः फलम्।
प्रयागे वा मुक्तिरिह वा मत्परिग्रहात्
प्रयागादपि तीर्थाग्र्यादियं काशी विशिष्यते।।

इत्यादि वाक्येभ्यश्च काश्यां जनस्य सिद्धत्वात् ज्ञानादेव मोक्षः सिद्धः। यत्तु -

अयोध्या मधुरा काञ्ची माया काशी ह्यवन्तिका।
पुरीद्वारवती चैव सप्तैते मुक्तिदायकाः।।

इति वाक्यं तत्र काशीतरपुरेषु मृतानामपि क्रमेण मुक्तिरस्तीत्येवं परं, काश्यां ब्रह्मविद्याया सिद्धत्वात् सद्यो मुक्तेः। अत आत्मविदो विदेहकैवल्यमेवेति वेदान्तानां तत्प्रकरणस्य स्वात्मयोगप्रदीपस्य च प्रयोजनमिदमेवेति सिद्धम्।

एवं समाप्तस्य प्रकरणस्य स्वात्मयोगप्रदीपाख्यस्याविप्लवार्थं ग्रन्थसंख्यां सूचयन् प्रदीपरूपेणान्वर्थतां द्विश्लोक्याह -

शिवकृतिसमवृत्तस्नेहवत्पात्रवर्त्ती
प्रगुणदशकदीप्ततत्त्वविद्याप्रभाढयम्।
सकलनयपुराणाम्नायसन्मल्लिकास्थं
प्रकटमकृत योगी स्वात्मयोगप्रदीपम्।। 20 ।।

रुद्राणामेकादश संख्यात्वात् तत्पर्यायशिवशब्देनैकादश संख्या लक्ष्यते। तथा कृतिर्गुणविशेषो वर्गाख्यः। स्वेन स्वगुणनं हि वर्गः। तेनैकादशसंख्यया गुणेन एकविंशशतं संपद्यते। तत्समानि वृत्तान्येकविंशत्यधिकशतं संख्यानि यस्य स तथोक्तम्। तथा स्नेहवत्सु गुरुदेवताशास्त्रानुरागिषु अत एव पात्रभूतेषु उत्तमाधिकारिषु वर्त्तितुं शीलं यस्य प्रगुणः

श्लेषः प्रसादस्समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्त्वमोजः कान्ति समाधयः।।

इति काव्यलक्षणप्रसिद्धा ये प्रकृष्टाः प्रबन्धस्य गुणाः तेषां दशकेन यो दीप्त उज्वलः तमिति प्रबन्ध लक्षणे योजना। प्रदीपपक्षे तु शिवकृतिशोभनकरणरचनं समं वर्त्तुलं घृतादिस्नेहयुक्तं यद् भान्तं तद्वर्त्तिनी प्रगुणाप्रकृष्टसूत्रमय्येव दशावर्त्तियस्य स प्रगुणदशकः। स्वार्थे कः प्रत्ययः स च दीप्तश्चेति कर्मधारयः तं प्रदीपमित्यर्थः। तत्त्वं परतत्त्वं तद्वत् विद्यारूपया प्रभया आढ्यं संपन्नं सकलाः पूर्वोत्तरमीमांसादिसिद्धा ये न्यायाः तथा पुराणानि तानि च इतिहासानामप्युपलक्षणम्। आम्नाया ऋग्वेदादि वेदाः तदविरुद्धा सांख्य योगशैवसारस्वताद्यागमाः लक्ष्याः। त एवं सती सुप्रतिष्ठिता मल्लिकासूत्राधारयष्टिः तत्रास्ते सर्वश्रुतिसिरसिनिहितं स्वात्मयोगस्य जीवब्रह्मैक्यस्य प्रकाशनात् प्रकरणमिदं योगी अमरानन्दयोगीश्वरः प्रकटमनावृतं सर्वलोकप्रकाशमकृतकृतवान्। अनेन प्रकरणेन उपनिषदात्मतत्त्वं

अविद्यानिरसनात् प्रकाशितमित्यर्थः।

अत एवाविद्यानिरसनमेव आत्मप्रकाशनमिति प्रकरणस्य प्रयोजनं प्रदर्शयन् ग्रन्थनिर्माणस्थानकर्तृनामादि च दर्शयन् ग्रन्थस्य प्रचय-प्राप्तिमाशास्ते।

श्रीमत्काश्यां स्वनिरुपमबोधात्मविश्वेशदृष्ट्यै
ग्रन्थस्सर्वानुभवमुनिमुख्यात्मवित् सम्मतोयम्[52]।
द्वैतध्वान्तं सपदि विनुदन्[53] दर्शयन्नात्मतत्त्वं
योगीन्द्रोक्तो जगति जयतु स्वात्मयोगप्रदीपः।। 21 ।।

काश्यां सर्वसम्पत्तिमत्वेपि श्रीरत्र विद्याश्रीर्विवक्षिता। ऋचः सामानि यजूंषि स हि श्रीरमृता सतामिति मन्त्रवर्णात् नित्ययोगलक्षणश्चायं मतुप्। अत्र हि जन्तोः प्राणैरुत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे (जा.1.1)। अतः तादृश्यां काश्यां वाराणसीक्षेत्रे योगीन्द्रोक्तो[54] योगीश्वरेणामरानन्दाख्येन निर्मित स्वात्मयोगप्रदीपाख्योऽयं ग्रन्थो जगति जयतु सर्वोत्कर्षेण वर्त्ततां प्रथतामिति योजना। किमर्थं काश्यां कृतः[55] स्वस्यात्मभूतस्य श्रीमन्निरुपमबोधात्मनो विश्वेश्वरस्य जगज्जन्मादिकारणत्वलक्षितस्य परब्रह्मणो दर्शनार्थं कर्तरि षष्ठ्या समासः। विश्वेश्वरो ग्रन्थमिमं दृष्टवा अनुगृह्णातु इत्येतदर्थं विद्वदनुभवसम्मतश्चाय-मित्याह-सर्वानुभवाद्या हि मुनयो यतयः तत्कालं काशीक्षेत्रं अलङ्कुर्वन्ति। श्रीजगदाराध्यप्रशिष्याः[56] तत्संमत इति उत्संप्रदायपरिहारो ग्रन्थस्य उच्छास्त्रत्वपरिहारस्तु सकलनयपुराणाम्नायेत्यनेन दर्शित इति भावः। ग्रन्थोह्ययं अविद्यातमोमयं द्वैतभेदमपनुदन्नेव प्रत्यगात्मतत्त्वं दर्शयन्निति हेत्वर्थे शतृप्रत्ययः। परमपुरुषार्थप्राप्तिलक्षणं फलमस्येति दर्शयति। तेन परमपुरुषार्थमीहमानैरभ्यसनीयोऽयं ग्रन्थ इत्युक्तं भवति।

अथेवं समाप्तस्य प्रकरणस्य लोके प्रचयगमनाद्यर्थं स्वगुरुभक्तिप्रणामलक्षणं मङ्गलमाचरति।

अमरानन्दं वन्देप्यनुपमसुखरूपमपि च निरुपमबोधम्।
यत्कृपयेमं कृतवान्[57] ग्रन्थं योगीश्वरोहममरानन्दः।। 22 ।।

अमरानन्द नाम्नो योगीश्वरस्य ग्रन्थकर्तुः ये गुरवो निरुपमबोधाभिधाना ये च प्राञ्च आचार्याः जगदाराध्यापरपर्याया-नुपमसुखरूपसंज्ञा ये च परमाचार्या अमरानन्दनामानस्तान्नमस्करोमि। येषां कृपया कारुण्येन आत्मतत्त्वोत्पादनद्वारेणानुगृहीतोऽहममरानन्दाख्यो योगीश्वरः स्वात्मयोगप्रदीपाख्यमिमं ग्रन्थं अकृषि तन्नमस्करोमीति प्रकरणसमाप्तौ सृष्टिक्रमेण नमस्कारोक्तिः तदभ्यासिनां कर्तृश्रोतृरध्येतु-रध्यापयितुश्चेति एवमादीनाञ्च अभ्युदयार्था मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति श्रीमन्महाभाष्योक्तेः। अतः सर्वेषां सर्वाभ्युदयार्थं आदिमध्यावसानेषु देवताप्रेमरूपं मङ्गलमाचरणीयमिति सिद्धम्।

योगीव्याख्यन्निरुपमबोधशिष्यः कुमारजः।
स्वात्मयोगप्रदीपे स्वे षष्टीं तां योगविंशिकाम्।।
सच्चिदानन्दवाक्यार्थदेवतायोगविंशिका।
प्रबोधितस्वात्मयोगप्रदीपस्वात्मदृष्टये।।

श्रुतिस्मृतीतिहासादिवाक्यान्यत्रान्यदीदृशं।
व्याख्येयमूलभूतानि विद्वत्प्रत्ययसिद्धये।।

नमोऽस्तु श्रीनिरुपमबोधनाम्ने स्वतेजसे।
अनन्तसच्चिदानन्दरूपाय परमात्मने।।

इति श्रीनिरुपमबोधशिष्यस्यामरानन्दयोगीश्वरस्य कृतौ स्वात्मयोगप्रदीपप्रबोधिन्यां षष्टी योगविंशिका सम्पूर्णा।

ओं शिवोहम्।।

1. This verse is missing in M T.
2. M T - नित्यमुक्तादि व्यक्तिरिति।
3. M T - सन्ततं।
4. M T - द्विधासो।
5. M T - समर्थः।
6. M T - परमपुरुषार्थस्य साधने।
7. M T - सत्तयां।
8. M T - पर्वत। T T पर्वत।
9. M T - दोषाश्रयं। T T दोषश्रयं।
10. T T - दोहात्मादौ। This verse is missing in M T.
11. M T - दृष्टानुश्रावितेषु। T T - दृष्टानुश्रावितेषु।
12. M T - प्रशस्त्रादिप्रसिद्धिता।
13. T T - असदुःखकरं।
14. M T - अनध्यान।
15. M T - कैवल्यं चेतनं।

16. M T - तुर्यातीको। T T - तुरीयातीतौ।

17. T T - योमाङ्गानां।

18. M T - एके। T T. एके।

19. M T - अङ्गारोग्य। T T - अङ्गरोग्य।

20. M T - पुरमेव।

21. M T - क्रियाभेदाः। T T - क्रियाभेदाः।

22. This line is in complete in M T.

23. M T - शुद्धो। T T - शुद्धो।

24. T T - पक्षभेदिन्या।

25. T T - चललचित्तं।

26. T T - जानी हि।

27. M T - गर्भयेत्।

28. M T - चालने।

29. M T - दौमलस्यं।

30. M T - समाभ्युदयः।

31. T T - गुणबौद्धं।

32. M T - गायव्यादीनि।

33. M T - मुखात्म।

34. T T - तत्पदं।

35. T T - प्राणशरीर।

36. M T - योगं।

37. T T - अद्रेश्चाद्युपनिषदि।

This verse is missing in M T.

38. T T - लिङ्गितांशम्।

39. M T - तदानन्दसान्द्रं। T M - तदानन्दसान्द्रं।

40. Commentary of this verse is not seen in M T.

41. M T - बोधाल्प।

42. M T - समूर्त्तिः।

43. M T - तन्निखण्डश्चात्मनि।

44. M T - बोधक सपदि।

45. M T - अहङ्कारकर्मसु।

46. T T - परमक्षण।

47. M T - मोचयत्यपि।

48. M T - परिमलेन।

49. M T - दृष्टैरिष्टा।

50. M T - मूर्तैरिव।

51. M T - T T - वितमन्तस्तापो। M T. वितमन्तस्तापो।

52.M T - सम्मतो।

53. M T - विनुदन्नात्मतत्त्वं।

54. M T - योगीन्द्रो।

55. T T - कृतं।

56. M T - प्रसिद्धाः।

57. M T - कृतवानर्थं।

APPENDIX-I

श्लोकानुक्रमणिका

अक्षलिङ्गवचन	IV . 5
अचिदपवरक	I . 11
अज्ञानतत्कार्य	II . 4
अणुपधिरणुता	I . 18
अतर्किताश्चर्य	II .14
अतोऽस्य कर्त्ता	V . 3
अथ योगिन	VI.16
अद्रेश्याद्युपनिषदापि	VI .14
अध्रुवध्रुवविवेक	IV . 2
अनावृतानन्य	II .20
अनुपमसुखरूप	I . 3
अन्नादिभेद	III . 18
अन्यैस्तदन्य	III . 4
अमरानन्दं वन्दे	VI. 22
अवयवमिति	I . 8
आम्नायदुग्धजलधिं	III . 20

इति कृतनरमोहे	I .7
इति निजगुरु	VI. 9
इह प्रकृतबोध	VI .17
इह वपुषि यथैका	I .15
उदयदुतरिक्तै :	I .17
उपनिषदां स्वात्मैक्ये	VI. 2
किन्त्वनात्मविनिवर्तना	IV.12
क्वापि तद्द्वयभिदाकर	VI. 8
क्वापि दैवतमह	VI. 7
गलितसकलवेल	I . 22
गौणकाम्ये कामा	VI. 5
चलति चपलचित्त	VI.10
चिदात्मभित्तौ	II. 10
चिदीश्वरस्वात्म	V.12
चिन्मयस्य महसो	IV. 6
जयति निगमशिष्टिः	I. 2
जिज्ञासितेप्सित	III. 6
ज्ञानन्तु शान्तामल	V.17
तत्तद् गृहीतविषया	III . 2
तत्त्वमादि स य	IV .19
तत्त्वासनातत्त्व	V .15
ताम्बूलमव्यक्तगुण	V .19
तेजश्चिदेवाचलधाम	V .10

त्यजति भजति	I .10
दिनपतिरिह	I . 6
दृश्यं च भिद्येत	III . 7
दृष्टावुपहिततमा	III .13
देहाक्षादौविरक्तिर्यम	VI . 4
देहेन्द्रियासु मनसां	III .19
न च करणकलापे	I . 9
न च तदसुख	I .13
न जागरे स्वप्न	II . 5
नात्र बोधविधि	IV .10
नाशाद्विरोधिगुण	III . 18
परापरभक्त्येत्थे	VI . 1
पूर्वाद्यदत्रिगुण	III . 1
प्रकाशते चेज्जडता	II . 17
प्रज्ञानतो लब्धभव	II .9
प्रतितनुविभुनाना	I .19
प्रत्यग्बोधपुरुषोत्तम	III . 9
प्रधानकालाद्यणु	V . 2
प्रपञ्चस्य भाने	VI .15
प्राणेन्द्रियासनजितो	III . 7
ब्रह्म चैकमपि	IV .1
ब्रह्मैकमाभाति	V .20
भवति विधिनिषेधे	I . 20

भिन्नदुःखिकृपणा	IV .16
भिन्ने माने स्वान्य	VI .18
भेदेऽधिके स्वाश्रयता	II . 8
भेदोऽस्ति नैक्षवरसे	III .11
मत्सौख्यमेव सुख	III .6
मनोगाधारमुखाब्ज	VI .12
मनो वचो लोचन	II .1
महदहमविशेषोद्भूत	I . 21
मानमात्मनि विधि	IV .11
मुक्तिर्गुरुश्रुत्युदित	V . 1
मुख्यतत्त्वमिह	IV .13
मुख्यबाध उचितं	IV .17
मोहविभ्रमविमत्यदर्श	IV . 4
यज्जीवकर्मानुगुणं	V . 4
यत्संगिसंगत परम्पर	III . 5
यथा सुखात्मात्म	V . 7
यल्लोकराष्ट्रपुरवेश्म	VI . 6
यस्याः स्वमाया	II. 16
या स्तम्भकुम्भानुभव	II . 6
या स्थायिभावरतिरेव	III.15
या स्वात्मलीलालहरी	II .13
योऽसौ रसः स्फुरति	III .17
लिङ् पदादिवदविशेष	IV . 9

लेपः स्वशक्तिः	V . 18
लोकाब्जमूले	II .15
वपुरसुकरणादेरस्ति	I . 5
विद्यया मननचिन्तनांगया	IV . 3
विराडाद्यं रूपं	VI .13
विश्वातिरिन्द्रियमनो	III .14
विष्णवीशानरमांबिका	VI. 11
व्योमेव रंभात्वचि	II .19
शिवकृतिसमवृत्त	V .20
श्रान्त्यै शिरः करधृतं	III . 3
श्रीमत्काश्यां स्वगुरु	VI .21
स आप्तकामस्वसुखा	V . 11
सगुणः तदितरात्मना	VI . 3
स च निरवयवत्वात्	I .16
सच्चित्सुखव्याप्त्यनिल	V .13
सच्चिदद्वयसुखात्मक	IV .15
सच्चिदित्यखिलहेतु	IV .20
सच्चिन्महः सुखरसः	III . 10
सत्ता समस्तेन्द्रिय	II . 3
सदसदितररूपान्	I . 4
सन्मात्रसत्यसुख	III . 12
समस्तवस्त्वेकनिदान	II . 2
सर्वज्ञताचित्सुखमेव	V . 9

सर्वत्र कार्योदय	V . 5
सर्वमेव वदत	IV . 7
सिसृक्षयोन्मीलित	II . 12
सूत्रभारतपुराणसंहिता	IV .18
स्फुरति तु मयि	I . 12
स्फुरितसकलजन्म	I . 1
स्वतन्त्रकर्त्तृत्वबलेन	V . 8
स्वधाम विश्वाश्रय	V . 16
स्वप्रभे विगुणजातिकेन	IV .18
स्वमहिमसमरंग	I . 14
स्वसिद्धिसिद्ध	II .18
स्वात्मनीदमहमादि	IV .14
स्वाधारधीमुख्य	V . 14
स्वाधारोद्यत्प्रणवनिलयं	VI . 9
स्वानन्यसिद्धं	V . 6
हृद्व्योम्नि स्वात्मनि	II . 11

APPENDIX-II

परामर्शग्रन्थानुक्रमणिका

अनुभवपञ्चाशिका

अनुभवसाहस्री

ईश्वरगीता

उपदेशसारः

कूर्मपुराणम्

कृष्णपूजापद्धतिः

गौडपादकारिका

नाट्यशास्त्रम्

निर्गुणाष्टाङ्गयोगपद्धतिः

नीतिशतकम्

पञ्चीकरणम्

पाणिनीयशिक्षा

प्रपञ्चसारः

ब्रह्मसूत्रम्

भगवद्गीता

भागवतपुराणम्

मनुस्मृतिः

मनोहरस्तोत्रम्

मुक्तिश्रीः

योगसूत्रम्

लिङ्गपुराणम्

वाक्यवृत्तिः

वायुपुराणम्

विष्णुधर्मोत्तरपुराणम्

विष्णुपुराणम्

शिवपुराणम्

षट्धातुसमीक्षा

संक्षेपशारीरकम्

स्वात्मसिद्धिः

APPENDIX-III

परामृष्टग्रन्थकारानुक्रमणिका

अनुपमबोधाचार्यः

अनुपमसुखः

अमरानन्दः

गौडपादाचार्यः

तत्त्वबोधाचार्यः

तत्त्वानुभवाचार्यः

निरुपमबोधः

पतञ्जलिः

बादरायणः

भट्टाचार्यः

भगवत्पादाचार्यः

भरतमुनिः

भर्तृहरिः

मनुः

लक्ष्मीधराचार्यः

विश्वरूपाचार्यः

शङ्कराचार्यः

शौनकः

सर्वज्ञात्ममुनिः

सुखात्मबोधाचार्यः

सुरेश्वराचार्यः

APPENDIX-IV

उद्धृतवाक्यानुक्रमणिका

	ग्रन्थभागः	प्रकरणम्
अमृतबिन्दूपनिषद्		
एकधा बहुधा चैव	12	II.6
ईशावास्योपनिषद्		
तस्मन् सर्वाणि भूतानि	7	III.3,III.13
ईश्वरगीता		
एकाकी यतचित्तात्मा	2--11-100	VI.19
ददादि तत्परमं	2-11-102	VI.19
यत्तत्सर्वगतं	2- 2- 44	I.21
यदा सर्वाणि भूतानि	2- 2- 32	II.11
यावज्जीवं जपेद्	2-11-99	VI.19

सत्त्वं ज्ञानं	2-7-27	I.21
	ग्रन्थभागः	प्रकरणम्
सर्वज्ञतातृप्तिः	2- 8- 13	II.14
सोऽपीश्वरप्रसादेन	2-11-101	VI.19

ऋग्वेदः

इन्द्रो मायाभिः	6-47-18	I.4

ऐतरेयोपनिषद्

अथास्यायमितर आत्मा	2-4	IV.2
आत्मा वा इदमेक	1-1-1	I.1,19,II.2
प्रज्ञानं ब्रह्म	3-3	I.1, V.2
यत् किं चेदं प्राणि	3-3	II.2,9
स इमाँल्लोकान्	1-1-2	I.1,II.2
स ईक्षत	1-1-1	I.1, II.2

कठोपनिषद्

अणोरणीयान्	2-20	I.18,VI.1,VI.6
आत्मेन्द्रियमनोयुक्तं	1-3	IV.14
तमेव भान्तं	5-15	VI.15
न तत्र सूर्यो	5-15	II.1
न प्राणेन	2-5	I.9

कूर्मपुराणम्

इन्द्रियाणां विरचतां	2-11-38	VI.3

	ग्रन्थभागः	प्रकरणम्
एवं संबोधितो रुद्रो	1-16-116	V.8
कापालं नाकुलं वामं	1-16-117	IV.8
कालः सृजति	1-12-17	I.16
जायन्तो मानुषो	1-16-119	IV.8
तस्माद्धि वेदबाह्यानां	1-16-115	IV.8
रेचको बाह्यनिश्वासात्	2-11-37	VI.3
सर्वज्ञतातृप्तिः	2-8-13	II.14
सृष्ट्वा तानाह	1-16-118	IV.8
हृत्पुण्डरीके नाभ्यां	2-11-39	VI.3

केनोपनिषद्

अन्यदेव तद्	1-4	IV.12
यच्चक्षुषा न	1-7	II-1
यद्वाचानभ्युदितं	1-5	II.1
यतो यतो निश्चरति	6-26	VI.10
यत्करोषि यदश्नासि	9-27	V.1
यदादित्यगतं तेजो	15-12	II.1

यन्मनसा न	1-6	II.1
यस्यामतं तस्य	2-3	IV.12

भगवद्गीता

अहं क्रतुरहं यज्ञः	9 -16	V.13
ईश्वरः सर्वभूतानां	18- 61	I.15
जातस्य हि ध्रुवो	2-27	I.15

	ग्रान्थभागः	प्रकरणम्
ज्ञानाग्निः सर्वकर्माणि	4- 37	VI.17
तद्विद्धि प्रतिपातेन	4-34	IV.2, 14, VI.17
तानहं द्विषतः क्रूरान्	16-19	VI.18
तेषामेवानुकम्पार्थ	10-11	VI.18
देहिनोऽस्मिन् यथा	2-13	I.15
न च मां तानि	9- 9	I.6,19
न तद् भासयते	15- 6	II.1
पत्रं पुष्पं फलं तोयं	9-26	V.19
प्रकाशं च प्रवृत्तिं च	14-22	I.21
प्रसादे सर्वदुःखानां	2-65	VI.1
बाह्यस्पर्शेष्वसक्तात्मा	5-21	III.7
भक्त्या त्वनन्यया	11-54	VI.1
ममैवांशो जीवलोके	15- 7	IV.14

यस्य नाहंकृतो भावो	18-1	VI.17
	ग्रन्थभागः	प्रकरणम्
या निशा सर्वभूतानां	2-69	III.9
शुभाशुभफलैरेवं	9-28	V.1
समोऽहं सर्वभूतेषु	9-29	VI.18
सुखमात्यन्तिकं	6-21	III.7

गौडपादकारिका

अन्यथा गृह्णतः स्वप्नो	1- 15	II.5
अस्पर्शयोगो वै	3- 39	VI.14
त्रिषु धामसु	1- 5	II.3, III.2
दक्षिणाक्षिमुखे	1- 2	II.3
लये संबोधयेच्चित्तं	3- 44	VI.10
विश्वो हि स्थूलभुग्	1- 3	II.3
स्वप्ननिद्रायुतावाद्यौ	1- 14	II.5

छान्दोग्योपनिषद्

अथ खलु क्रतुमयः	3-14-1	II.14
अथ य आत्मा	8- 4-1	V.11
अनेन रूपेणात्मना	6- 3-2	III.10
अस्मच्छरीराद्	8-12-3	IV.12

अस्य लोकस्य का गतिः	1-9-1	II.11
	ग्रन्थभागः	प्रकरणम्
आकाशो वै नाम	8-14-1	II.11
आचार्यवान् पुरुषो	6-14-2	III.2
आत्मैवेदं सर्वं	7-25-2	I.19
एष आत्मा हृदि	8- 3-3	I-5
ऐतदात्म्यमिदं सर्वं	6- 8-7	I.20,II.7, IV.12,VI.7
कं ब्रह्म स्वं ब्रह्म	4-10-5	III.18
ज्यायान्दिवो	3-14-3	I.8
तत्त्वमसि	6- 8-7	IV.9,12,19,VI.7
तदैक्षत बहु स्यां	6- 2-3	VI.7
तरति शोकं	7- 1-3	II.15, III.12,IV.10
तस्मै मृदितकषायाय	7-26-2	IV.2, VI.17
तस्य तावदेव	6-14-2	VI.17
तं यथायथोपासते	3-14-1	IV.13
पादोऽस्य विश्वा	3-12-6	V.11
प्रादेशमात्रमविविमानं	5-18-1	I.18
य आत्मा अपहतपाप्मा	8- 7-1	IV.12
यत्र नान्यत्पश्यति	7-24-1	II.2, III.16
यो वै भूमा	7-23-1	II.2

वाचारम्भणं विकारो	6-1-4	I-16
	ग्रन्थभागः	प्रकरणम
सदेव सोम्येदमग्र	6- 2- 1	I,1,10,20,IV. 12,13,V.1, VI.7
स भगवः कस्मिन्	7-24-1	I.14
सर्वं खल्विदं ब्रह्म	3-14-1	I.16
सेऽयं देवतैक्षत	6- 3-2	II.1, IV.13
सोऽध्वनः पारमाप्नोति	1- 2-12	VI.19

जाबालोपनिषद्

अत्र हि जन्तोः	1- 1	VI.19
य एषोऽनन्तोऽव्यक्त	2- 1	I.1
सो विमुक्तं	2- 2	I.1

तैत्तिरीयोपनिषद्

आत्मनः आकाशः	2- 1	I.16
आनन्दो ब्रह्मेति	3- 6	III.18
तत्सृष्ट्वा तदेव	2- 6	I.5
तद् विजिज्ञासस्व	3- 1	III-1
तस्माद्वा एतस्मादात्मनः	2- 1	III.18

	ग्रन्थभागः	प्रकरणम्
यतो वा इमानि	3-1	I.1,5, IV.20
यतो वाचो	2-9	III.5
युवा स्यात् साधु	2-8	III.6
रसो वै सः	2-7	I.2, III.15
स च रसं ह्येवायं	2-7	III.2
सत्यं ज्ञानमनन्तं	2-1	IV.18
स यश्चायं पुरुषे	2-8	III.18,IV.19
स वा एष पुरुषो	2-1	III.18
सोऽकामयत	2-6	I.2, II.10

तैत्तिरीयब्राह्मणम्

नावेदविन्मनुते	3-12-9-7	I.1, III.20
येन सूर्यस्तपतिः	3-12-9-7	II.1

त्रिपुरातपिन्युपनिषद्

एक एव हि भूतात्मा	5-12	I.5

नाट्यशास्त्रम्

त्रासश्चैव वितर्कश्च	6-21	III.15

ब्रह्म पुच्छं प्रतिष्ठा	2- 5	III.18
	ग्रन्थभागः	प्रकरणम्
निर्वेदग्लानिशङ्का	6-18	III.15
रतिर्हासश्च	6-17	III.15
व्रीडा चपलता हर्ष	6-19	III.15
श्रृङ्गारहास्यकरुण	6-15	III.15
सुप्तं प्रबोधो	6-20	III.15
स्तम्भः स्वेदोऽथ	6-22	III.15

निरुक्तम्

जायते अस्ति वर्धते	1- 1	I.8
अथातो दैवतं	7- 1	V.15
आत्मजन्मानः	7- 1	V.15

पुरुषसूक्तम्

पादोऽस्य विश्वा	3	V.11
स भूमिं विश्वतो	1	V.11

प्रश्नोपनिषद्

एष हि द्रष्टा	4- 9	VI.6

प्रपञ्चसारः

आदौ तारः	28- 5	VI.9
मूलाधारात्	2- 44	V.14

बृहदारण्यकोपनिषद्

अथ मर्त्योऽमृतो	4-4-7	III.12,VI.19

	ग्रन्थभागः	प्रकरणम्
अनन्वागतं पुण्येन	4-3-22	IV.12
अत्र ब्रह्म समश्नुते	4-4- 9	II.14, VI.19
अत्रायं पुरुषः	4-3- 9	I.10, IV.4
अयमात्मा ब्रह्म	2-5-19	I.22, II.3
असङ्गोह्ययं पुरुषः	4-3-15	IV.12, VI.7
अस्थूलमनणु	3-8-8	I.1, IV.12, VI.14
आत्मा वा अरे	2-4-5	III.20, IV.10, VI.2, 7
आत्मा वा इदमग्र	1- 4-10	IV.19
आत्मैवास्य ज्योतिः	4-3- 6	I.11,22
एतस्यैवानन्दस्य	4-3-32	III.2
एवमेवायं पुरुषः	4-3-21	I.11
तदेतद्ब्रह्मापूर्व	2-5-19	IV.12
तद्धैतत्पश्यन्	1-4-10	I.19
तद्यथाहिर्निल्वयनी	4-4- 7	VI.16

तस्य ह वा एतस्य	2-4-10	II.13, IV.7
	ग्रन्थभागः	प्रकरणम्
तं तु औपनिषदं	3-9-26	III.4
ध्यायतीव लेलायतीव	4-3- 7	I.6
न तत्र रथा न	4-3-10	I.1, II.2, V.8
न वा अरे	2-4- 5	III.4
न हि द्रष्टुर्दृष्टे	4-3-23	I.11, II.4
प्राज्ञेनात्मना संपरिष्वक्तो	4-3-21	I.11
प्रियया स्त्रिया	4-3-21	II.2
मृत्योः स मृत्युं	4-4-19	I.19
यत्र त्वस्य सर्व	4-5-15	II.11
यत्र हि द्वैतमिव	4-5-15	II.11
यदा सर्वे प्रमुच्यन्ते	4-4- 7	I.22
यः पृथिव्यां तिष्ठन्	3-7- 3	V.4
योऽकामो निष्काम	4-4- 5	III.2, V.1, 11
रूपं रूपं प्रतिरूपो	2-5-19	IV.12
विज्ञातारमरे केन वा	2-4-14	I.10,16, II.4, IV.4
विज्ञानमानन्दं ब्रह्म	3-9-28(7)	IV.18
विज्ञानं ब्रह्म	3-9-27	I.16
स एष नेति नेति	3-9-26	I.1
सर्वाणि च भूतानि	3-7-1	I.5

भागवतपुराणम्

	ग्रन्थभागः	प्रकरणम्
गोप्यकामाद्भयात्कंसो	1-1-80	II.15
तैजसानीन्द्रियाण्येव	3-5-32	I.21
नैवात्मानः प्रभूरयं	7-9-11	V.19
परस्वभावकर्माणि	1- 28-1	VI.10
प्रकृतेर्गुणसाम्यस्य	3-26-17	I.17
यथा तरोर्मूल	4-31-14	V.19
सञ्चिन्तयेद्भगवत	3-28-21	VI.13
सूयोऽग्निर्ब्राह्मणो	11-11-42	V.20
सेयं भगवतो मया	3- 7- 9	V.9

मुण्डकोपनिषद्

द्वा सुपर्णा सयुजा	3- 1- 1	I.6
परीक्ष्य लोकान्	1-2-12	IV.2
ब्रह्मविद् ब्रह्मैव	3-2- 9	III.1, VI.19
भिद्यते हृदयग्रन्थि	2-2- 8	VI.16
यत्तदद्रेश्यं	1-6- 6	IV.15, VI.14
यथोर्णनाभिः सृजते	1-1- 7	V.8
यः सर्वज्ञः सर्ववित्	1-1- 9	IV.13
वेदान्तविज्ञान	3-2- 6	VI.19
समित्पाणिः श्रोत्रियं	1-2-12	IV.2

कांश्चिन्ममानुध्यानेन	11-28-40	VI.10
	ग्रन्थभागः	प्रकरणम

वाक्यवृत्तिः

इत्थमन्योन्यतादात्म्य	40	IV.17
तदर्थस्य च	41	IV.17
पुत्रवित्तादयो	24	III.5
प्रत्यग्बोधो य	39	IV.17

वाायुपुराणम्

अवश्यम्भाविनार्थेन	1-61-130	VI.17
जनलोकात्सुराः	1-61-129	VI.17
निवर्तन्ते तदा	1-61-131	VI.17

विष्णुपुराणम्

अक्षिणेषु समस्तेषु	6- 7- 52	II.9
अभेदव्यापिनो वायो	2-14-32	I.15
अशब्दगोचरस्यापि	6- 5- 71	V.10
अस्त्रभूषणसंस्थान	1-22-76	V.15
आत्मा शुद्धोऽक्षर शान्तो	2-13-71	I.10, VI.7

आश्रयश्चेतसो ब्रह्म	6-7-47	VI.3
	ग्रन्थभागः	प्रकरणम्
इन्द्रियार्थेषु भूतेषु	1-5-62	V.4
एकस्वरूपभेदश्च	2-14-33	I.5
एते यमास्सनियमा	6- 7-38	V.5
एवं सञ्चिन्तयन् विष्णुं	1-20-1	V.15
ज्ञानशक्तिबलैश्वर्य	6- 5-79	II.14
ज्ञानस्वरूपो भगवान्यतो	2-12-39	II.7, VI.10
ज्ञानात्मकमिदं विश्वं	2- 6-50	II.17, V.12
तदेकावयवं देवं	6- 7-90	VI.13
तद्रूपप्रत्यया चैका	6- 7-91	VI.3
तया तिरोहितत्वाच्च	6- 7-63	I.14, III.6
तस्माच्च भूतसूक्ष्मादि	1-20-75	VI.6
तस्यैव कल्पनाहीनं	6 -7-92	VI.3, VI.4
तेजसानीन्द्रियाण्याहुः	1- 2-47	I.21
दारुण्यग्निर्यथा तैलं	2- 7-28	I.11
नामरूपञ्च भूतानां	1- 5-63	I.14
निभृतोऽभवदत्यर्थं	5-10-10	VI.15
प्रधानपुरुषौ चापि	1- 2-29	II.12
प्रधानेऽवस्थिते व्यापी	2- 7-28	I.11
मत्तत्सर्वमहं सर्वं	1-20-84	VI.7
मृतस्य च पुनर्जन्म	1-17-58	I.15
यत्र सर्वं यतस्सर्वं	1-20-84	VI.7

यदा तु शुद्धं निजरूपि	2-12-40	VI.7
	ग्रन्थभागः	प्रकरणम्
योगनिद्रामहामाया	5- 1-71	I.5
रूपं महत्ते स्थितमत्र	1-20-74	VI.6
विज्ञानमेकं निजकर्मभेद	2-12-43	II.6,V.12
विद्याऽविद्या च मैत्रेय	2- 6-51	V.8
विष्णुभक्तिः परा, प्रोक्ता	6- 7-61	I.14, III.6
विष्णुर्विष्णौ विष्णुतश्च	3- 3- 1	V.8
विस्तारस्सर्वभूतस्य	1-17-84	V.20
वेणुरन्ध्रविभेदेन	2-14-32	II.19, III.10
शंखप्रान्तेन गोविन्द	1-12-50	I.2
सितनीलादिभेदेन	2-16-22	II.19
हिमाम्बुधर्मवृष्टीनां	3-5-20	I.6

शिवपुराणम्

तस्माद्यस्यैव सम्पर्कात्	7-2-15-44	IV.2, VI.17
पत्रं पुष्पं फलं तोयं	7-2-10-72	V.19
यस्यानुभवपर्यन्ता	7-2-15-43	IV.2, VI.17
येषां तन्नाममात्रेण	7-2-15-42	IV.2, VI.17

श्वेताश्वतरोपनिषद्

अणोरणीयान्	3-20	I.18, VI.1, 6

	ग्रन्थभागः	प्रकरणम्
अपाणिपादो जवनो	3-19	V.4
आराग्रमात्रो	5- 8	I.18
एको देवः	6-11	V.8
कर्माध्यक्षः सर्वभूताधिवासः	6-11	I.14
तमेव विदित्वा	6-15	V.5
तं ह देवात्मबुद्धि	6-18	VI.1
तेनेदं पूर्णं पुरुषेण	3- 9	III.18
देवात्मशक्तिं	1- 1	III.18,V.5
न तत्समश्चाभ्यधिकश्च	6- 8	I.22
नान्यो हेतुर्विद्यते	6-17	V.5
निष्कलं निष्क्रियं	6-19	I.1
परास्य शक्तिः	6- 8	II.12, V.4
मायां तु प्रकृतिं	4-10	I,11, III.18, IV.12
मुमुक्षुर्वै शरणमहं	6-18	VI.1 यस्य
यस्य देवे परा	6-23	III.20
स कारणं कारणाधिपो	6- 9	IV.15, V.4
स्वभावमेके कवयो	6- 1	I.17

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA) ★
ACCESSION NO. 260214
DATE 12/11/09

Due date of Return	Due date of Return	Due date of Return

CENTRAL SANSKRIT UNIVERSITY

(Under Ministry at Education, Govt. of India)

GURUVAYOOR CAMPUS LIBRARY

Due Date Slip

Title : Svatmayogayogapradipikabodhini

Author : Dr P. Chithra

Acc. No. 26024

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return

SVĀTMAYOGAPRADĪPAPRABODHINĪ
AN EDITION AND STUDY

Dr. P. CHITHAMBARAN

The whole merit of the treatise is that it reviews the most comprehensive ideas of a vast subject, the Advaita Vedānta in an accurate, well arranged and readable manner. The author substantiates his views by quoting Upaniṣads and other scriptures. Another importance of this work is that it was written at a time when the Advaita Vedānta was facing a setback at the hands of the Dvaitins and Viśiṣṭādvaitins. For the above reasons, the present work of Amarānanda has an important place among the Prakaraṇa treatises of Advaita Vedānta.

ISBN 81-87084-06-5

SWANTHAM BOOKS
KAILASAM
MANGALAM LANE
SASTHAMANGALAM P.O.
THIRUVANANTHAPURAM
INDIA 695 010

PRICE
Rs. 400/-
US $ 80/-

CSUGCKL 1
R66
26024
Acc.No: 26024